आर्यकवि विरचितम्
सदाचारवृत्ति वर्तनम्

(सम्पादनं समीक्षात्मकमध्ययनञ्च)

CSUGCKL 1
015
30464
Acc.No: 30464

डां. पि.वि. श्रीदेवी

CAT. No: 16499
HOLD ID: 28196
BOOK No: 1
LOCATION: 53-B-4
AD-A1

आर्यकवि विरचितम्
सदाचारवृत्ति वर्तनम्

(सम्पादनं समीक्षात्मकमध्ययनञ्च)

Rashtriya Sanskrit Sansthan Deemed University
GURUVAYOOR CAMPUS
P.O. PURANATTUKARA
THRISSUR
KERALA 680 551
LIBRARY
Under Ministry of H.R.D., Govt of India

डां. पि.वि. श्रीदेवी

Edited with Notes

Dr. P.V. Sreedevi
Acharya (Sahitya)
Acharya (Jyothisham)
Vidya varidhi

SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D GOVT OF ...
ACCESSION NO. 30464
DATE 30/11/12

Published by

P.G. Venugopalan
XI/256, 'Sreehari' (Warriam)
P.O. Peramangalam
Thrissur dt.
Kerala 680 545

आशंसावचांसि

सुरभारतीसमुपासकानां समेषां सुविदितमेतदस्ति यत् संस्कृतवाङ्मयस्य विविध-विषयेषु केरलीयकृतयोगदानमहत्वं सुप्रसिद्धं खलु। केरलीयेन आर्यकविना सदाचारविषये 'सदाचारवृत्तिवर्तनं' नाम एकोऽमूल्यो ग्रन्थः अधुना प्रकाशं नीतः। राष्ट्रीयसंस्कृत संस्थानस्य कल्पित विश्वविद्यालयस्य गुरुवायूर परिसरे साहित्य विभागे साहित्य विदुष्या तथा च ज्योतिशास्त्रपण्डितया श्रीमत्या श्रीदेव्या प्रकाशितः आर्यकविविरचितः 'सदाचारकृतिवर्तनम्' नाम ग्रन्थः अनुपम एव। इदम्प्रथमतया ग्रन्थोऽयं समीक्षात्मकाध्ययनेन साकं सम्पादितः प्रकाशितश्च।श्रीदेव्याः तूलिकातः इतः परमपि अनेकग्रन्थतल्लजाः अविर्भवन्तु इति आशासे।

सुरभारती समुपासकः
प्रोफसर् के. टि. माधवः
साहित्य विभागाध्यक्षः
राष्ट्रियसंस्कृत संस्थानम्
मानितविश्व विद्यालयः
गुरुवायूर परिसरः

प्रास्तविकम्

संस्कृतसाहित्ये केरलीयपण्डितानां सान्निध्यं प्रकटयन्तः अनेकाः अतुल्यरचनाः सन्तीति प्रायः सर्वैरपि स्वीकृतमस्ति। केरलीयपाण्डितैः रचिताः अनेके ग्रन्थाः पूर्णतया प्रकाशिता वर्तन्ते। प्रकाशितेभ्योऽप्यधिकमप्रकाशिताः ग्रन्थाः इत्येव सत्यम्। ग्रन्थलिपिबद्धाः अनेके ग्रन्थतल्लजाः सम्यक् परिरक्षणं विनाऽधुना विनष्टाः नष्टप्रायाः वा दृश्यन्ते। अन्वेषणकुतुकिनः देशीयाः विदेशीयाश्च पण्डिताः ग्रन्थानां सम्पादने परिरक्षणे प्रकाशनेच श्रद्धामादधानाः प्रवर्तन्त इत्याश्वासकरमेव।

काव्य-शास्त्रप्रपञ्चे न कोऽपि विभागः - कोऽपि विषय यस्मिन् केरलीय पण्डितानां रचना नास्ति। वैदिक-तान्त्रिक-ज्योतिष-वैद्य-शिक्षा-काव्य-नाटक-स्त्रोत्रादि विभागेषु रचिताः ग्रन्थाः केरलदेशस्य ग्रन्थालयेषु पुरातनकुटुम्बेषु च सुलभतया द्रष्टुं शक्यन्ते। एतादृश पौराणिकग्रन्थेष्वन्यतमो भवति 'सदाचारवृत्ति वर्तनम्'। श्रीमत्या श्रीदेवीमहाभागायाः परिश्रमेण अयं ग्रन्थः सहृदयानां पठनाय आस्वादनाय च समर्थोऽभवत् इति हर्षास्पदम्।

श्रेष्ठानामष्टवैद्यानां कुले जातेन श्रीमता आर्यशर्मणा विरचितोऽयं ग्रन्थः "सदाचारवृत्तिवर्तनम्' नाम। नाम्ना एवावगन्तुं शक्यते यदयं ग्रन्थः सदाचारसंबद्धान् विषयान् प्रतिपादयतीति। परन्तु सदाचारेतरविषया अपि परामृष्टाः दृश्यन्ते।

आर्यशर्मणः जीवनकालमधिकृत्य अधिकतया न ज्ञायते। कवेरस्य जन्म 'पुलामान्तोल' इति नामके ग्रामे अष्टवैद्यानां कुले अभवत् इति सूचना अस्ति। तस्य पितुः नाम 'नारायणन्' तथा पितामहस्य नाम 'आर्यन्' चासीदिति सूचितम्। द्वावपि पितृपितामहौ निपुणौ वेद्यौ आस्तामित्यत्र न सन्देहः। नारायणस्य सीमन्तपुत्र आसीत् अर्यकविः। प्रथमाध्यायस्य केचन श्लोकाः एताद्विषयकाः सन्ति।

अस्ति तत्तीरनिकटे पनसान्दोलिकारव्यया।
वैद्यवेश्मार्यशर्मेति विश्रुतस्तद् गृहेश्वरः।।
तस्य पुत्रोऽतितेजस्वी नारायण इति श्रुतः।

नामार्थमेव कुर्वाणः परेच्छावृत्ति वर्तनः।।
धर्मायार्थं च कामं न कुर्वणो लौकिकीं स्मरन्।
नारायणमहादेवौ माया यस्य हृदाश्रितौ।।
तस्य सीमन्तपुत्रोऽहं सर्वज्ञो वैद्यसम्मतः।
सन्मार्गदर्शी च सुखी दुःखमार्गबहिष्कृतः।।
पितामहशिखायां तु आत्मपुच्छेन मेलितः।
नाम्ना पितामहः साक्षात् मातामहमनुव्रतः।।

सप्तदशाध्यायसमन्वितोऽयं ग्रन्थः। विषयप्राधान्यमनुसृत्य अध्यायानां नामानि निर्दिष्टानि। एकात्मवाद, अनात्मनिरसनम्, नानाभावप्रतिषेधैकात्मयोगकथनम्, प्रत्यगात्मप्रबोधकथनम्, असन्निरसनं, जीवप्रबोधकथनम्, असत्प्रसङ्गः अभावनिरूपणम्, नित्यसत्यप्रतिपादनम्, अष्टगङ्गहृदयनिर्वचनम्, अज्ञानप्रकरणे सत्स्तोत्रं, अमर्त्यविधानम्, जीवन्मुक्तानुभवकथनम्, नित्यशरीरप्रतिपादनम्, अनर्थपरिहारः अज्ञातात्मप्रकाशकम्, अज्ञानप्रकरणम् इत्येतानि नामानि दत्तानि सन्ति। अनेन स्पष्टं भवत्यास्मिन् ग्रन्थे अनेके विषयाः परामृष्टाः सन्तीति।

पारम्पर्यचिकित्सकानां कुटुम्बे प्राप्तजन्मनः आर्यकवेः ग्रन्थोऽयं कथं चिकित्सासंद्धं विषयमपहाय सदाचारवृत्तिपरमभजदिति शङ्कास्यात्। शङ्कायाः परिहारोऽप्यत्र विधीयते। भारतीयानां जीवनलक्ष्यं भवति धर्मार्थकाममोक्षरूपचतुर्विधपुरुषार्थाणां संप्राप्तिः। आत्यन्तिकलक्ष्यप्राप्त्यर्थं आरोग्यं अत्यन्तमावश्यकं खलु। शारीरिकरोग्यस्य आधारीभूता सदाचारवृत्ति। ब्रह्माचर्याद्यनुष्ठानं विना ब्रह्ममार्गे प्रवेष्टुं न कोऽपि शक्तो भवति। नित्यानित्यवस्तुविवेकः, इहामुत्र फलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वं चेति साधनाचतुष्टयसम्पन्न एव मोक्षस्याधिकारीति आदिशङ्कराचार्येण स्वरचित ब्रह्मसूत्र-भाष्ये निर्दिष्टमस्ति। साधनाचतुष्टयाधारभूतमिदं सदाचारानुष्ठानमिति सूचितं ग्रन्थकारेण। एवं भौतिकोऽयं शास्त्रग्रन्थः आध्यात्मिकमार्गेऽपि न केवलं सहायकः परन्तु आधारभूतो विराजत इति सिद्धम्।

अत्र शङ्कास्यात् यदयं शास्त्रग्रन्थः अथवा काव्यम्। 'शास्त्र' ग्रन्थानां रचनाविधि अत्र पूर्णतया न स्वीकृता। शास्त्रग्रन्थलक्षणानि पूर्णतया यद्यपि न सन्निहितानि तथापि ग्रन्थोऽयं नीतिशास्त्रविभागे अन्तर्भवितुं शक्यते इत्याभिप्रायः। सूक्ष्मतया निरीक्षते चेत् नीतिशास्त्रेऽपि भिन्नोऽयं ग्रन्थः इत्येव वक्तव्यम्। नीतिशास्त्रे धर्माधर्मयो पुण्यपापयोश्च

वर्णनं दृश्यते। प्रकृतग्रन्थे तु नैतादृशः परामर्शः दृश्यन्ते। ग्रन्थेऽस्मिन् शरीरं, आत्मा, आचार इत्यादि विषयाः मुख्यतया प्रतिपादिताः। तथाऽप्योऽयं ग्रन्थः नीतिशास्त्रस्य प्रकरणत्वेन अङ्कीकर्तव्यमित्यभिप्रायः।

डा. श्रीदेवीमहोदयायाः परिश्रमेण, ग्रन्थोऽयं प्रकाश्यते इति ज्ञात्वा अन्येषां संस्कृतपण्डितानां सहृदयानां च साकं अहमपि नितरां तुष्यामि।

रवि
डो. ई.पी. अवरिन्दाक्षन् M.A., B.Ed., Ph.D
भूतपूर्वप्राचार्यः
केन्द्रीयविद्यालयः
पुरनाट्टुकरा 680551

पेरामंगलम्
1-8-2005
अञ्जलि
पेरामंगलम् पोस्ट
तृश्शूर 680 545

आमुखम्

विदितमेवेदं सर्वेषां यत् केरलदेशः विविधशास्त्रविशारदैः एवं सुकविभिश्च सम्पन्न इति। प्राचीनकालेऽपि प्रगल्भाः पण्डिताः कवयश्चात्र आसन्। तैः बहवः ग्रन्थाः विरचिताः। किन्तु तेषु विरला एव ग्रन्थाः अधुना उपलभ्यन्ते। अत्रेदं कारणं मन्ये - प्राचीन काले उट्टङ्कणादि व्यवस्था नासीत्। केवलं भुर्जपत्र - प्रभृतीनि लेखनार्थं उपयुकतानि। तेषां संरक्षणं च सम्यक् न कृतम्। अतः काले गते एते नष्टप्रायाः संजाताः। तथापि सौभाग्यवशाद् केचन जनाः स्वहस्तगतान् पाण्डु लिपि ग्रन्थान् ग्रन्थालयेभ्यः दत्तवन्तः। तादृश ग्रन्थेष्वन्यतमं आर्यकविविरचितं 'सदाचारवृत्ति वर्तनम्'।

सप्तदशाध्यायात्मके शास्त्रकाव्येऽस्मिन् अध्यात्म निरतं आरोग्यपूर्णं परिशुद्धं जीवनं कर्तुं उपयुकता नैकाः निर्देशाः अनेकशास्त्रप्रतिपादनद्वारा भंग्यन्तरेण कृताः। अस्य कर्ता आर्यकविः सत्पदशशतके केरलदेशे मलप्पुरम् जिल्लायां 'पुलामन्तोल्' ग्रामे 'पुलामन्तोल् मूस्' इति विख्याते अष्टवैद्यकुटुम्बे जन्म लेभे। तस्य पिता नारायणन् मूस् प्रसिद्ध वैद्यः आसीत्।

मंद्रास् ओरियन्टल मानुस्क्रिप्ट् ग्रन्थालयात् सदाचारवृतिवर्तनस्य हस्तलिपि सम्प्राप्ता *अन्यत्र कुत्रापि तस्य हस्तलिपिः न समुपलभ्यते। अतः पूर्वो कतां हस्तलिपिमवलम्ब्य मया अस्य ग्रन्थस्य समीक्षा कृता।

डॉ. पि. वि. श्रीदेवी

* New catalogus vatalogorum - An Alphabetical Register of Samskrit and Allied works and authors - by Dr. V. Raghavan.

विषयानुक्रमणिका

विषयः	पृष्ठाङ्कः
I. आर्यशर्मणः परिचय	10
II. सदाचारवृत्तिवर्तनस्य परिचयः	14
III. सदाचार वृत्तिवर्तनस्य वैशिष्ट्यम्	17
IV. सम्पदितग्रन्थः, टिप्पणिः, सारश्च	37
अध्यायः	
1. आत्मस्वरूपकथनम्	37
2. ज्ञानकल्पे अनात्मनिरसनम्	57
3. नानाभावप्रतिषेधैकात्मयोगकथनम्	75
4. प्रत्यक्षात्मप्रबोधकथनम्	91
5. अज्ञानप्रकरणे असन्निरसनम्	110
6. अज्ञानाधिकारे जीवप्रबोधकथनम्	121
7. अज्ञानप्रकरणे असत्प्रसङ्गः	136
8. अभाव निरूपणम्	150
9. अज्ञानप्रकरणे नित्यसत्यप्रतिपादनम्	168
10. अष्टाङ्गगूढ्यनामनिर्वचनम्	179

11. अज्ञान प्रकरणे सत्स्तोत्रम्	189
12. अज्ञानप्रकरणे अमर्त्य विधानम्	205
13. अज्ञानप्रकरणे जीवन्मुकतानुभवकथनम्	224
14. अज्ञानकल्पे नित्यशरीरप्रतिपादनम्	240
15. अज्ञानप्रकरणे अनर्थपरिहारः	251
16. अज्ञातात्मप्रकाशकम्	264
17. अज्ञान प्रकरणम्	278
परामृष्टग्रन्थसूचि।	291

I. आर्यशर्मणः परिचयः

अन्य ग्रन्थकर्तृणामिव "सदाचारवृत्तिवर्तनस्य" कर्ता आर्यशर्मा अपि कस्मिन् समये कं देशमलङ्कृतवान् इति विषये वयं किञ्चिदेव जानीमः। संस्कृतभाषायां केचन कवयः ग्रन्थारम्भे स्वपरिचयं प्रयच्छन्ति। यथा "अभिज्ञानशाकुन्तलनाम्नि नाटके "अद्यखलु कालिदासग्रथितवस्तुना नवेनाऽभिज्ञान शाकुन्तलाख्येन नाटकेन उपस्थातव्यम् अस्माभिः"।। इत्यादि सूत्रधारवाक्यद्वारा स्वपरिचयं विदधाति महाकविः कालिदासः। एवं च सदाचारवृत्तिवर्तने प्रथमाध्याये विद्यमानैः कतिपयै श्लोकैः अस्य ग्रन्थस्य कर्ता आर्य शर्मा केरलदेशे "पुलामन्तोल्' इति विख्याते अतिरमणीयग्रामे" पुलामन्तोल् प्रसिद्धे मूस् इति विख्याते अष्टवैद्यकुटुम्बे जन्म लेभे इति ज्ञातुं वयं शक्नुमः।। तद्यथा-

"श्री केरलाख्य विषये भवति स्रवन्ति बालाभिधाविमलशीतपयः प्रवाहा।।
स्वर्लोकवारवनिता नयनाभिरामा मीनावलिर्नटनमङ्गलरङ्गदेशा।।
अस्ति तत्तीरनिकटे पनसान्तोलिकाख्यया
वैद्यवेश्मार्यशर्मोति विश्रुतस्तद्गृहेश्वरः।
तस्य पुत्रोऽतितेजस्वी नारायण इति श्रुतः
धर्मायार्थं च कामं च कुर्वाणो लौकिकं स्मरन्।।
नारायणमहादेवौ माया यस्य हृदाश्रितौ।।
तस्य सीमन्तपुत्रोऽहं सर्वज्ञो वैद्यसम्मत।
सन्मार्गदर्शी च सुखी दुःखमार्गबहिष्कृत।।
पितामहशिखायां तु आत्मपुच्छेन मेलितः।
नाम्ना पितामहः साक्षात् मातामहमनुव्रतः।।" इति।

उपर्युक्तेन पद्यभागेन ग्रन्थकर्तुः पितामहः आर्यन्मूस्, पिता च नारायणन् मूस् आसीत् इति अवगन्तुं वयं शक्नुमः। स्वपितरं प्रति अभिमानविजृम्भितः आर्यशर्मा

तस्य पिता अतितेजस्वी, वैद्यवृत्तौ लब्धप्रतिष्ठः च आसीत् इति उद्घोषयति। केरलीय ब्राह्मणः पुत्राणां त्रिपुरुनुगं नाम कुर्वन्ति। तदनुसारेण सीमन्तपुत्रस्य पितामहस्य नाम, द्वितीय पुत्रस्य मातामहस्य नाम इत्यादि क्रमः विद्यते। तस्माद् स्वपितामहस्य "आर्यः" इति संज्ञामेव एष लेभे।

"मातामहो मे मधुसूदनप्रियो नारायणेत्युच्चतरं ब्रुबाणः।
संसारदुःखानि न विन्दतेऽसौ त्रसन्ति यन्नामरवेण रोगाः।।

तस्य पुत्रादधीतोऽहं वैद्यशास्त्रसमुच्चय-। "इत्यादिना स्वमातुलस्य सकाशात् स वैद्यविषयमधीतवान् इति ज्ञातुं शक्यते। स मातुलः "कुट्टञ्जेरिमूस्" इति सम्भाव्यते। अत्रेदं कारणम् - (1) अष्टवैद्यकुटुम्बेषु एकतमस्य कुट्टञ्जेरिकुटुम्बस्य गुरुस्थानमस्ति। अतिनिपुणाः वयस्करार्यन् मूस् प्रभृतयः तेषां सकाशात् वैद्यशास्त्रमधीतवन्तः। (2) केरलेषु पेरुवनग्रामवासिनः शुकपुरग्रामवासिंन इति ब्राह्मणा द्वेधा विभाक्ताः विद्यन्ते। तत्र कुट्टजेरिमूस्परिवारः शुकपुरग्रामे भवति; पुलामन्तोल्परिवारस्तु पेरुवनग्रामे। ग्रन्थेस्मिन् श्रीवन्तीपुरम् "इत्यनेन शुकपुरं परामृश्यते। तथा हि तत्र दक्षिणामूर्तेः प्रतिष्ठा विख्याता खलु। तस्य वामपार्श्वे शिवस्यापि प्रतिष्ठा अस्ति।

"माधवं दक्षिणं पक्षं श्रीवन्तीपुरवासिनः।
श्रीवन्तीपुरवासी तु वामदेव इति स्मृतः।।"

इत्यार्यशर्मा प्रत्येकं प्रस्तौति। ग्रन्थे प्रस्तुतः श्रीवन्दीपुरम् "शुकपुरम्" एवेति व्यक्तं भाति। किंचास्य गुरुभूतो मातुलो नारायणः 'कुट्टजेरिमूस्' इति नाम्ना प्रसिद्धे वैद्यश्रेष्ठाधिष्ठिते वंशे कृतजन्म अभूत् इति ज्ञायते।

"काश्यपगोत्रजा बुद्धिरिति' कविवाक्येन तस्य गोत्रमपि स्पष्टीकृतम्। इदानींतनेन पुलामन्तोल्वंशजातेन नारायणन्मूस्महोदयेन तेषां गोत्रं काश्यपगोत्रमेवेति स्फुटीकृतम्।

"काणादं पाणिनीयं च मीमांसाद्वैतखण्डनम्।
वेदान्तं योगसांख्यादीन् चालोक्यैव कृतत्विदम्।। "इत्यात्मनः सकलशास्त्रपरिज्ञानं संसूच्य स्वग्रन्थे सदाचारवृत्तिवर्तने कविरयमेतत्प्रकाशयति च। सप्तदशाध्यायैः विभक्ते अस्मिन् ग्रन्थे आदितः प्रभृत्येव मीमांसाद्वैतवेदान्तादीनांआयुर्वेदमन्त्रतन्त्रादीनां शास्त्राणां निर्धारणं तत्र तत्र दृश्यते।

"इदानीमार्यशर्मेति विख्यातो वैद्य एव सः" इति स्वयं वैद्याभिमानपुलकिःतो भवति आर्यशर्मा। प्रथमाध्याये तु पुलामन्तोल्वैद्यकुटुम्बीय इति आत्मानं विशिनष्टि। एवं चैष ग्रन्थकर्ता प्रसिद्धे पुलामन्तोल् अष्टवैद्यकुटुम्बे जन्म लेभेत्यवगन्तुं शक्यते।

सन्त्यत्र केरलेषु पुलामन्तोल्मूस्, चिरट्ट्मण्मूस्, वयस्करमूस्, कुट्टञ्चेरिमूस्, ट्रिच्चूर् तैक्काट्मूस्, वेल्लोट् मूस्, आलत्तूर नम्बि, कात्तोल् नम्बि इति बैद्यविशारदाः प्रसिद्धाः अष्टवैद्याः। केरलचरित्रानुसारं परशुरामः स्वपरशुं निक्षिप्य केरल भूमिभागं उद्धृतवान्। स भार्गवरामः अत्र चतुष्षष्टिषु ग्रामेषु नम्बूतिरिगृहाणि संस्थाप्य नूतनाचारमर्यादां कल्पयामास च। कानिचननम्बूतिरिकुलानि वैदिककर्मसु व्यापृतानि बभूवुः। अन्ये च इतरव्यवहारकर्मसु लब्धप्रतिष्ठाश्चाभवन्। एषु भूसुरपरिवारेषु अष्टपरिवारान् वैद्यमुपदिदेश भार्गवरामः। त एवाष्टवैद्यपदवीमारूढवन्तः। वैद्यवृत्तिषु व्यापृताः सार्धष्टादशकुटुम्बाः अष्टवैद्या इति व्यवह्रियन्ते इत्यन्याभिप्रायोऽपि विद्यते।

ये अष्टाङ्गहृदयमवलम्ब्य चिकित्सां कुर्वन्ति ते एवाष्टवैद्या इति केचन कथयन्ति। तन्न युज्यते। केरलीयाः भिषग्वराः प्रायेणाष्टाङ्गहृदयमवलम्ब्य चिकित्सां विधीयन्ते। तस्मात्ते सर्वेऽपि अष्टवैद्याः भवेयुः।

अष्टवैद्यकुटुम्बेषु केचन सन्ततिपरम्पराया अभावात् अधुना कथावशेषा जाताः। किन्तु वयक्सरः मूस्, पुलामन्तोल्मूस्, तैक्काट्मूस् प्रभृतयः अद्यपि वैद्यवृत्तौ प्रशस्ताः विराजन्ते।

मध्यकेरलेषु मलप्पुरम् जिल्लायां कुन्तिप्पुषा इति विख्यातायाः नद्याः तीरे अधुनापि पुलामन्तोल् इति प्रसिद्धमष्टवैद्यकुटुम्बं स्वीयं महिमानमुच्चैः घोषयन् तिष्ठति। तत्र प्रवहन्त्यां नद्यां विराजमानानां जलकणानामपि तेषां यशसः उद्घोषणे तात्पर्यमस्तीव।

प्राचीनकालादारभ्यातिनिपुणाः वैद्याः पुलामन्तोल्कुटुम्बे आसन्। अत्रेयं कथा स्मरणपथमारोहति - पुरा "तिरुवितांकूर्महाराजस्यातिकठिना उदरपीडा संजाता। प्रगल्भवेद्यैः चिकित्सतोऽपि स न सुखं लेभे। पुनः चिकित्सार्थं वैद्यवरं पुलामन्तोल्मूसाख्यमानेतुं राजभृत्याः प्रेषिताः। तत्समये तत्र वैद्यकुटुम्बे चतुर्दशवर्षदेशीयः एक एव बालः आसीत्। कुमारस्यास्य पिता बाल्ये एव पंचत्वं गतः। वैद्यशास्त्रे अपरिचितोयं बालः" मम पितामहादयः प्रसिद्धाः वैद्याः आसन् अहमत्र विषये अज्ञो

भवामि "इत्यतीव दुःखितः संवृत्तः। मातः उपदेशमनुसृत्य स बालः द्वादशाहं कुलदैवं परमशिवं वैद्यनाथंअतीव भक्त्या उपासांचक्रे। पूर्वेद्युः रात्रौ वृद्धः ब्राह्मणः कश्चित् बालस्य हस्ते गुडिकात्रयं निक्षिप्य चिकित्साविधिं च निर्दिश्य एवमब्रवीत् - "राजसकाशात्प्रतिफलं किमपि न स्वीकर्तव्यम्। किन्तु 'ताम्रपर्णीहृदये गुप्तां धन्वन्तरीविग्रहमानीय शिववामभागे प्रतिष्ठापयितव्य" इति प्रार्थना राजपुरतः समर्पणीया इति। यथोपदेशं च बालेन सर्वमनुष्ठितम्। रोगविमुक्तो महाराजः प्रसन्नो भूत्वा धन्वन्तरीविग्रहं शिववामभागे प्रतिष्ठापयामास। तदा प्रभृति पुलामन्तोल्कुटुम्बे धन्वन्तरीरुद्रौ तुल्यभावनया पूजितौ राजेते इति ग्रामवृद्धाः वदन्ति।

अद्यापि पुलामन्तोल् शङ्करन्मूस्महोदया पुलामन्तोल् नारायणन्मूस्महोदयाः पुलामन्तोल् आर्यन्मूस्महोदयाश्च वैद्यवृत्तौ प्रतिष्ठिताः।

सदाचारवृत्तिवर्तनस्य कर्तुः आर्यशर्मणः कालनिर्णये महान् क्लेशो वर्तते। यद्यपि प्रथमाध्याये सः स्वपरिचयं दत्तवान् तथापि स्वकालविषये तेन मौनमेवावलम्बितम्। अस्मिन् विषये काचिदपि सामग्री नोपलभ्यते। किन्तु उल्लूर् एस्. परमेश्वरैयर्महोदयेन "केरलसाहित्यचरित्रमिति स्वीयेग्रन्थे सप्तदशशताब्दयां रचितेषु पुस्तकेष्वस्य पुस्तकस्य गणना कृता। एवं च क्रिस्तीयसप्तदशाब्दः तस्य जीवितसमय इति निर्धारयितुं शक्नुमः। डा. कुञ्जुण्णिराजमहाशयः स्वीयगवेषणप्रब्रन्धे सदाचारवृत्तिवर्तनस्योल्लेखनं कृतवान्। अत्रापि कालमधिकृत्य किंचिन्नोक्तम्। तेन तु "मैनर् वर्क्स्" इति विभागे अस्य ग्रन्थस्य परिगणना कृता। न तु "मोडेण् वर्क्स्" इति विभागे। एवं च अयं ग्रन्थः नातिप्राचीनः, नवा अत्याधुनिकः। अतः उपर्युक्तरूपेण ग्रन्थकर्तुः कालः क्रिस्त्वब्दसप्तदशशतकमिति निर्धारयितुं शक्यते। सदाचाररवृत्तिवर्तनमपहाय अन्यग्रन्थाः अनेन रचिताः सन्ति वा न वा इति व्यक्तं वक्तुं वयं न पारयामः।

।। सदाचारवृत्तिवर्तनस्य परिचयः

सप्तदशाध्यायाः दृश्यन्ते सदाचारवृत्तिवर्तने। अस्मिन् ग्रन्थे कोऽपि विषयः प्रत्येकतया न प्रतिपादितः। प्रायेण सर्वेष्वप्यध्यायेषु विविधानां विषयाणां संकलनं दृश्यते। एकैकस्याप्यध्यायस्य शीर्षकंमुपन्यस्तम्। तथापि क्वचित् शीर्षकस्य प्रतिपाद्यविषयस्य च सम्बन्धाः दुरूह इव प्रतीयात्।

प्रथमाध्याये एकात्मवादः प्रतिपादितः। रूपरसगन्धास्पर्शशब्दरूपात् पंचवेद्यात्परः आत्मा अनुभवमात्रगम्यः, अरूपः, निरूपाधिश्च सन् वर्तते। सोऽयमात्मा जीवब्रह्मैक्येन शोभते इति चात्र निरूपितः।

अनात्मनिरसननामेके द्वितीयेऽध्याये छायावादः, शून्यवादः, अनुमानसरणिश्च प्रतिपादिताः दृश्यन्ते। अत्र तु एक एवात्मा बाह्याभ्यन्तरभेदेन द्विविधः इति तेनोक्तम्। बाह्यगतं रूपं प्रत्यक्षमाभ्यन्तरं च ध्यानगोचरम् इत्युक्त्वा एकस्यैवात्मनः भेद अनात्म इति निरसनं करोति कविः। पुनः "व्यावहारिक सत्येन आत्मैवावतिष्ठति" इति आत्मनैव स्थिरत्वं कल्पितं ग्रन्थकृता।

जीवात्मपरमात्मरूपौ खगौ संसाररूपे वृक्षे स्थित्वा जीवात्मा विषादं मोहदं दुःखरूपं फलं भुनक्ति परमात्मा तु सुखाख्यं फलमश्नातीति अद्वैततत्वं प्रधानतया वर्णितं तृतीयाध्याध्याये।

प्रत्यगात्मबोधकथननामके चतुर्थाध्याये सत्यप्रमाणेन वेदेनैव प्रत्यक्स्वरूपं नित्यसत्यं सद्वस्तुभूतमीश्वरं प्रकाशयितुं शक्यतेत्युद्घोषयति कवि-। अध्यायेऽस्मिन् निर्विकारं ब्रह्म अरूपं सत् सर्वस्मिन् वस्तुनि आस्ते इति अद्वैतस्य मूलभूतः विवर्तवादोऽपि निर्धारितः।

पंचमेऽध्याये पार्वतीशङ्करयोरीश्वरमायारूपेण वर्णनं कृत्वा पार्वती सम्पर्केण महेश्वरस्य सद्रूपप्रकाशनं भविष्यतीति उच्यते। असद्रूपस्यावलोकनं कर्तुं शक्यते। सद्रूपस्तु अरूपो भवति। एवं च अव्यक्तमसदूपं वर्णयित्वा महेश्वरस्य सद्रूपप्रतिपादनं

कृतमसन्निरसनमिति पंचमेऽध्याये।

"जीवप्रबोधकथनं" नामके षष्ठे अध्याये शरीरं स्वर्गत्वेन शिवत्वेन अङ्गीकरोत्येष वैद्यकः। भूत-भव्य-सुख-दुख-लयोदय-अभाव-भावश्चेति अष्टाङ्गानि प्रतिपादितानि दृश्यन्ते। पुनश्च विद्यया जीवः शुद्धः सन् स्वकीयं शरीरं सम्यक्तया रक्षन् स्वस्यावलोकनेन समृद्धत्वान्नानाभूतानि कार्याणि करिष्यन्ति। अव्यक्तरूपेण व्यक्तरूपेण च विद्यामविद्यां च प्रकाशयन्, सर्वज्ञः भगवान् सर्वेषु प्राणिषु स्वकीयं तत्वं कथयन् जाग्रत्स्वप्नसुषुप्त्यादिरूपेण प्रबोधयति।

"असत्प्रसङ्गः" इति नाम्ना अभिधीयते सप्तमोऽध्यायः। सदसतोः सदाचारदुराचारयोः नास्तिकानामसद्भावस्य आस्तिकानां सद्भावस्य च कारणभूतः अहंपदार्थः परोपकारशीले सुखं परोपद्रवशीले दुःखं प्रददातीति सत्यं वर्णितम्। सन्तः प्रत्यक्षेण जीवं परोक्षेण परं च पश्यन्ति इत्यादि अत्र प्रतिपादितम्।

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः इति सप्तपदार्थाः तार्किकैः स्वीकृताः। भावाभावयोर्ज्ञानं एकेनैवेन्द्रियेण जायते तेषां मते। अभावपदार्थस्वीकाराय औत्सुक्यमायुर्वेदे न पश्यामः। रोगस्याभावेनारोग्यस्य, आरोग्यस्याभावेन रोगस्य च ज्ञानं जायते। तस्माद्भावाभावयोः प्रत्येकं लक्षणं विहितुमर्हति। आयुर्वेदे प्रसिद्धं मतमिदं भाङ्ग्यन्तरेण प्रतिपादितमष्टमाध्याये।

परमात्मा एव सत्यम्। वेदोक्तविधिमार्गेण यः जीवति तस्य सत्यप्राप्तिः स्यादिति तत्वं निर्धारितं "नित्यसत्यप्रतिपादनम्" नामके नवमेध्याये। वैद्यविषये वाग्भटाचार्यविरचितः अष्टाङ्गहृदयो नाम ग्रन्थः प्रसिद्धः खलु। शल्यशालक्याद्यष्टङ्गान्यत्र प्रतिपादितानि। सदाचावृत्तिवर्तनस्य दशमाध्याये प्रकारान्तरेण अष्टाङ्गवर्णनं कृतम्। अत्र च पृथिवी-अप्-तेजो-वायु-आकाश-मनोबुद्धि-अहंकाराश्चेति अष्टाङगानि प्रतिपादितानि। एषणक्रियया एव परमात्मनः रूपप्राप्तिर्भवति। इच्छा च हृदये एव जायते। तस्मादष्टाङ्गं "मम हृद्भूतं" इति निश्चित्य वाहटः अष्टाङ्गहृदयं निर्मितवानित्युक्तम्। प्राकृतभाषयां वाग्भटः वाहट इति उच्यते। सज्जनानां गुणकीर्तनं दृश्यते एकादशाध्याये। एक एवाहंपदार्थः अविभक्ते सति परमात्मवाचि, विभक्ते सति विशेषव्यक्तवाचित्युक्त्वा यः लोके प्रतिबिम्बितं

विषयिणं जानाति स एव अमर्त्य इत्याभणति द्वादशे अध्याये। प्रत्यक्षे परोक्षं परोक्षे प्रत्यक्षं च यः पश्यति स एव जीवन्मुक्तः इति प्रतिपादयति त्रयोदशाध्याये। चतुर्दशाध्याये शरीरद्वारेणैव आत्माज्ञानसम्पादनयोग्यत्वात् शरीरस्य प्राधान्यं वर्णयति। पंचदशाध्याये सदाचारमाश्रित्य सर्वेषां सुखं स्यात् इति प्रतिपादयति। प्रत्यक्षपरोक्षभेदेन सत्यस्य द्वैविध्यं प्रदर्शितं षोडशेऽधाये। अन्तिमे अध्याये सत्सेवकस्य वैद्यस्य परा गतिःस्यात् इति प्रकाशयत्यार्यशर्मा।

III. सदाचारवृत्तिवर्तनस्य वैशिष्ट्यम्

आर्यशर्मणा विरचितस्यास्य प्रबन्धस्य को वा विशेषयोग्यता येन तस्य निरुपणमनुपेक्षणीय स्यादिति शंका सहृदयानां मनसि जायत एव। इदत्वत्र बोध्यम् - वैद्यशास्त्रं लौकिकं शास्त्रं सत् साधारणजनानां जीवितसौख्यप्रदायकं विलसति। एताहशं वैशिष्ट्यं तु अस्ति वा पारत्रिकसौख्यबोधकस्य वेदान्तशास्त्रस्येति वा प्रश्नः अस्मिन्नवसरे उन्मीलयत्येव। शरीरशास्त्ररूपो आयुर्वेदः अन्यः, आत्मविचारशास्त्रं वेदान्तः अपरः इत्यनयोः ध्रुवान्तरितयोः शास्त्रयोः कथं वा परस्परसमन्वयः सम्भवेत्। एताहशे वैषम्ये विद्यमाने सत्येषार्यशर्म निरङ्कुशभावेनायुर्वेदस्य वेदान्तस्य च परस्परतुलनाय बद्धप्रतिज्ञः सन् सहृदयानां विचारपदवीमधितिष्ठति।

1. सदाचारवृत्तिवर्तनमिति शीर्षकम्

सदाचारवृत्तिवर्तनमिति प्रबन्धसंज्ञायाः औचित्यमेव प्रथमं विचारयामः। सदाचारे वर्तनामिति लघु नाम आशास्यतरं विभाति। सदाचारपद्धतिं विना कथं वा जिविते आरोग्यसम्पत्तिः। ब्रह्मचर्याद्यनुष्ठानं विना कथं वा ब्रह्मात्मैक्यानन्द प्राप्तिः। एवं च यमनियमादि शाधनासम्पत्तिः इहामुत्रार्थफलभोगविरागाः मुमुक्षत्वमिप्यादि साधनाचतुष्टयसम्पत्तेराधारभूतं भवति सदाचारानुष्ठानम्। एवं च भौतिकमिदं शास्त्रं आधारभूतं सत् वेदान्तप्रतिपाद्यमानः परम पुरुषार्थं जीवात्मने प्रददाति। एतत् सरलं तत्वं विविधैरूपमाप्रयोगैरन्यैरलङ्कारवचनैः समानशास्त्रगतवाक्यैश्च एष आर्यमहाशयः सुविशदमस्मिन् प्रबन्धे निपुणया सूक्ष्मेक्षिकया वितनोति। एतदेवास्य ग्रन्थस्य समुचितं अनन्दसुलभं लक्ष्यं वयं मन्यामहे।

2. शास्त्रकाव्यम्

सर्वमपि संस्कृतवाङ्मयं द्विधा विभक्तुं शक्यते शास्त्रं काव्यं चेति। उक्तमेतत्काव्यमीमांसाकारेणा "इह हि वाङ्मयमुभयथा। शास्त्रं काव्यं चेति" इति।

प्रथमं तावदयं ग्रन्थः काव्यविभागे भवति वा नवा इति चिन्त्यम्। "कवे कर्म काव्यम्" इति काव्यसमान्यलक्षणम्। "दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधामतम्" इति साहित्यदर्पणकारेण काव्यस्य भेदद्वयं स्वीकृतम्। तत्र दर्शनीयप्रधानं दृश्यम् अथवा नाट्याद्यभिनीयमानं नायकादिचरितं दृश्यम्। ग्रन्थेस्मिन् तन्न दृश्यते। तस्मादयं ग्रन्थः दृश्यविभागे न भवति।

अस्य ग्रन्थस्य श्रव्यकाव्यत्वेनाङ्गीकारोऽपिऽचिन्त्यम्। "श्रव्यं श्रोतव्यमात्रमिति श्रव्यकाव्यलक्षणम्। "गद्यं पद्यं च मिश्रं च तत्रिधैव व्यवस्थितम्" इति काव्यादर्शकारेण श्रव्यकाव्यस्य भेदत्रयं उक्तम्। प्रथमभेदे अस्यान्तर्भावो न सम्भवति। "वृत्तगन्धोज्झितं गद्यं" इति गद्यलक्षण्। ग्रन्थेस्मिन् प्रायेण अनुष्टुप्छन्दः दृश्यते। तस्मादयं ग्रन्थः गद्यं न भवति। "गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते" इति चम्पूलक्षणानुसारं इदं चम्पूविभागे अपि अन्तर्भावयितुं न शक्नोति। तस्मादयं पद्यात्मकमेवेति सुस्पष्टम्।

पद्यमपि त्रिधा विभक्तुं शक्यते - काव्यं, खण्डकाव्यं, महाकाव्यं चेति। "काव्यं विशिष्टशब्दार्थसाहित्यसदलंकृतिः" इति लक्ष्णमास्मिन् ग्रन्थ समन्वेतुं न शक्यते। अत्र विशिष्टशब्दार्थसाहित्यादीनां प्रयोगाभावात्। तस्मादिदं काव्यं न।

अस्य ग्रन्थस्य महाकाव्यत्वेनाङ्गीकारोऽपि न समीचीनः। उक्तं च महाकाव्यलक्षणं साहित्यदर्पणकारेण-

"सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।।
एकवंशभावाः भूपाः कुलजा बहवोऽपि वा।
शृङ्कारवीरशान्तानामेकोऽङ्गी रस इष्यते।।
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।।
चत्वारस्तस्य वर्गा स्युस्तेष्वेकं च फलं भवेत्।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा।।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।।

नातिस्वल्पा नातिदीर्घाः सर्गैः अष्टाधिकाः इह।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।।
सन्ध्या सूर्येन्दुरजनीप्रदोषध्वान्तवासराः।
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः।।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः।
रणप्रयाणोपयममन्त्रपुत्रोदयादयः।।
वर्णनीया यथायोगं साङ्गोपाङ्ग अमी इह।
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा।।
नामास्य सवर्गोपादेयकथया सर्गनाम तु।" इति
"आदौ नमस्क्रियाशीर्वादवस्तुनिर्देश एव वा।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्" इत्यादिलक्षणमत्र समन्वेतुं शक्यते। किन्तु "तत्रैको नायकः सुरः। सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः। एकवंशभवा भूपाः" इत्याद्यनेकानि लक्षणानि अत्र न युज्यन्ते तस्मादयं ग्रन्थः महाकाव्यव्यपदेशं नार्हति।

"खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च" इति खण्डकाव्यस्य लक्षणम्। यत्किचिल्लक्षणहीनं महाकाव्यं खण्डकाव्यमिति विवक्षितम्। यद्यपि खण्डकाव्यस्य कानिचिल्लक्षणानि ग्रन्थेऽस्मिन् विद्यन्ते तथाप्यत्र नायको नास्ति प्रत्येकवंशवर्णना नास्ति इत्यादिना खण्डकाव्यमित्यपि वक्तुं न शक्यते। एवमेवास्य मुक्तककोषसुभाषितादिषु अपि अन्तर्भावो न सम्भवति। अतः असौ काव्यविभागे अन्तर्भावयितुं न शक्नोति। उक्तं च -

"शास्त्रं काव्यविदः प्राहुः सर्वकाव्याङ्गलक्षणम्।
काव्यं विशिष्टशब्दार्थसाहित्यसदलंकृतिः।।
शास्त्रकाव्यं चतुर्वर्गप्रायं सर्वोपदेशकृत्।
भट्टिभौम काव्यादि काव्यशास्त्रं प्रचक्षते।।
शास्त्रं कुर्यात्प्रयत्नेन प्रसन्नार्थाननुष्टुपा।
येन सर्वोपकाराय याति सुस्पष्टसेतुताम्।।" इत्युक्तलक्षणेन ग्रन्थोऽयं

शास्त्रत्वेनावधारणीयम्।

समान्येन शास्त्रग्रन्थानां प्रणयनं विस्तरणं च सूत्र-भाष्य-वृत्ति-टीका-समीक्षादिद्वारा क्रियते। तस्मात् यद्ययं ग्रन्थः शास्त्राभिधानेन स्वीकृतः तर्हि उपर्युक्तेषु शास्त्रविभागेषु भवितुमर्हति। तत्र प्रथमं सूत्रविभागे भवति वा न वा इति चिन्त्यम्। शास्त्रमपि छन्दोमय्या वाण्या वक्तुं शक्यते। वस्तुतया छन्दोबद्धः ऋग्वेदः आदि काव्यत्वेनाङ्गीकृतः। तत्कर्ता ब्रह्मा च "कविर्मनीषी परिभूः स्वयंभूः" इति कविव्यपदेशमाम्नाति। "एकोऽभवन्नलिनात्ततश्च पुलिनात् बल्मीकतश्चापरः" इत्युक्तिरत्र प्रमाणम्। तथापि "शिष्यते येन इति शास्त्रम्" इति व्युत्पत्या कर्तव्याकर्तव्यप्रतिपादकत्वेन विधिनिषेधप्रतिपादकत्वेन च ऋग्वेदादिचतुर्वेदाः शिक्षाकल्पव्याकरणादीनि षडङ्गानि च शास्त्राभिधानेन सुप्रसिद्धानि। एवं दर्शनग्रन्थानामपि शास्त्रपदेन व्यपदेशो युक्तः।

लोकेस्मिन् सारस्वतः प्रयासाः चतुष्प्रकाराः सन्ति-शास्त्रं, काव्यम्, काव्यशास्त्रं शास्त्रकाव्यं चेति।

"अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।

अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।" इति सूत्रलक्षणम्। एतांदृशानि सूत्राण्यस्मिन् ग्रन्थे न दृश्यन्ते। अतोऽयं सूत्रग्रन्थो न। "सूत्रवृत्तिविवेचनपद्धतिः"। सूत्राणामप्यभावात् पद्वतिरिति वक्तुं न शक्यते। "आक्षिप्य भाषणं भाष्यं"। तदपि सूत्रमवलम्ब्यैव भवति। तस्मात् भाष्यमिति वक्तुं नयुज्यनन्ते। एवं च "यथासम्भावार्थस्य टीकनं टीका" "अर्थप्रदर्शनकारिका कारिका" इत्यादिलक्षणात् तेषां" च सूत्रेण सहैव सम्बन्धः इत्यस्मात् कारणात् अयं ग्रन्थः पूर्वोक्तेषु शास्त्रविभागेषु नायाति

अत्र अन्योऽपि विभागोस्ति - प्रकरणम्। "शास्त्रैकदेशप्रक्रिया प्रकरणम्" इति तल्लक्षणम्। अस्य निबन्धने प्रत्येकनियमो नास्ति। अतः तान्यसंख्यानि सन्ति। तस्य चअध्यायसर्गपरिच्छेदादिशब्देन अवान्तरविषयाः विभक्ताः। प्रकरणग्रन्थेषु यस्य कस्यापि प्रत्येकविषयस्य विवरणं दृश्यते। ग्रन्थेस्मिन् प्रत्येकविषयो नास्ति। अत्राद्वैतायुर्वेदादयो बहवो निषयाः प्रतिपादिताः सन्ति। तस्मात्ग्रन्थस्यास्य प्रकरणत्वेन स्वीकारोऽपिऽनोचितः। यद्यपि ग्रन्थोऽयं प्रकरणविभागे न भवति तथापि संज्ञानुसारेणायं नीतिशास्त्रस्य प्रकरणरूपेण स्वीकर्तुं शक्यते। यतः नीतिशास्त्रस्य विभागः भवति

सदाचारः।

नीतिशास्त्रेषु पुण्यपापानां धर्माधर्मयोः च वर्णनं मुख्यतया दृश्यते। मानवान्तःस्थितानां गुणानां प्रकाशनं, दोषाणां च विनाशनं कथं कर्तुं शक्यते इत्येतदेवात्र प्रतिपाद्यो विषयः। "लोकाः समस्ताः सुखिनो भवन्तु" इत्यादि वाक्येन जनानां सुखजीवितमेव शमिति नीतिशास्त्रस्योद्देशः ज्ञातुं शक्यते तदर्थं पुण्यानामुत्कर्षत्वं पापानामपकर्षत्वं च प्रतिपादितव्यम्। किन्तु ग्रन्थकर्ता अयमात्मानमधिकृत्य किंचिदुक्तवान् न तु लोकव्यवहारमधिकृत्य। स च नीतिशास्त्रं सजीवं शरीरमधिकृत्य व्यख्यातवान्। तस्मान्नीतिशास्त्रादपि किंचिद्भिन्नोऽयं ग्रन्थः। अत्र तु शरीरं, आत्मा, आचारः इत्यादिविषयः प्रतिपादितः। न च पुण्यपापयोः धर्माधर्मयोः विवरण् कृतम्। अतोऽयं ग्रन्थः न शुद्धप्रकरणं, न च केवलनीतिशास्त्रप्रतिपादकः। एवमसौ ग्रन्थः नीतिशास्त्रस्य प्रकरणत्वेन स्वीकरणीयः इत्यहं मन्ये।

3. मङ्गलाचरणम्

सदाचारवृत्तिवर्तने एकैकस्मिन्नप्यध्याये मङ्गलाचरणमनुष्ठितं दृश्यते।

'धीविज्ञानीयम्' इति आदावेव निर्दिष्टं पदं ईश्वरस्तुतिपरमिति व्याख्येयम्। धिया विज्ञातव्यः परमपुरुषः ईश्वर एव भवितुमर्हति। अनेन प्रयोगेण कविः हृदये पुरुषोत्तमं आराधयतीत्यवगम्यते। प्रथमाध्याये गोपतिं वन्दमानः कविः कं देवं मनसा चिन्तयतीति कौतुकं सहृदयानां भवत्येव। एकस्मिन्नेव समये गोपतिः, वाक्पतिः, ब्रह्मा वेदपति विष्णुः वृषभवाहनः शिवः वाचस्पतिः गुरुः इत्यादिकान् अर्थान् आवहति श्लेषरीत्या इति पण्डिताः जानन्त्येव। ईदृशस्य विनिवेशेनैव कवेरस्य विषयावतरणे कौशलं कियदिति ज्ञातुं वयं शक्नुमः। "निर्मत्सराः सतां श्रेष्ठाः ते सन्तु हृदये मम" इति द्वितीयाध्याये विद्यमानं मङ्गलं सज्जनस्तुतिपरं हृदयंगममेवेति निर्मत्सराः संवदेयुः। काश्यपं मुनिवन्दनं स्वीयं काश्यपगोत्रसूचकमिति अपि मन्यामहे। अनन्तराध्याये च कर्मज्ञानमयं वेदं वन्दमानः कविः स्थावरान् जङ्गमान् च नमस्कुर्वाणः फलपाकान्तमोषधिं च शरणं प्रपन्नः "हृदयं मम जानीयात् वीणापुस्तकधारिणीम्" इति प्रार्थनं करोति। अष्टाङ्गहृदये सुविशदं प्रतिपादितमष्टमुर्तिस्वरूपं देवं प्रति

कविकृतः प्रणामः विषयाभिमुखमौचित्यं द्योतयति। "नानारूपं मनोगम्यं चिन्मयं प्रणवात्मकम्" अनुसन्दधानः वर्णाश्रमधर्मानपि स्तुवन् ग्रन्थकारः पूज्यं पितरं पितामहं च नमस्करोति तुरीयाध्याये। "मायाश्च धवतां प्राप्तो माधवः पार्वतीपतिः", "ह्रीङ्कारः पुत्रभार्याभ्यां ईमित्यवैमि ताम्" इत्यादयो पञ्चमाध्यायपद्यभागाः तन्त्रमन्त्रशास्त्रगन्धं किं नावहन्ति। "नारायणं जटाधरमात्मदं पितृसंज्ञितम्" इति पितरमेव षष्ठाध्याये वन्दते ग्रन्थकारः। असत्प्रसङ्गनामके सप्तमाध्याये"

अज्ञानिभ्यो मनस्तेभ्यो तत्पृष्ठेश्वरसंश्रयात्।

इति वन्दनश्लोकः कवेः वामाचारपरिचयं प्रकाशयति। अष्टमे अध्याये दोषधातुमलात्मकं शरीरं पवित्रतां साधयितुं अभिलषतीत्येतत् नितरां समञ्जसं भाति। नवमाध्याये सहृदयसन्तापहारिणः सज्जनानभिवन्द्य एष कविः मृत्युञ्जयमाराधयतीति उचितमेवैतत्।

"अव्यक्तं त्रिगुणातीतं विकारं यत्र बिम्बितम्।

शुद्धस्फटिकसङ्काशं परः पश्यति चाव्ययम्।।" इत्येवं भवति दशमाध्यायस्य मङ्गलम्। सत्स्तोत्रनामके एकादशाध्याये कुलविद्यां भार्यात्वेन विचार्य बोधरूपं पुत्रं च मनसि विचिन्त्य विवेकरूपेण मित्रेण परिपुष्ट एष आर्यशर्मा जयतीति आत्माराधने स्वस्य अर्हतां समर्थयति। अमर्त्यविधाने द्वादशाध्याये सर्वेषां धर्माः चन्द्रबिम्बवत्समेधतामित्याशंसां कुरुते। अक्षरसमाम्नास्वरूपं व्याकरणपुरुषं पार्वतीवल्लभं ईशानदेवं त्रयोदशाध्याये एष कविः नौति। नित्यशारीरप्रतिपादननामके चतुर्दशाध्याये "द्वैतो जीव इति ख्यातः तमेवार्यः प्रशंसति" इति पद्यभागमेवोद्धरिष्यामः उदाहरणार्थम्। अनर्थपरिहार इति पंचदशाध्यायस्य नाम यत्र सतां संस्मरणादेष आयुष्मान् भविष्यति इति स्वीयां धन्यतामावेदयति ग्रन्थकर्ता। अज्ञानप्रकाशके षोडशाध्याये वैद्यरूपप्रशंसात्मके,

"यस्मादिदं समुद्भूतं तत्सत्यं केवलं त्विदम्" ब्रह्म एव परमं सत्यं इति कविः भक्तिनिर्भर सन् अभिवन्दते। "जन्माद्यस्य यतः" इति वेदान्तसूत्रलक्षिते परं ब्रह्म एवात्र स्मरन् उपसंहरति स्वीयां मङ्गलपरम्परामेषार्यशर्मा।

4. आशयवैशिष्ट्यम्

सदाचारवृत्तिवर्तने अनेकेषां शास्त्राणांमनेकेषां विषयाणामुल्लेखः दृश्यते। तेषामुल्लेखनं च न प्रत्येकया रीत्या कृतम्। विषयाणां क्रमीकरणे अत्र कापि क्लृप्ता व्यवस्था न कृता। तथापि ग्रन्थकारस्य विविधेषु शास्त्रेषु परिज्ञानमत्र ग्रन्थे आमूलाग्रं परिलसति। आनात्मनिरसननामके द्वितीयाध्याये विद्यमाना कल्पनैवास्योत्तममुदाहरणम्। अत्र तु प्रतिबिम्बवाद शून्यवादं इत्यादीनां प्रतिपादनं कृतम्। ततः अद्वैतवादिभिः स्वीकृतस्य मुख्यार्थस्य गौणार्थस्य च प्रत्यक्षस्य परोक्षस्य च परामर्शं कृत्वा परोक्षवादत्वेन वेदानुपस्थापयति ग्रन्थकारः। प्रत्यक्षवादश्च अनृतः ऐन्द्रियः वेद इत्युक्त्वा नवीनः कश्चन आशयः प्रतिपाद्यते। आर्यशर्मणा तस्य प्रत्यक्षवादस्य पंचमवेदत्वेन प्रतिपादनमपि कविना क्रियते।

एवमेव प्रत्यगात्मप्रबोधकथननामके चतुर्थाध्याये सत्यप्रमाणभूतेन वेदेनैव प्रत्यक्स्वरूपं नित्यसत्यं सद्वस्तुभूतमीश्वरं प्रकाशयितुं प्रभवतीति कविना प्रपंचितम्। कर्म ज्ञानमयो वेद यागादिकर्मणा स्वर्गलाभेऽपि तस्यानित्यत्वात् दुःखमेव स्यात्। जडरूपे स्थितः अहं पदार्थः तिरस्कृतचैतन्यवान् विलसति यथा समुद्रजलस्य अधोभागे उष्णरूपी बडवानलः लीनः वर्तते। विधिनिषेधेनैव नित्यसत्यं प्रकाश्यते। गुणाः एव नित्यसत्यं, कार्याणि च गुणतो भवेत्। असत् गुणी भवेत्। यथा वा आत्मा सत्यं आत्मवान् तु देहरूपसद्भावादसत्यं स्यात्। वातपित्तकफैः दूषितं शरीरमेवात्मवानिति बोध्यम्। आत्मकार्यप्रकाशकः वैद्य इत्यनेन वचनेन नूतनः कोऽपि आशयः चित्तरंजकः उद्घाटितो दृश्यते ग्रन्थकारेण।

पंचमे अध्याये पार्वतीशंकरयोरीश्वरमायारूपेण वर्णनं कृतम्। अत्र पार्वतीसम्पर्केण महादेवस्य वास्तविकं सद्रूपमुपवर्णितम्। मा इति शब्दः लक्ष्मीं मायां च श्लेषभावेन बोधयति। एवं माधवः लक्ष्मीवल्लभः तथा मायाविशिष्टः इत्यर्थद्वयं भजते।

यथा लोके भेदव्यवहारः तथा माया चेश्वरश्चेति जीवत्मपरमात्मा चेति द्वैतकल्पना लोके शास्त्रे च जागर्ति। यथा एक एव माधवशब्दः स्त्रीलिंगविशिष्टे मायार्थबोधकः पुल्लिंगविशिष्टे सति सद्रूपार्थबोधकः भवति तथैवैकमेव ब्रह्म मायावच्छिन्नं

सत् जगद्रूपेण विविर्तते इत्यद्वैततत्वं भग्यन्तरेणाप्रतिपादयति कवि-। ग्रन्थकारोऽयं वैद्य सन्नपि शुष्कमपि शास्त्रं सरसमापादयितुं साहितीसहायमवलम्बते।

षष्ठाध्याये जीवस्य शरीरस्य च परस्परबन्धं नूतनसरण्यां निरूपयति कविः। सुखसाधकमिदं शरीरं स्वर्गसदृशं मन्यन्ते मानवाः। व्याधिग्रस्तोऽपि स्वीयं शरीरं नाशयितुं कोपि नैवेच्छति। अन्नपानीयादिविशिष्टभोज्येन शरीरस्यारधानं कुर्वन्ति पामरा। काञ्चिग्रैवेयहाराङ्गदकिरीटकुण्डलैः शरिरस्य शोभां वर्धयन्ति अलंकारतत्पराः सामान्यजनाः। शरीरात् जीवस्य बहिर्गमने इदमेव शिवरूपं शवमेव भवति। एवमवस्थाभेदेन शरीरमेव शिवं शरीरमेव शवमिति विचारकुशलाः सम्यक् जानन्त्येव। जीवस्य सान्निध्ये शिवमसान्निध्ये च शवमिति भावः।

षष्ठाध्याये भूतभव्यसुखदुःखलयोदयभावाभावश्चेति अष्टाङ्गानि प्रतिपादितानि सन्ति। एतादृशाः अष्टाङ्गविभागाः अन्यत्र ग्रन्थेष्वधिकतया न दृश्यन्ते। भूतवर्तमानभाविरूपकत्रये अतीतं भूतं मिथ्या इवाभाति।

"गतं गतं सर्वमुपेक्षणीयमायातमायातपेक्षणीयम्" इति सूक्तमपि इममेवाशयं प्रकाशयति। वर्तमानकालीनानुभूतिरेव जीवस्य दृष्टिगोचर इति तस्यैव प्राधान्यं ग्रन्थकारेणोपपाद्यते। एवमेव भावस्याभावस्य च मध्यगतो यो भवः संसाररूपः तत्रैव जीवस्य व्यक्ततां स्फुटीकरोति। गीतायामपि -

"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।

अव्यक्तनिधानान्येव तत्र का परिदेवना।।" इति अयमेवाशयः स्पुटितः।

सप्तमे अध्याये सदसतोः सदाचारदुराचारयोः आस्तिकानां नास्तिकानां च कारणभूतः अहंपदार्थः यद्यपि सगुण इवाभाति तथापि निर्गुण एवेति निर्धारयति। तस्य समर्थनायायुर्वेदेनाङ्गीकृतस्य वातकफपित्तरूपदोषत्रयस्य सात्विकाराजसतामसरूपगुणत्रयस्य चाश्रयाश्रयीभावः प्रकल्पितः। यथा अरूपोग्निः इन्धनस्याश्रयेण सरूपः प्रकाशते तथा सत्वरजस्तमोरूपं गुणत्रयमपि दोषत्रयद्वारा स्थूलरूपं प्राप्य देहे गोचरीभवन्ति। निर्गुणोप्यात्मा दोषत्रयभूतं स्थूलशरीरं प्राप्य सगुणः सन् विराजते। शरीरस्थितस्यात्मनः अहं सुखी अहं दुःखीत्यादिबोधः देहाध्यासवशाज्जायते। इत्थमात्मनः निर्गुणत्वं आयुर्वेदरीत्याप्युपपन्नमिति ग्रन्थकर्तुराशय। इदं शरीरमेव परब्रह्मवाचकं प्रणवस्वरूपमिति उदात्तोपासानाहष्टिः नवमे अध्याये

ग्रन्थकारेणोद्घाटिता दृश्यते। अकार-उकार-मकार रूपस्य प्रणवस्य तु परमात्मनः सह सम्बन्धः शास्त्रान्तरेषु सुलभः। अत्र तु प्र इत्युपसर्गः पुरातनवाची। नवशब्दः नूतनार्थं द्योतयति। एवं परा च नवं चेति नित्यनूतनमित्यर्थे पर्यवस्यति प्रणवशब्दः। क्षणं प्रतिनवत्वात्प्रणव इति व्युत्पत्तिं ग्रन्थकारः आविष्करोति। अत्र 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः' इति अलंकारशात्रवचनं स्मृतिपथमारोहति। एतादृशः नित्यनूतनभावः एव प्रणवस्यपि रमणीयताहेतुः इत्येवं भवति कविहृदयम्। स्त्रीषु यादृशी वश्यता युवजनचमत्कारकारिणी सा एव लौकिकदृष्ट्या प्रणवस्यापि आकर्षणीयतां उपपादयति। पुरुषाणां स्त्रीषु आसक्तिरिव सज्जनानां अतीव कौतुकं जायमानं हश्यते। आयुर्वेदः लौकिकशास्त्रं सत् प्रणवे ईदृशं वाह्यभावं द्रष्टुं उत्सहते। एतदेव तत्वं प्रकारान्तरेण सुश्रुतेनापि प्रसाधितं मन्यामहे वयम्। मूलाधारस्थितः एष प्रणवः शरीरस्य आरोग्यस्थानमलंकरोति।

अपरं च नव पदस्य स्तुतिरित्यर्थोपि विद्यते। "नूयते स्तूयते इति नवः" इत्यत्र व्युत्पत्तिः। स्तूतिवचनं कस्य वा वनितायाः हृदयं न वशीकरोति। एवं प्रणवमपि सज्जनानां आनन्ददायि परिलसति। प्रशंसा। स्त्रीहृदयमिव योगिहृदयविकासकारि भवति प्रणवम्।।

स्तयते गर्भः अस्यामिति स्त्री। एवं लक्षणया स्त्रीपदस्य जन्म इत्यर्थोपि लभ्यते। जन्मविषये प्रियः स्त्रीप्रियः। इत्थं जीवस्य सुखदायको भवति प्रणवः इत्यायाति। भौतिकसत्तामपहाय केवलमात्मीयतामात्रभावेन जीवस्य न सुखं सम्पन्नं भविष्यति इति।

आयुर्वेदलोके वाग्भटस्यैव महति प्रशस्तिः अन्येषं चिकित्साशास्त्रकारणां नासीत् इति विषये नैव विसंवादः। अष्टाङ्गहृदयकारस्य वाग्भटस्य प्राकृतभाषायां वाहट इति उच्चारणं दृश्यते। अत्र ग्रन्थकारस्तु स्वकपोलकल्पितमाशयं विवृण्वानः वाहेन वृषभेण अटति य स वाहटः इति अर्थस्य शिवपरत्वेन उपपत्तिं साधयितुं इच्छति। एवं च परमशिवः "भिषक् तमं त्वां भिषजा श्रणोमि" इति श्रुत्या विद्यानाथोऽपि ईशानदेवः वैद्यनाथ इति वैदिकैः प्रकल्पितः प्रस्तूयते। आयुर्वेदे शाल्यशालक्याद्यष्टाङ्गानि प्रसिद्धानि। अत्र तु भूमि जल - तेजो वाय्वाकाशमनोवृद्धिरहंकाराः इति अष्टाङ्गानि उपकल्पयन् कविहृदयं रमणीयतां द्योतयति।

गोपदस्य धेनुः ऋषभः, भूमि, वाक् वेदः इति अनेके अर्थाः सम्भवन्ति। गां विन्दते इति गोविन्द शब्दस्य वेदपुरुषः इत्यर्थः प्रसिद्ध। अनया रीत्या गोवाहक पदस्य वेदागमसंचारी इति अर्थोपि सम्पन्नो भवति। एवं च वेदार्थवाहकः ईशानदेवः वेदान्तशास्त्र लक्षितः परमपुरुष एवेति इदं रहस्यं अत्र सूचयति ग्रन्थकारः।

पत्नीव कूलविद्या गृहनाथमानन्दयति। तदुत्पन्नः बोधः सूतमुखदर्शनेनैव हृदयमानन्दभासितमातनोति। अत्र वेदान्ति इव विरागि सन् हस्ते कपालमादाय सन्यासीव भिक्षामटति महेश्वरः इति वेदान्तिनां वैराग्यजीवितं परमशिवेपि उदभावयति वैद्यकविः।

यद्यपि आत्मीयतायाः नातिप्रसक्तिः आयुर्वेदे अस्ति नानाशास्त्रेषु नितरां कुशलः एष ग्रन्थकारः आयुर्वेददृष्ट्या वेदान्ततत्वं निर्धारयितुं उत्सहते। वेदान्ते मूलभूतस्य प्रणवस्य आयुर्वेदे साधनभूतस्य शरीरस्य च सादृश्यं प्रतिपादयति द्वादशाध्याये। नित्यनूतनमिति प्रणवस्य अर्थः सर्वैरङीकृतः। बाल्यकौमारयौवनादिभिः शरीरस्य पूर्वाननुभूतं नवत्वमायाति। एषणाक्रियामवलम्ब्य परमात्मा जगद्रूपेण परिवर्तते इति तत्वं अत्र ग्रन्थे पितृपुत्ररूपेण उपपादितं दृश्यते। एवं अरूपी आत्मा शरीरं प्राप्य सरूपः सन् प्रकाशते इति शरीरस्य प्राधन्यं अनेन प्रदर्शितम्। पदार्थनां यथायोगेन आरोग्यं अयथायोगेन रोगश्च सम्भवतीती तत्वं प्रकाशयितुं जीवात्मापरमात्मनोः अन्योन्यभावं निर्धारयति पण्डितोऽयं ग्रन्थकारः। विविधविकारविक्षेभेण तीक्ष्णस्वभवः जीवात्मा। एवं निर्विकारभावापन्नः शान्तोयं परमात्मा। इदमपि अत्र बोध्यम् "चलनात्मकं कर्म। एतत् चलनंम् तेजसा निष्पन्नं भवति। एवं चलनवेगेन तैक्ष्ण्यं जीवेन अनुभूयते। ज्ञानगम्यो परमात्मा अतिशीतसुखरूपी। विरुद्धगुणकोटिगतयोः जीवात्म-परमात्मनोः एकत्र समन्वयः दुरूपपन्नः इवाभाति। यथा शीतत्वस्य उष्णत्वस्य च साम्ये सौख्यं स्यात् तथा द्रव्यगुणकर्मणां सम्यक् योगेन अरोगता इति इदं शास्त्ररहस्यं अत्र आविष्कृतं ग्रन्थकृता।

अपरं च। अग्निभूतात् जलस्य उत्पत्तिः शास्त्रेषु उपवर्णिता। एतदेव जलं अग्निशमन्यपि भवति। एतदेव जलं वायुना परिशुष्यति च। विरुद्धधर्माणां एतेषं योगेन वैरुद्धयमेव प्रकटितं भवति। सम्भवति च मरणं विकाराणां अति विजृम्भणेन।

तस्मात् इदं मानवजीवितं नातिसुखाय नापि वा अत्यन्तदुखाय प्रकल्पते इति मौलिकं तत्वं अत्र आविष्कृतम् । केवलज्ञानेन, केवल कर्मणा वा सुखप्राप्तिः न स्यात्। ज्ञानानुरूपं सत् कर्म एव जीवस्य सुखनिदानं भवति। एवं जीवाधारभूतमिदं शरीरं अन्ने परिपुष्टं सत् व्यायामेन सन्तुलितां अवस्थां प्राप्नोति इति भणिति वैचित्र्येण बोधयति निपुणोयं वैद्यकः।

पुनश्च व्याकरणरीत्यापि अद्वैतवादं पुरस्करोति ग्रन्थकारः। अविभक्तः सच्चिदान्दार्थप्रतिपादकः अहं पदार्थः व्यक्तिप्रबोधकः। अस्मद् शब्दस्य प्रथमैकवचनं रूपं अहं इति पदम्। एवं एक एव अहं पदार्थः अविभक्तः सत् परमात्मारूपेण भासते इति तत्वं अत्र निर्धारितम्।

अपि च। वेत्ता-वेदः-वेद्यः इत्येवं रूपेण बिन्दु-नाद-बीजानां या कल्पना अत्र ग्रन्थे कृता सा वैद्यकस्य तन्त्रशास्त्रेपि अवगाहं बोधयति। तेषां च सत्व-रजस्तमोगुणरूपेण पुनः अभिसन्धानं कृत्वा वेद्यरूपे बीजभूते महेश्वरे एव सर्वेषां विलयः इति कविहृदयम्।

पुनश्च विषय-विषयीरूपेण जीवात्म-परमात्मनोः कल्पनां कृत्वा प्रतिबिम्बवादः उद्घाटितः। प्रकृति-पुरुषयोः संयोगेनैव जगदुत्पत्तिः इति तत्वस्य प्रतीकत्वेन पार्वतीपरमेश्वरयोः दाम्पत्यमुपवर्णितम्। एवं विचित्रेण प्रकारेण नानामुखेन शास्त्रेण च वेदान्तविषयः कयापि नूतनया सरण्या वैद्येनानेन जनयोगक्षेमाय प्रकाशितः।

जीवः ईश्वरः इति द्वैतभावः अवश्यं स्वीकृतः। अनेन ग्रन्थकारेणापि द्वैतभावे प्रतिपत्तिः प्रदर्शिता दृश्यते। परब्रह्म भवति यदपेक्षया एते चतुर्दशलोकः परमाणुकल्पाः भवन्ति। अतिसूक्ष्मत्वात् परमात्मापि परमाणुसंज्ञां भजते। चतुर्दशालोकानां चतुर्दशविद्यया सह सम्बन्धः अस्तीति कश्चन नूतनः आशयः ग्रन्थे सूचितः विद्यते। ग्रन्थकारोऽयं स्वयं जीवन्मुक्तो बभूव इति अभिमानि सत् एष आर्यशर्म इतरमर्तेभ्योपि जीवन्मुक्तिप्रदानाय प्रयत्नमातनुते। जीवत्वं विहाय अविकारितां प्राप्य स्वयं स्थावरः इति आत्मानं विशिनष्टि च। संसाररूपे अन्धकूपे पतितानां मानवानां नयनप्रकाशदानाय स्वयं नेत्रचिकित्सकः इति अभिमानमावहति एषः। सामान्य जनानां धर्मार्थादि पुरुशषार्थाः न सुलभाः इति अनुकम्पया ज्ञानरूपी एष वैद्य तेषु ज्ञानप्रकाशाय दृढप्रतिज्ञो भवति

च। किंच व्यवस्थितार्थानां पदानां स्वतन्त्रेण अर्थकल्पने निरंकुशो दृश्यते एष ग्रन्थकर्ता। अर्थव्यतियानमापाद्य वेदवेद्यः इत्यर्थं आसादयितुमापि उत्सूकोयम्।

अपरं च। कलिकालः मोक्षप्रदायकः इति सत्यं ग्रन्थेऽस्मिन् भंग्यन्तरेण सूचितम्।

कालं विना कस्यापि जीवस्य वर्तनं न स्यात्। अनुचिते काले तु आधि-व्याधि-जरावलेशः पीडितः जीवः नाशं प्राप्नोति। कलियुगे कृतयुगापेक्षया मोक्षरूपं पुरुषार्थं साधायतीति अस्य अभिप्रायः।

जीवः प्रत्यक्षः परोक्ष इति द्वेधा विभाजनमर्हति। बहुमुखव्यापारः सन् सः प्रत्यक्षरूपः इत्युच्यते। अन्तर्मुखव्यापारः सन् जीवः परोक्षः इत्यापि वक्तुं शक्यते। स एव जीवन्मुक्तपदेन अभिधीयते। प्रत्यक्षजीवः विषय भोगेषु लालसः सन् जनन-मरणरूप संसारीभुत्वा दुःखभाक् भवति।

भारतेषु सर्वत्र जनवर्गेषु कुलधर्माभिमानं नितरां दृढतया दृश्यते। अत्र कुटुम्ब धर्मः चिकित्सारूपेण दीनजनसेवनमेवेति आर्यशर्म अभिमन्यते। कुलविद्यामपहाय अन्यविषयेषु श्रद्धादाने चिकित्सायाः नैपुण्यहानिः सम्भवेत्। सुखमङ्लार्थे प्रतिष्ठितः आर्यशब्दः। शर्म पदं च शं सुखं प्रददाति इत्यर्थे। एवं सत् वैद्योपि एष वेदज्ञ इत्यर्थोपि अत संपन्नः इति श्लेषभङ्ग्या अनेन समर्थ्यते।

अन्यत् च। नामदीक्षा एवं वृत्तिः इति कविना उक्तम्। दीक्षा इति पदस्यापि दिक्षु ईक्षा इति विशेषार्थः अनेन प्रकल्पितः। सकलेष्वपि वस्तुषु आत्मच्छाया दर्शनमेव जीवन्मुक्तिसाधनं भक्ति। वैद्यजीवितस्यापि प्रशस्त्याः उपवर्णने स्वयं विजृम्भितो भवति एष वैद्यः। परमवैद्यः धन्वन्तरिः एव पुरुषार्थप्रदः इत्यपि बोधः प्रसाधितः। पुण्यपापबद्धः जीवात्मा अशुभः गुणनिर्मुक्तः। परमात्मा परमशुभः इत्यपि बोधव्यः। एवं अशुभकालरूपी जीवः तपसा पुण्यकर्मणा च पापविमुक्तः सन् शुभकालरूपं परमात्मानँ सम्पद्यते इत्याशयोपि अत्र प्रकाशते। एवं बद्धाबद्धरूपेण आत्मनः त्रैविध्यं त्रिभिः प्रकारे ग्रन्थकारेण सृष्टु उपपादितं दृश्यते। यः पुरुषः सर्वत्र शुभं पश्यति स एव जीवन्मुक्तः। स्वयमपि आत्मानं जीवन्मुक्तस्वरूपं आकलयति वैद्यविद्याविशारदोयं आर्यशर्म।

अपूर्वं किमपि परमात्मनिरूपणं दृश्यते चतुर्दशाध्याये। कालस्य जीवस्य वेदस्य च मूलभूतः परमात्मा इति वितनुते वैद्यः। ज्यायान् कनीयान् इत्यादि व्यवहारस्य च निदानं महाकालः एव। कनिष्ठः जीवः ज्येष्ठः परमात्मा इति तत्वं विस्तारयितुं एष निर्देशः अत्र उपात्तः। उदयो नाम सृष्टिविकारः कालपराधीनो वर्तते। एवं सृष्टि उपसंहाररूप प्रलयोऽपि निद्रामुद्रां स्वीकृत्य महाकालस्य सूक्ष्मप्रयोगेण समनन्तरे काले विलयं प्राप्नोति। अनया रीत्या कालोऽपि अपूर्ववैद्यपदवीं आरोहति।

संसारी जीवः सम्राट् इति व्यवहारमर्हति। पुण्यो जीवः विराट् भावं च आवहति। पापपुण्येभ्यो विनिर्मुक्तः जीवः परात्परो भूत्वो स्वराट् पदं च अलंकरोति। सूर्यप्रकाशेन बाह्यवस्तुनामवलम्बनमिव ध्यानप्रकाशेन कालकृतमायाप्रपञ्चस्यापि बोधः संजायते इत्याशयः कविना प्रकाशित-।

पुनरपि अनेन कविना परमात्मा माता, कालस्तु लोकः, वशी च शिवः इति या कल्पना समारचिता सा नूतना इवाभाति। अत्र मातृपदस्य मानरूपं अर्थ प्रकल्प्य माता इत्यनेन प्रमाता इत्यर्थः अपि उपपादनीयः भवति। निर्गुणोप्येष आत्मा शरीरपरिग्रहेण सगुण एव भवति किल। केवलैः पञ्चभूतैः निर्मितं इदमपि शरीरं भोगायतनं सद्धर्मसाधनं च सत् उत्तमत्वेन प्रकीर्त्यते। एवं शरीरे नित्यत्व दृष्टिः वैद्यकेनानेन आरोपिता एवेति मन्यामहे। "कालदोषहरं पथ्यं आधिव्याधिनिबर्हणम्" इति चतुर्दशाध्यायस्य अन्तिमं पद्यमेव पूर्वोक्ताशयस्य सत्यं साधयितुं प्रमाणत्वेन उपन्यस्तम्। लोकेषु शास्त्रेषु च नश्वरमिति प्रकीर्तितं इदं शरीरम्। आरोग्यस्य संवहनेन पुण्यकर्मणा तपसा योगचर्यया च दीर्घकालवर्ति इत्येतावता नित्यत्वव्यवहारः शरीरेत्यास्तां विस्तरः।

बिन्दु नाद बीजानां तत्वमवलम्ब्य तन्त्रशात्रानुसारमपि शरीरस्य प्राधान्यं प्रदर्शय़ति ग्रन्थकारः।

"चित्रं बिन्दुरिति ज्ञेयं शब्दो नाद उदाहृतः।
बीजं शरीरमेवात्र नानातत्व विचिन्तने
संसारबीजं चित्तं स्यात् मोक्ष बीजं कलेबरम्।।"

इत्यादिना। यो शब्दः तन्त्रशास्त्रे उक्तः स शब्दः संसारबीजस्य चित्रस्य मोक्षबीजस्य शरीरस्य च परस्परबन्धं प्रदर्शयति। तेनैव उदात्त शब्देन आत्मोदयः अनुदात्तशब्देन

आत्मलयश्च निवेदित-। मन्त्रशास्त्ररीत्या इदं शरीरमेव सम्यक् वर्तनत्वात् मोक्षदायकं असम्यक् वर्तनत्वात् दुःखदायकमिति तत्वं अत्र स्फुटं भवति। अन्नेन न्ययामेन च यथायोगेन शरीरस्य सम्यक् परिपालनं कर्तव्यमित्याशयः अत्र स्पष्टीकृतः।

स्वकीयविज्ञानप्रकाशोत्सुकः आर्य शर्मा वेदान्ततत्वानि प्रतिपादयितुं व्याकरणशास्त्रमपि अवलम्बते। पञ्चदशाध्याये आत्मनः भोक्तृत्वभावं वक्तुं "अदभक्षण इत्यस्माद् निषेधोमेत्युदाहृतः" इति प्रयुज्यते। अदभक्षण इत्यनेन आत्मनः कत्रृत्वं बोध्यम्। तस्य निषेधे च आत्मनः कत्रृत्वं न सङ्घटते इत्यपि बोध्यम्।

अन्यत् च।

"अभूत् परमहंसत्वं परमात्मा निरावृतः।

हिरण्याण्डसमुद्भूतहंसः पक्षद्वयाश्रयः।।

स्वेछारूपेण चरति दशदिक्षु निरावृतः।" इति पद्यभाग ग्रन्थकारस्य युक्त्यधिष्ठितां। कमनीयां काव्यभावनां प्रकाशयति। अत्र हंसपदं परमात्मानं व्यनक्ति। जीवात्मापरमात्मारूपपक्षद्वययुक्तः परात्पपरः निरावृतः स्वतन्त्रः सन् चिदाकाशे विराजते इति व्यङ्ग्यरूपोर्थोऽपि सहृदयान् रञ्जयति। "परमहंसत्व" मित्यत्रः अहं स इति पदद्वयस्य विपर्यास विन्यासेन हंस इति पदं उद्भावितम्। तथा च जीवात्मापरमात्मनोः अद्वैतरूपं परमं ऐक्यम्। तस्य प्रतीकं भवति हंसः। कैलासोपरि मानससरोवरे विराजमानो हंसः सामान्यतया अभिधेयार्थः। स्थानात् स्थानान्तरं स्वातन्त्र्येण गन्तुं दिव्या शक्तिः हंसस्य अस्तीति व्यक्तमेव। अनेन च अहंकारयुक्तो जीवात्मा निरहंकार सन् हंस इव परमानन्दपदाय योग्यो भवतीत्याशयः चमत्कारेणात्राविष्कृतः।

पुनश्च एष परमात्मा कालरूपं मायारूपं चेति पक्षद्वयमाश्रित्य एषणाक्रियामवलम्ब्य च अरूपि अपि सरूपीव सर्वत्र विराजते। वैद्यशास्त्रदृष्ट्या शरीरस्य प्राधान्यं सर्वसम्मदमेव। एतदेव शरीरं मोक्षोपकरणं परोपकारसाधकम् पुण्यस्य निदानं पापकर्मनिमित्तमिति विविधया दृष्ट्या अर्थवादरीत्या च वर्णयति वैद्यविशारदोयं ग्रन्थकारः। पूर्वपुण्यानां ज्ञापकं इदं शरीरं स्वस्य परेषां च आनन्ददायकं भवितुं युक्तम्। भतृहरिरपि "यस्याङ्गे अखिललोकवल्लभतमम् शीलं समुन्मीलति स पुरुषः वरेण्यः" इति वर्णितवान्।

येषु उत्तमं ज्ञानं विलसति ते विद्वज्जनाः सन्तः लोकानुग्रहाय कल्पन्ते। तेषां सान्निध्यं अज्ञानान्धकारं विनाशयति। सत्यमिति, मिथ्येति च विवेचनं पुण्यपुरुषाणां सम्पर्केण उपजायते। अनर्थहेतुकः स्थलजलभ्रमः इव अत्र प्रकारान्तरेण प्रदर्शयति कविः। वेदान्तशास्त्रे प्रसिद्धः रज्जुसर्प दृष्टान्तः। तमाश्रित्य अस्य लोकस्य असत्यतां आवेदयति स।

विद्या अविद्येति द्वेधाशक्तिः वेदान्ते उपपाद्यते। प्रकाशरूपिणी सरस्वती एव भवति विद्या। अविद्या च कुलटारूपिणी अनर्थकारिणी पुरुषंपातयति। प्रातिभासिकं व्यावहारिकं पारमार्थिकं इति सत्तात्रयमपि अत्र लोकवस्तुषु तारतम्यरीत्या प्रतिबिम्बितमिति विशदयति आर्यशर्म।

"शङ्करश्च शरीरश्च व्रजेतन्योन्यभोक्तृताम्" इति पद्ये वेदान्तसिद्धं अन्योन्याध्यासं वैद्यः उपदर्शयति। तमोमयमिदं शरीरं आहारगुणेन शुद्धेनाचरेण गुरुप्रसादेन ईश्वारानुग्रहेण च रजोगुणं तिरस्कृत्य निभृतं सत्वगुणसम्पन्नं भविष्यति। शं नित्यसुखं करोतीति शङ्करः एव परमपुरुषार्थः। पूर्वपितृणामनुग्रहेण कुलदेवतायाः प्रसादेन च एषार्यशर्मा दीनजनानां परिचारकः सन् परमपुरुषार्थलाभाय योग्यपुरुषो भवतीति स्वीयाभिलाषान् निवेदयन् शान्तो भूत्वा विरमति च।

सप्तदशाध्याये वेद एव कर्मस्वरूपं इत्याशयः वैद्येन पुरस्कृतः। विधिनिषेधाभ्यामेव वेदवाक्यस्य प्रामाण्यम्। अन्यथा तदप्रामाण्यं स्यादिति मीमांसतत्वमत्रोद्भाव्यते। "पंचत्वं पूर्वसंस्थानम्" इति पद्यभागेन शरीरस्य मृत्युपराधीनता सहजा इति सूचिता। प्रकृतिः मरणमुच्यते, विकृतिर्जीवितं चेति सुभाषिततत्वमत्रानुसन्धेयम्। भूतं वर्तमानं भावीति कालविभागाः परमात्मनः महाविभूतिरिति कविः मन्यते। हेतुकार्यसम्बन्धः मायाकल्पित इति केचित्। कार्यकारणभावः मिथ्या इत्यन्ये। एष कार्यकारणभावः ईश्वरस्य सहजः स्वभाव इति कल्पयन्त्यन्ये जनाः। एवं च पण्डिताः मायेति अविद्येति अज्ञानमिति ईश्वर इति साक्षीति चैतन्यमिति बहुधाभावेन इदं परमं सत्यं स्वकपोलकल्पितमिव वर्णयन्ति।

5. उपसंहार

कवेः कर्म काव्यमित्युच्यते। भावनारूपा तृतीया दृष्टिः यस्य स एव

ऋषिरितयुच्यते। "नात्रऋषिः कविः" इति सूक्तस्यापि अयमेवाशयः। "वाक्यं रसात्मकं काव्यं" इति निवर्चनमपि अत्र अनुसन्धेयम्। "काव्यस्यात्मा स एवार्थः" इति ध्वन्यालोककारोऽपि तमेवार्थं समर्थयति। यत्रच ब्रह्मानन्दसदृशः रसः अनुभवगोचरः भवति तत्रैव काव्यत्वं सम्पन्नम्। शास्त्रेष्वपि केवलानां सार्थकानां पदानां तु समूहे साहित्ये भावः नैव आविर्भवति। "शास्त्रार्थप्रतिपादक पद्यं कारिका" इत्यभिधीयते। तादृशेषु शुष्केषु पद्येषु कथं वा रसभावनिष्यन्ति साहित्यं समुदीयात्।

अथापि संस्कृते शास्त्रर्थप्रतिपादकेषु ग्रन्थेषु भङ्गिभणित वैचित्र्येण अलंकाराः ग्रन्थकारैः संन्निवेश्यन्ते। रसालंकारपुष्कलं सत् शास्त्रकाव्यामिति प्रथां च भजेत। छात्राणामपि रसनिर्भरेषु एतादृशेषु शास्त्रग्रन्थेषु पठनाय कौतुकं समापतति। सुकुमारमतीनां बालानां मधुरसंयोगेन कषायमपि रुचिकरं भवति किल। अनया रीत्या वेदमन्त्रसाहित्यमपि पण्डितानां गवेषकानां च आनन्दाय कल्प्यन्ते।

एवं विचार्यमाणे सति आर्यशर्मणा रचितोयं ग्रन्थः सदाचारवृत्तिवर्तनं नाम अनुवाचकानां हृदये सम्मिश्रभावं उन्मीलयति। सदाचारपद्धतिः अत्र प्रस्तुतो विषयः प्रायेण विरस एवेति वयं जानीमः। परन्तु एषः वैद्यविषये दत्तादरः सदाचारवर्णनपि क्वचित् कपोलकल्पितं विचित्रमाशयं संयोजयितुं प्रयतते इति नैव दोषः। वाग्भटोपि अष्टाङ्गहृदये स्वीयं साहित्यकौशलं पदे पदे समाविष्कुर्वन् पाठकेस्यः उन्मेषं प्रददात्येव। वाग्भटस्य काव्यकुशलमधिकृत्य पृथगेव उपन्यासः समारचनीयः। अथापि स्थालीपुलाकन्यायेन द्वित्राणि उदाहरण्यानि प्रदर्शयन्ते। यथा

बीजकस्य रसमह्नुलिहार्यम्
शर्करां मधु घृतं त्रिफलां च।
शील्यत्सु पुरुषेषु जरता
स्वागतापि विनिवर्तत एव।।

बीजसारस्य रसं शर्करा-मधु-त्रिफलायुक्तं य शील्य ति तस्य स्वागतापि चिराय आगतापि जरता विनिवर्तते एव। स्वागतारव्यं इदं वृत्तमिति श्लेषलेशः मानसं च उल्लासयति। स्वागतलक्षणं च "स्वागतारनभगैर्गुरुकान्ता। यथा वा

"दीघिर्का स्वभवनान्तरनिविष्टा
परमरेणु मधुमत्तविहङ्गः।

नीलसानुगिरि कूट नितम्बे।
कानानि पुरकण्ठगतानि।।

इत्यत्र विश्रमविनोदायां गृहाङ्णे नलिनी उद्यानानि च समारचनीयानि इत्येष आशयः कियता सुललितपदविन्यासेन आविष्कृत वाग्भटाचार्यैः।

इमां वाग्भटशैलीमनुसन्धाय एष आर्य शर्मा अपि स्वस्य ग्रन्थस्य साहित्य परिवेषमारचयितुं उत्सुको दृश्यते। काव्यरचनायां नातिकुशलोपि अत्र ग्रन्थें क्वचित् उपमादीनलङ्गरान् उपनिबद्धुं दत्तादरः भवति - यथा

"श्रीकेरलाख्य विषये भवति स्रवन्ति
बालाभिधा विमलशीतपयप्रवाहा।
स्वर्लोक वार वनिता नयनाभिरामा
मीनावली नटन मङ्गल रंङ्गदेशा। इत्ययं कविः स्वीयमावासस्थानं चमत्कार युक्तैः पदैः उपवर्णयति।

यथा वा

अपदः पद दाता स्यादकरश्च करप्रदः
अयोनिः सर्वयोनि स्यादवाक् सर्ववचस्तु सः।।

इत्यत्र विरोधाभासालङ्कारः प्रकरणानुगुणं विभाति। विरुद्धयोरपि धर्मयोः निर्गुणे ब्रह्मणि अविद्यां प्रति उपस्थापितत्वात् वैरुद्धयमपि न दोषाय। तथा हि "सर्वकामः सर्वगन्धः सर्वरसः" इति सगुण बोधकश्रुतिवाक्ये विद्यमाने सति अशब्दं अस्पर्शं, अरूपं, अव्ययं इत्यादि ब्रह्मण निर्गुणबोधकं वेदवाक्यमापि जागर्ति एव।

अथापि सदाचार निरूपणं यत् प्रतिज्ञातं तदत्रग्रन्थे आमूलाग्रं किंचिदेव उपन्यस्तम् इति उपक्रमोपसंहाररीत्या निरूपमाणे सति ग्रन्थकारस्य नये वैकल्यम् न वा अस्ति इति शङ्का प्रतिभायात्। आद्यन्तं अनुष्टुप् छन्दसि सरलया रीत्या उपनिबद्धे अस्मिन् ग्रन्थे क्वचित् वृत्तशैथिल्यंमपि वयं पश्यामः। ग्रन्थकर्तुः उदासीनता एवात्र निदानमिति वयं मन्यामहे। पदानां लिङ्गादिनिर्धारणेपि एतादृश्यनवधानता अस्माकं दृष्टिपदं अवतरति। अथवा ग्रन्थपरिवर्तने लेखकानां च अक्षरस्वालित्यं तत्र हेतुं उत्पश्यामः। कानिचन उदाहरणानि दीयन्ते -

1. मूले एवं दृश्यते -

"गिरां स्वच्छन्दललितां गतिमालोक्य तिष्ठतः।

तूष्मीमासाध्य गिरिशः शास्त्ररक्षां चिकिर्षति।। लिङ्गविपर्ययो यथा -

"विशेषण प्रकाशत्वात् विराट्भावं प्रकाशितः इति। अत्र पुल्लिङ्गपाठः अस्वरसः भाति।

क्वचित् समुचितेऽवसरे अन्यत् वृत्तमवलम्ब्य च आस्वादनवैचित्र्यं सम्पादयति। यथा -

"भवोऽस्मिं सत्यं भव एव जन्म जानाम्यहं मा विमलैकबोधम्

स्वतः प्रवृत्तं रमयाश्रिताङ्गं नारायणं तं भवमित्यवैमि।।" इत्यत्र न केवलं वृत्तपरिवर्तनं, अपि तु अत्र अनुभूयमानः भक्तिरसस्पन्दोपि पद्यस्यास्य हृद्यतामावेदयति।

निरन्तरेण व्यवहारेण किल शब्दानां अर्थः नियतः भवति। आर्यशर्मा शब्दानां नूतनां निरुक्तिमासाध्य अर्थे व्यतियानं कर्तुं उत्सुको दृश्यते। स्वीय विज्ञानप्रदर्शनाय नूतनार्थसम्पादनाय वा एतादृशं पाण्डित्यं कविना तत्र तत्र प्रदर्शितम्। यथा गोपतिशब्दः वृषभे रूढः इति जनाः जानन्ति। गोशब्दस्य धेनुः, वृषभः, भूमिः, वाक्, दृष्टिः, इन्द्रियं इति विविधाः अर्थः विद्यन्ते एव। एतदनुसृत्य गोपतिः इत्यस्य सरस्वती पति ब्रह्मा इत्यर्थः क्वचित् उद्भावितः। एष गोपतिरेव गीष्पतिः (बृहस्पतिः) इत्यर्थे अन्यत्र प्रतिपादितः। एवं गोवर्द्धनपदं गिरिविशेषं बोधयतीति प्रसिद्धम्। अथापि गोविन्दपदस्य गां विन्दति इति निरुक्तिमवलम्ब्य श्रीकृष्णो अर्थः निर्धारितः। गाः (भूमिं) बर्द्धयतीति रीत्या गोवर्द्धनोपि गोविन्दवाचकः इति आर्यशर्मा समर्थयति। एवं अन्तैः सूक्ष्मपरीक्षकैः अपि एतावदनुदभावितं पदार्थतत्वं निपुणमतिना शर्मणा अत्र ग्रन्थे अपपादितं दृश्यते।

अथ संस्कृते नियतायां नाम्नां या लिङ्गव्यवस्था सा आर्यशर्मांणा अलक्षीकृता इवानुवाचकानां प्रतीतिर्जायते। यथा "भावः गुणः इत्यादयः नपुंसकत्वेन पद्येषु विनिवेशितः दृश्यन्ते। वाग्भटादि ग्रन्थपरिचयसम्पन्नस्य अस्य द्विजस्य संस्कृते पाण्डित्यं परि निष्ठितमेवप्यत न विसंवादः। नामसु दृश्यमानं एतादृशं लिङ्गवैचित्र्यं ग्रन्थप्रतिलेखकानामज्ञताविलसितं द्योतयति।

सदसचारवृत्तिवर्तनाख्ये अस्मिन् सप्तदशस्वपि अध्यायेषु विषयाणां

अनुक्रमीकरणे सम्मिश्रभावः एव अनुभूयते। एवं एकस्यैव विषयस्य अन्येष्वपि अध्यायेषु पुनरावर्तनं दृश्यमानं आस्वादने वैरस्यं च जनयति। शास्त्रीयस्य कस्यापि विषयस्य बाह्य रूपरेखा ग्रन्थकारेण विभाविता इति वक्तुं वयं न पारयामः। अत एव नानाध्यायेषु प्रतिपादितानां विषयाणां परस्परसमावेशः अर्थग्रहणे ईषत् वैषम्यमापातयतीव। वैद्य यथा निपुणः तथा वेदान्तेपि निष्णातः इति आत्माभिमान विजृम्भितः सन् अव्यक्तरूपेण विलक्षणरूपेण च तत्र तत्र वेदान्ततत्वानि सन्निविष्टानि इत्यारोपः न निर्मूलो विभाति।

अथ तु अस्य आर्यशर्मणः वेदान्तविषये कियान् अवगाहः इति अन्तिमो विचारोऽवशिष्यते। वेदान्तस्य प्रकरणस्वरूपं कुत्राप्यध्याये विवृतं नैव दृश्यते। वेदान्त शास्त्रस्यभागिकं तत्वं अस्पष्टरूपेण अध्यायान्तेषु आवर्तनरीत्या विनिवेशितो दृश्यते। यथा —

"कैवल्यमार्गान्निर्मुक्तो द्वैतभावाद्विमोचित
त्रिवर्गमनुभूयैव चतुर्वर्गात्परं गतः।।
ततः पञ्चत्वमुन्मुच्य षड् वर्गेभ्यो निवर्तितं।
अतीत्य सप्तावरणं वैद्यस्तस्थौ निरावृतः।।" अन्यत्र च
"मृत्यु कामावूभौ तत्राद्वैतं भविष्यति।
शिवे तू तौ न भवतः तस्मादार्य शिवः स्मृतः।।"

शास्त्र तत्वस्य अनेन आवर्तनेन वेदान्त विषये शिष्याणां सहृदयानां च हढिमा भवतीति प्रतीक्षा वा ग्रन्थकारस्य आसीत् इत्यापि व्यख्यानं सङ्गतं भाति।

अनेकेषु शास्त्रेषु अवगाहं लभमानानां महापुरुषाणां रचनायां एतादृशी विचार सङ्गीर्णता अनिवार्य। इत्येदतपि गन्थकार- दृष्ट्या समुचितं समाधानमिव भाति। अत एव सदाचारवृत्तिवर्तनम् इति शीर्षकं वैद्यशास्त्रपरमपि अस्य ग्रन्थस्य आभ्यन्तरं प्रकरणं वेदान्त सम्मिश्रमिति अस्य पठनेन गवेषक धुरीणामपि धिषणायां प्रतिभायात्।

एवमेव आर्यशर्मा तत्र तत्र प्रदर्शयन्नपि पूज्य पिता महा दीना मपेक्षया विनयादरं च प्रदर्शयति पितरि पितामहे प्रपितामहे च गुण पौष्कल्यस्य स्वयं साक्षी इव भूत्वा भक्त्यादरेण तान् पूर्वपितामहादीन् अवनतशिरस्कः प्रणमत्येष ग्रन्थकारः। पारम्पर्येण समधिगतयाः आयुर्वेदविद्यायाः पठने पाठने च प्रचारणे गुणाधानेन च

गुरुपरम्पराणां अनुग्रहाशिर्वादः अभिकाम्य इति ग्रन्थस्य अन्तिमभावात् सुव्यक्तं वयं जानीमः। इत्थं पितृप्रसादलाभोपि अस्य ग्रन्थस्य रचनायां प्रयोजनं मन्यते स्म एष वैद्य महाशयः इत्यापि अन्ततः वयं विभावयामः

IV सम्पदितग्रन्थः टिप्पणि सारश्च

आर्यशर्मकृतम् - सदाचारवृत्तिवर्तनम्

प्रथमोऽध्यायः

आत्मस्वरूपकथनम्

"धीर्विज्ञानीयम्"

वन्देहं गोपतिं वार्णी गणेशं च षडाननम्।
एतेषां योगशक्तिं च पंचभूतप्रकाशिनीम्।। 1
पितामहमुखाः सन्तः सच्चिदान्दनिर्वृताः।
सदाचारविधानार्थम् सन्तु मे हृदयङ्गमाः।। 2
श्रीमन्नारयणपरं जगदेतच्चराचरम्।
विवेकनयनेनैव पश्यामि सदनग्रहात्।। 3
भावाभावेषु मात्सर्यम् मुक्त्वा ये स्वस्थतां गताः।
सन्तस्ते गुरवः सन्तु भवतां जन्मजन्मनि।। 4
स्वधर्मनिरताः सन्तः सर्वलोकहितैषिणः।
प्राणाचार्यः प्रणामाय सन्तु मे जन्मजन्मनि।। 5
विद्यार्थम् व्यसनं व्यर्थम् विद्यामयशरीरिणाम्।
अन्योन्यभाषणाच्छब्दस्त्वर्थमापादयेत् सुखम्।। 6
पदवाक्यार्थसिद्धान्तैः रागद्वेषमदैरिह।
वेदार्थो विद्यते नैव अविकल्पोपजीविनाम्।। 7
नित्यानुष्ठानवृत्या च यमेन नियमेन च।
सर्वभूतेषु मैत्र्या च वेदार्थोऽन्तः प्रकाशते।। 8
स्वयंप्रकाशो वेदार्थः उपदेशान्न सिद्ध्यति।
वाचो यत्र न गच्छन्ति सैकोऽर्थः स्वप्रकाशक-।। 9

सिद्ध्यन्ति तपसा सन्तो ब्रह्मध्यानोपदेशतः।
गवां स्वच्छन्दवृत्तीनां द्रष्टा गोपतिरीश्वरः।। 10
वृन्दावनं गवां सेव्यम् तद्यज्ञो यज्ञरूपदृक्।
यत्र गोवर्द्धनं नाम पर्वतो ब्रह्मरूपदृक्।। 11
गिरां स्वच्छन्दललितां गतिमालोक्य निर्वृतः।
*तूष्णीमासाद्य गिरिशः शास्त्रकक्ष्यां गोपायति।। 12
गावामनर्थनिर्वृत्यै षड् शास्त्री लगुडायते।
गवां मर्यादागिरिवत् सर्वशास्त्रं प्रतिष्ठितम्।। 13
सज्जनानां वचः शास्त्रं वेदास्तु भगवद्गिरः।
सज्जनाः वेदवेद्यज्ञाः वेदज्ञो भगवान् शिवः।। 14
वाण्याः विदग्धातां द्रष्टुं नित्यज्ञानी महेश्वरः।
निगूढं ज्ञानसामाद्य शेते मूढ इवाधुना।। 15
यामेत्यत्र निषेधस्य स्थानं मायेति कथ्यते।
तत्रस्थो भगवान् शम्भुः वाण्या नेत्यत्र सूचितः।। 16
मेति वाङनिषधात्वात् सा मायेत्याभिधीयते।
वाणी मायेति चात्मानं निषेधात् स्फुटमभ्यधात्।। 17
गवां च्छन्दोमयगतिं द्रष्टुं गोपृष्ठगो यदा।
तदा कालादिरूपेण गाश्चारयते हरिः।। 18
गोविन्दो गोपतिर्भूत्वा गाः पालितवान् यदा।
तदा गोपालरूपत्वात् श्रुतयस्तं न यान्ति हि।। 19
गोपृष्ठगमनादेनं गोपालं वृषवाहनम्।
इत्याहुर्षयः प्राज्ञं तैजसं साक्षिणं शिवम्।। 20
गोगतिप्रतिलोमेन वीक्षतां गोपतिः शिवः।
गोपृष्ठचारी भगवान् सम्यगीक्षापथं व्रजेत्।। 21
गोचारणं त्वर्थवादं अर्थवादविलोमतः।
वेदोक्तविधिमार्गेण गच्छता हरिरीक्ष्यते।। 22

*शास्त्ररक्षां चिकीर्षति इति पाठः साधीयान्

वेदार्थवादमुत्सृज्य वेदमार्गानुवर्तनात्।
गोचर्या तु तदैव स्यात् पशूनां वृत्तयो न च।। 23

संज्ञामात्रं शब्दकृत्यम् अज्ञानस्थस्य चात्मनः।
वेदातीतप्रसङगत्वादर्थवादोऽत्र नो भवेत्।। 24

काणादं पाणिनीयं च मीमांसाद्वैतखण्डनम्।
वेदान्तं सांख्ययोगादीननालोक्य कृतत्विदं।। 25

यत्किञ्चित्स्वयमुत्पाद्य भुक्त्वा तन्मलतां गतम्।
परित्यजति तज्ज्ञात्वा वक्ष्ये ग्राह्यं सुनिश्चितः।। 26

कर्तुम् तदन्यथाकर्तुम् अकर्तुं शक्तिमान् जनः।
प्रभुरेव जनस्तस्मात् साक्षात्कारो महेश्वरः।। 27

कार्यकारणयोरैक्यात् जीवदेहो महेश्वरः।
कार्ये निगूढमात्मानं कारणं स्वं विचिन्वते।। 28

कार्यस्य नानावृत्तित्वात् कारणस्यैकरूपतः।
कार्येभ्यः च्छादनं प्राप्य कारणं मूढतां गतम्।। 29

कार्यैश्च रूपनामानि कृत्वाकार्यम् प्रसङ्गधीः।
कारणं स्वं तु विस्मृत्य मूढभावाद्गतोऽशुभम्।। 30

*[2]कर्मज्ञानात्मविषयं ज्ञानकर्मैव सर्वदा।
अतोऽहं ज्ञानकर्मणि भाषितोऽस्मीह वर्तते।। 52

कर्मज्ञानमुपस्था स्यात् योन्युपस्थमिहात्मनः।
ज्ञानकर्मात्मकं जिह्वा वाचो मद्विषयः स्मृतः।। 53

आत्मनः सत्यसङ्कल्पात् न च मिथ्या भविष्यति।
वैद्योऽस्मीत्यभिमानेन वैद्यं मां ब्रुवते जनाः।। 54

रूपनामप्रबुद्धोऽस्मि जात्या व्यक्त्या च संयुतः।
सत्वार्थमीहमानः सन् वर्तयन् भुवि कुत्रचित्।। 55

*[3]श्रीकेरलाख्यविषये भवति स्रवन्ती

---

*[2]एकतिंशत् प्रभृति एक पञ्चाशत् पयेन्तं श्लोका लुप्ताः।

*[3]वृत्तभङ्गः

बालाभिधा विमलशीतपयः प्रवाहा।
स्वर्लोकवारवनितानयनाभिरामा
मीनावलीनटनमङ्लरङ्गदेशा।। 56
अस्ति तत्तीरनिकटे पनसान्दोलिकाख्यया।
वैद्यवेशमार्यशर्मेति विश्रुतस्तद् गृहेश्वरः।। 57
तस्य पुत्रोऽतितेजस्वी नारायण इति श्रुतः।
नामार्थमेव कुर्वाणः परेच्छावृत्तिवर्तनः।। 58
धर्ममर्थं च कामं च कुर्वाणो लौकिकीं स्मरन्।
नारायणमहादेवौ माया यस्य हृदाश्रितः।। 59
तस्य सीमन्तपुत्रोऽहं सर्वज्ञो वैद्यसम्मतः।
सन्मार्गदर्शी च सखी दुःखमार्गबहिष्कृतः।। 60
पितामहशिखायां तु आत्मपुच्छेन मेलितः।
नाम्ना पितामहः साक्षात् मातामहमनुव्रत।। 61
मातामहो मे मधुसूदनप्रियो नारायणेत्युच्चतरं ब्रुवाणः।
संसारदुःखानि न विन्दतेऽसौ त्रसन्ति यन्नामरवेण रोगाः।। 62
तस्य पुत्रादधीतोऽहं वैद्यशास्त्रसमुच्चयम्।
पितुराज्ञां पुरस्कृत्य ब्रह्मचर्यव्रते स्थित-।। 63
धान्वन्तरिभिषग्रुद्रौ पारम्पर्येण पूजितौ।
आश्चर्यकलिका चैव मद्गृहे परदेवता।। 64
तेषमानुग्रहाच्चैव सतां शुश्रुषणेन च।
सर्वभूतेषु मैत्र्या च वैद्यं मां ब्रुवते जनाः।। 65
नास्ति विद्याभिमानं मे लोकवेदानुसारतः।
वक्ष्ये वैद्यमतं सम्यक् सत्यं कर्तुम् जनोक्तयः।। 66
पितामहपितात्माहं सुबद्धो बद्धवानपि।
प्रपितामहपुत्राभ्यां वर्तयामीह संज्ञया।। 67

पञ्चवेदात् परंप्राप्य वेदातीतपरानुगः।
वेदमार्गमं समालोक्य सुखमात्रेऽस्मि निर्वृत।। 68
पितामहः पिता चात्मा एकोऽहं त्रिविधः स्मृतः।
नामात्मरुपभेदेन पुच्छाग्राभ्यां च योजितः।। 69
भूतत्वं मयि पुत्रत्वं पितृत्वं मयि वर्तते।
पितामहत्वं भावि स्यात् त्रिसर्गस्त्वेवमेव मे।। 70
पितामहशिखा साक्षी प्रपितामह एव मे।
पुत्रः स्पादात्मनः पुच्छं संज्ञया तौ बबन्धतुः।। 71
धारणाद्दर्शनादेतौ पुत्रश्च प्रपितामहः।
आत्मत्रयोभये पुच्छे सति पञ्चात्मकोऽस्म्यहम्।। 72
ज्ञानेन्द्रियाणि पञ्चैव वेत्ति ज्ञानेन्द्रियैः सह।
तस्मात्पञ्चविधो वेदः तद्वेत्ता वेदतः परः।। 73
अहं त्वनुभावो साक्षात् वेदातीतोऽस्मि साम्प्रतम्।
इन्द्रियाणां परत्वाच्च अतीन्द्रिय इति स्मृत।। 74
भूतानां पादगमनं वृन्दावनमिति श्रुतम्।
गावृन्दो वेद एव स्यात् कृष्णो गोपालकोऽस्म्यहम्।। 75
गोविन्दो भूतचर्यायां गाः सञ्चारयन् सुखम्।
गोपालैर्वेदतत्वज्ञैरास्ते गोवर्द्धनप्रियः।। 76
गोवर्द्धनं तु ब्रह्मैव यतो वेदः प्रपद्यते।
वर्तेते गिरिगोशब्दौ वेदा एव गिरः स्मृतः।। 77
इत्येवानुभवार्थम् मे चित्तसद्मनि भासते।
अरुपानुभवोह्येतत् निरुपाधि स्वसंस्थितम्।। 78
इत्येवं निष्कलं विद्यात् तद्रूपानुभवात्मकम्।
रूपात्मकं क्षरं विद्यात् तदेव सकलं स्मृतम्।। 79
चित्तेद्रियोभयोर्बन्धात् तयोर्मध्यं त्रिधा भवेत्।
मनोबुद्धिरहंकारस्त्रिविधोऽनुभवात्मकः।। 80

नित्यं निरस्तकपटा येभ्यो लोकाः प्रकाशिताः।
पञ्चब्रह्मैव तद्विद्यात् चित्तेन्द्रियनिबन्धनम्।। 81
स एव सर्वम् जानाति जानामि न किमप्यहम्।
पञ्चब्रह्मप्रभावोऽहं नानेको न च केवलः।। 82
पञ्चब्रह्मैक्यतो भाति षष्ठ योगप्रभावतः।
पञ्चवेदात्पर इव अहं त्वनुभवात्मकः।। 83
वेत्ता ज्ञानात्मकं वेदमरूपं त्वक्षरं परम्।
वैद्यं कर्मात्मको वेदः सकलो रूपवान् क्षरः।। 84
इत्येदतदात्मनः कल्पमज्ञानं वेदकल्पितम्।
कर्मज्ञानोभयोर्योगादहमित्येव भासते।। 85

इति

आत्मस्वरूपकथनं नाम

प्रथमोऽध्यायः

प्रथमाध्यायस्य टिप्पणी

1. गोपतिः

गवां पशूनां पतिः गोपतिः। भूमिपतौ, नृपे, श्रीकृष्णे, किरणपतौ, सूर्ये, स्वर्गपतौ, शक्रे इति मेदिनी। गवां पालनाद् गोपवेशधारणात्, गौर्मही तस्याः पालनाद्वा गोपतिः।

2. वाणी

वण् शब्दे। सरस्वती। वचनम्। यथा मार्कण्डेये-

"चक्षुपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम्।
सत्यपूतां वदेद्वाणीं बुद्धिपूतश्च चिन्तयेत्।।"

भाषणम्, वचनम्, भाषा। यथा - "वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते" इति।

3. गणेशः

गणानामीशः गणेशः। गणेशोत्पत्तिः वक्त्रतुण्डकपिलचिन्तामणि विनायकादिरूपेण स्कन्धपुराणे उक्तम्। "एष सर्वेश्वरः एष सर्वज्ञः एष भूपतिरेष भूतलाय एष सेतुर्विधारणः प्रधानक्षेत्रज्ञपतिर्गणेशः" इति श्रुति - "प्रसिद्धसर्वेश्वरादिपदवत् गणेशपदवत् नित्यसिद्धेश्वरपरत्वं दृश्यते" इत्युपक्रम्य "तस्मात् प्रधानक्षेत्रपतिर्गणेशाः" इति श्रुतेः "गुणत्रयस्येश्वरोऽस्मि न नाम्ना त्वं गणेश्वर" इति विनायकसंहितावचनाच्च गणशब्दाभिहितस्य सत्वादिगुणसंघातस्य पतिर्गणेशः इति सिद्धमित्युक्तम्।

4. षडाननः

कृत्तिकादीनां षण्णां स्तनपानार्थम् षट् आननानि यस्य सः षडाननः।

5. योगशक्तिः

युज् योगे समाधौ च। युज् संयोगे। मेलने। उपाये। ध्याने। युक्तौ चामरः। योगाश्चित्रवृत्तिनिरोधः इति पतञ्जलिः। योगस्य शक्तिः योगशक्ति-। अथवा योगरूढा शक्तिः योगशक्तिः, शिवः। यथा महाभारते सदसद्व्यक्तमव्यक्तं पिता माता पितामहः इति।

6. पञ्चभूतानि

आकाश-वायु-तेजो-जल-भूमिभूतेषु।

"भूतद्विकादहंकाराद् पञ्चभूतानि जज्ञिरे।
पृथ्वी पं चगुमा प्रोक्ता ब्रह्मज्ञानेन भासितम्।।
मलं मूत्रं तथा शक्रं श्लेष्मा शोणितमेव च।
तोयं पञ्चगुणं प्रोक्तं ब्रह्मज्ञानेन भासितम्।।
ह्रासो निद्रा क्षुधा चैव भ्रान्तिरालस्यमेव च।
तेजः पञ्चगुणं प्रोक्तं ब्रह्मज्ञानेन भासितम्।।
धारणं पालनं क्षेपः संकोच प्रसरस्तथा।
वायुः पञ्चगुणं प्रोक्तं ब्रह्मज्ञानेन भासितम्।.
कामक्रोधास्तथा लोभस्त्रपा मोहश्च पं चमः।
नभः पञ्चगुणं प्रोक्तं ब्रह्मज्ञानेन भासितम्।।" इति।

7. पितामहः

पितुः पिता। ब्रह्मणि तु पितुः पिता जनकस्यापि जनकः। पितृणां पितृगणानां पिता वा। ब्रह्मा। यथा महाभारते -

"यस्मात् पितामहो यज्ञे प्रभुरेक प्रजापतिः
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ट्यथा।।" इति।

8. सच्चिदानन्दः

सत् नित्यः चित् चैतन्यमानन्दः। नित्यज्ञानसुखमये ब्रह्मणि।

9. नारायणः

विष्णो परमात्मनि नारायणो नर इति विष्णुसहस्रनाम। भाष्ये अस्य व्युत्पत्तिर्दर्शिता। यथा - "नरे चात्मा ततो जातान्याकाशादीनि नराणि तानि कार्याण्यैते कारणात्मना व्याप्नुते" इति नारायणः।

"यच्च किञ्चज्जगत् सर्वम् दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वम् व्याप्य नारायणः स्थितः।।" इति मन्त्र वर्णनात्
"नाराज्जातानि तत्वनि नाराणीति विधुर्बुधाः।
तान्येवायनं यस्य येन नारायण स्मृत।।" इति महाभारते।
"अयनत्वात् प्रत्यय इति वा। यत्प्रयन्त्यभिसंविशन्तीति श्रुतेः।
"अपो नरा इति प्रोक्ता आपो वैनरसूनवम्।
तोयदस्यायनं पूर्वम् तेन नारायण स्मृतः।।" इति मनुः। अन्यथा निरुक्तिर्दशिता यथा -

"सांख्यमुक्तिवचनो नारेति च विधुर्बुधाः।
यो देवोह्ययनं तस्य स च नारायण स्मृतः।। इति।
नारा च माक्षणं पुण्यमयनं ज्ञानमीप्सितम्।
तयोर्ज्ञानं भवेद्यस्मात्सोऽयं नारायण स्मृतः।।
नारायणेति शब्दोऽस्ति वागस्ति वशवर्तिनी।
तथापि नरके मूढाः पतन्तीह क्मिदद्भुतम्।।" इति महाभारते।
नरस्यापत्यं। नारायणसम्बन्धिसैन्यभेदे।

10. जगत्

गम् - क्विपृ। वायौ। जङ्गमे विश्वे। लोक सचराचरे प्रपञ्चभूते भागोपयोगिपरिकरसहिते मायामये संसारचक्रे। यथोक्तमभियुक्तेः

"न निरुपयितुं शक्ता विस्पष्टं भासते च या।।
सा मायेतिन्द्रजालादौ लोकाः संप्रतिपेदिरे।।
स्पष्टं यथा जगच्चेतदशक्यं तन्निरुपणम्।
मायामयं जगद्भाति वीक्षस्वापक्षपाततः।।
यदा सदेवो जागर्ति तदेदं चेष्टते जगत्।" इति मनुः।

11. चराचरम्

चरम् च अचरं च - चराचरम्। चले अनवस्थिते। चरलक्षणादिकमुक्तं युक्ति कन्पतरौ-

"विवक्वानिव तेजोभिर्नभस्वानिव वेगतः।
राजा चरैर्जगत्सर्वम् प्रप्नुयाल्लोकसम्मतः।।"
प्रणिधो। "तेषां वृत्तं परिणयेत् सम्यग्राष्ट्रेषु तच्चरैः। इति मनुः।
"तस्य सर्वाणि भूतानि स्थावराणि चराणि च।
देवेभ्यश्च जगत्सर्वम् चरं स्थाण्वनुपूर्वशः।।" इति मनुः।

12. प्राणाचार्याः

प्राणानामाचार्यः प्राणाचार्यः। वैद्यः साधारणतया राजवैद्यरूपेऽर्थे प्रयुज्यते।

13. रागद्वेषमदाः

रागः - रज्जने। शुक्लादिवर्णे। प्रीतो अनुरागे नृपे मदादिस्वरयोनिके स्वरभेदे। लोहितवर्णे। तद्विशिष्टलाक्षादौ च तेन रक्तं रागात् इति। अनुरागलक्षणमुज्वलमणिनोक्तम्। - यथा-

"सुखमप्यधिचित्ते मुखत्वेनैव रज्यते।
यतस्तु प्रणयोत्कर्षात् स राग इति कथ्यते।। इति। स्वरभेदनिरुक्तिर्यथा
येस्तु चेतासि रज्यन्ते जगत्रितयवर्तिनाम्।
ते राग इति कथ्यन्ते मुनिभिर्भरतादिभिः।।" इति।

द्वेषः :- द्वेष भावे। न्यायनये आत्मवृत्तौ। गुणभेदे स च - इच्छाद्वेषप्रयत्नसुखदुःखज्ञानादन्यात्मनो लिङ्गम्" इति गोतमसूत्रे दर्शितम् - "यज्जातीयस्यार्थस्य सन्निकर्षात् दुखमात्मोपलब्धवान् तज्जातीयमेवार्थम् पश्यन् हातुमिच्छति सेयं हातुमिच्छा द्वेषः। एकस्यानेकार्थदर्शिनो दनप्रतिबन्धनात् दुःखहेतो द्वेषः" इति भाष्यसम्मतोऽर्थः। तत्र दुखं प्रतिकूलवेदनीयतया स्वतो द्वेषविषयः तत्साधनन्तु द्विष्टसाधनताज्ञानात्। अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम्।

14. यमः

यमयतीति यमः

अहिंसासत्यमस्तेयं ब्रह्मचर्यम् दयाऽऽर्जवम्।
क्षमा धृतिर्मिताहारः शौचश्चेति यमाः दश।।

15. नियमः

(1) प्रतिज्ञायाम् - अङ्गीकारे इत्यमरः। (2) नित्ये (3) आगन्तुकसाधनकर्मरूपे व्रते। (4) नियन्त्रणायां (5) निश्चये (6) यागाङ्गभेदे। शौचसन्तोषतपःस्वाध्यायप्रणिधानानि नियमाः इत्युक्तम्। तत्र शौचं मृज्जलादिजनितं मेध्याभ्य वहराणादि च बाह्यमाभ्यन्तरं चित्तमलानां प्रक्षालनम्। सन्तोषः सन्निहितसाधानादधिकस्यानुपादित्सा। तपे द्वन्दवसहनंम्, द्वन्द्व च जिघत्सापिपासे शीतोष्णे स्थानासने काष्ठमौनाकारमौने च व्रतानि चैवं यथायोगं चान्द्रायणसान्तपनादीनि। स्वाध्याये मोक्षशास्त्राणमध्ययनं प्रणवजपो वा।

सर्वनियमात्मके परमेश्वरे अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः इति विष्णुपुराणो। स्वेषु अधिकारेषु प्रजाः नियमयतीति नियमः इति भागवते।

16. वेदार्थः

वेदस्यार्थः वेदार्थ। लौकिकवाक्यभिन्नवाक्यम्। तच्च ज्ञानसाधनं धर्मब्रह्मप्रतिपादकशास्त्रम्, मन्त्रब्राह्मणभेदेन द्विधं च। तच्च स्वतः प्रमाणम्। स्वतःप्रामाण्यं च प्रमाणान्तरानधीनप्रमितिजनकत्वम्।

17. वृन्दावनम्

वृन्दायाः तपस्यार्थम् तत्क्रीडार्थम् वा वनम्। मधुरासन्निकृष्टे वैष्णवे। गोलोकस्थे

धामभेदे। नित्यं वृन्दावनं धाम ब्रह्माण्डोपरि संस्थितम्।

पूर्णब्रह्ममुखैश्वर्यम् नित्यमानन्दमव्ययम्।

वैकुण्ठादि तदंशानां स्वयं वृन्दावनं भुवि।

गोलोकैश्वर्य च यत् किचित् गोकुले तत्प्रकीर्तितम्।।

तस्मात्त्रैलोक्यमध्ये तु पृथ्वी धन्येति विश्रुता।

इति तत् प्रकीर्त्यते।

18. गोवर्द्धनम्

वृध् णिच् भावे ल्युट्। गवां वर्द्धने। गिरियज्ञभेदे तत्प्रकाशे गोयज्ञभेदे दृश्यः। वृन्दावनस्थो पर्वतभेदे।

प्रातर्गोवर्द्धनं पूज्य धूत चैव समाचरेत।

भूषणीयास्तथा गावः पूज्याश्च गोकुलत्राणकारकः इति गोपूजा मन्त्रस्कान्दे।

"एवं गोवर्द्धनो गावः पूजनीया विधानतः।

गोवर्द्धनमखेरस्यः कृष्णसन्तोषकारकः।।" इति पाद्मे।

"गोवर्द्धनस्याकृतिरन्वकारि" इति माघः।

19. शिवः

(1) मङ्गले इत्यमरः। (2) सुखे (3) जले (4) सैन्धवे सामुद्रे च (5) लवणे (6) मङ्गलवति (7) महादेवे। एवं मोक्षे। (8) अद्वैतब्रह्मणि।

20. माया

"नासदूपा न सद्रूपा माया नैवोभयाम्पिका।

सदसद्भ्यामनिर्वाच्या मिथ्याभूता सनातनी।। " इति मायास्वरूपं वेदान्ते उक्तम्। अनया मायया च सुधीभिः परब्रह्म अनुमीयते।

21. शम्भुः

शं मङ्गलं भत्यस्यादिति। शिवः।

"एतद्रभागवतः शम्भोः कर्मरक्षाधरद्रुहः।

श्रुतं भागवतात् शिष्यादुद्धवान्मे बृहस्पतेः।।"

एकादशरद्राणामन्यतमः। ब्रह्मा।

"तामुवाच महाराज भूमिं भूमिपतिः प्रभुः।
प्रभवः सर्वभूतानामीशः शम्भुः प्रजापतिः।।"

बुद्धः इति मेदिनी। विष्णुरिति हलायुधाः।

22. गोविन्दः

गां वेदमयीं वाणीं गां भुवं धेनुं स्वर्गम् वा विन्दति इति गोविन्दः। विष्णौ वराहरूपेण भुवः ऐश्वर्यप्राप्तेः इन्द्रेण स्वर्गस्य निवेदनात् मत्स्यरूपेण वेदस्योद्धारणात् गोभिर्वेदान्तवाक्यैः विद्यते इति वा तस्य तथात्वम्।

"गोभिरेव यतो वेद्यो गोविन्दः समुदाहृतः" विष्णुसहस्रनामे।

"गौरेषा भवतो वाणी तां च वेदयते भवान्।
गोविन्दस्तु ततो देवमुनिभिः कथ्यते भवान्।।" इति हरिवर्णनवाक्यम्।

23. ऋषयः

(1) ऋषति ज्ञानेन संसारपारम्। (2) वसिष्टादौ (3) शास्त्रकृदाचार्ये (4) वेदे किरणे च।

"ऋषी हिंसा गतौ धातुर्विद्या सत्यतमः श्रुतिः।
एष सन्निचयो यस्मात् ब्राह्मणश्च ततस्त्वृषिः।।
विवृत्तसमकालं तु बुध्या वृत्तिमृषि स्वयम्।
ऋषन्ति परमां यस्मात् परमर्षिततः स्मृतः।।
गत्यर्थादृषतेर्धातोः नाम निर्वृतिकारणम्।
यस्मादेतत्स्वभूतस्मर च ऋषिता मतेति।।"

"सप्तब्रह्मर्षिदेवर्षिमहर्षिपरमर्षयः।
काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमावराः।।" इति रत्नकोषोक्तैः सप्तविधऋषिर्भवति। तेषां विशेषे यथा - व्यासाद्यस्तु महर्षयः। परमर्षयन्तु भोलाद्याः देवर्षयः कणदयः। ब्रह्मर्षयो वसिष्ठाद्याः सुश्रुताद्याः श्रुतर्षयः। ऋतुपर्णादयो राजर्षयः काण्डर्षयस्त्वमी। जैमित्याद्याः वसिष्ठाद्याः च मरीच्याद्याः दश।

24. प्राज्ञः

प्रकर्षेण जानातीति प्राज्ञः। प्रज्ञ एव प्राज्ञः। उक्तं च मार्कण्डेयोपनिषादि यत्र

सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत् सुषुप्तम्, सुषुप्तस्थाने एकीभूतः प्रज्ञानधन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः । एवमध्यात्मकः कारणरूपः प्राज्ञः।

25. तैजसम्

स्वप्नस्थानोत्तः प्रज्ञः सप्ताङ्गो एकोनविंशतिमुखः प्रिविविक्तभुक् तैजसो दृवितीयपादः। अध्यात्मकं सूक्ष्मरूपः तैजसः।

26. साक्षी

अक्षेण सह वर्तते इति साक्षम्। तदस्यास्तीति साक्षी। "तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य" इति माण्डूक्यकारिकायाम् उक्तम्। अन्तःकरणादिविशिष्टचेतः जीवः "अन्तःकरणाधुपहितः चेतः साक्षी। स्वप्नद्यवस्थाविशेषाः साक्षिणः नतु जीवस्य। कर्तुत्वराहित्ये बन्धमोक्षाद्यतीतः।

27. अर्थवादः

अर्थस्यलक्षणया स्तुत्यर्थस्य निन्दार्थस्य वा वादाः अर्थवादः। "प्रशंसनीयगुणवाचके निन्दनीयदोषवाचके च शब्दविशेषे अभिधया गौण्या च भूतमर्थम् वदन् स्वाध्यायविद्यापादितप्रयाजनवस्तुलाभाय विधिमाकाङ्क्षनर्थवादः।" अर्थवादेन हि क्वचिद्विधिशक्तिरवसीदन्ती विध्यर्थे शीघ्रं प्रवर्तयितुमुत्तम्यन्ते। स च चतुर्विधाः - "स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः। तत्र स्तुतिः साक्षाद्लिध्यर्थस्य प्रशंसार्थकं वाक्यम्। यथा - "सर्वस्य पिता वे देवाः सर्वमजयन् सर्वय व्याप्त्यैव सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वम् जयंतीत्यादि। अनिष्टसाधानताद्वारा विध्यर्थप्रवर्तकं वाक्यं निन्दा। यथा - "एष वाव प्रथमो यज्ञानां यज् ज्योतिष्टोमः यः एतेनानिष्टा अन्येन यजते स गर्ते पततीत्यदिः।" पुरुषविशेषनिष्टतया कथनं परकृतिः परक्रिया। यथा-" वपामेवाग्रे अभिधास्यन्ति अथ पृषदाज्यं तद्वह चरकाध्यर्यवः पुषदाज्यमेवाग्रे भिधास्यन्त्यग्नेः प्राणाः पृषदाज्यमित्यभिदधातीत्यादि पुराकल्पः। एवमन्येप्यर्थवादाः ब्राह्मणरूपाः सामसंहिताभाष्ये माधवाचार्येण प्रदर्शिताः। "हेतुः निर्वचनमं निन्दा प्रशंसा संखयो विधिः। परकृतिः पुराकल्पः यावधारणकल्पना इत्यादि। लौगक्षिणा तु त्रैविध्यमुक्तम्" अर्तवादश्च त्रिविधाः- गुणवादो नुवादोभूतार्थवादश्च श्चेति। तदुक्तम्

"गुणवादो विरोधे स्यादनुवादो वधारिते।

भूतार्थवादस्तद्धानात् अर्थवादास्त्रिधा मतः।।" इति। गुणवादश्च यथा "सिंहो माणवकः" इत्यादौ माणवके सिंहाभेदस्य विरोधेन तद्गतदेशाभेदो बोध्यते तेन समर्थत्वादिरूपं तद्वृत्तिगुणमनुवदति प्रतिपादयतीति गुणवादः। अन्ये च "यजमान प्रस्तरः" इत्यादौ प्रत्यक्षादिभिरेव घाटिते अर्थे तमेवार्थवह्निर्हिमस्य भेषजं, भूमिरावपमं महत् सूर्यस्तापकरः" इत्याहुः। एतदुभयभिन्नं भूतं सिद्धार्थम् वदतीति भूतार्थवादः।

28. काणादस्

वेशेषिकशास्त्रस्योपज्ञाता कणादः। विशेषख्यातानां पदार्थानां प्रतिपादनं वैशेषिके दृश्यते। तेषां मते द्रव्यदिचतुर्विंशतिगुणाः सन्ति। परमपरं चेति कर्म द्विविधम्।

परमाणोः लोकोत्पत्तिरिति तेषां विश्वासः। पुण्यपापानुसारेण स्वर्गनरकादीनां सम्भवः। देहादिभिन्नः जन्ममरणाद्युक्तः कर्ताभोक्ता च आत्मा।

29. पाणिनीयम्

व्याकरणशास्त्रं वेदाङ्गत्वेन प्रथितम्। वि-आङ्पूर्वक कृ धातोः करणार्थि ल्युटि व्याकरणपदस्य व्युत्पत्तिः। महेश्वरः स्वयमेव पाणिनीयमुपदिष्टवानिति प्रसिद्धः। उक्तं च-

"नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।

उद्धर्तुकामः संनकादिसिद्धानेतद्विर्शे शिवसूत्रजालम्।।"

एवं चतुर्दशसूत्राणि महेश्वरेणोपदिष्टानि। तानि च पुनः तेन व्याख्यापयामास। तान्येव पाणिनीयव्याकरणत्वेन प्रसिद्धिमगात्।

30. मीमांसा

मन्तुमिच्छा मीमांसा। अस्य दर्शनस्योपज्ञाता जेमिनिः। वेदोक्तकर्मविमर्शकाः एंते मीमांसकाः।

31. अद्वैतम्

द्वाभ्यांम् इतं द्वीतम्। तस्य भावः द्वैतम्, भेदः। अभावार्थे नं। अद्वैतवेदान्तस्योपज्ञाता श्रीशङ्करः। तन्मतानुसारेण ब्रह्म एव परमसंत्ता भवति।

"जीवो ब्रह्मैव नापरः" इति तेषां मतम्। एक एव सत्ता द्विविधा व्यवह्रीयते। अज्ञानमूढः आत्मानं ब्रह्म च द्विधावगम्य बन्धनग्रस्तो भविष्यति। निर्गुणसगुणभेदेन ब्रह्म द्विविधः। निर्विकल्पः निराकारः अवर्णनीय भवति निर्गुणब्रह्म। भावात्मकरूपेणास्य अभिव्यक्तिः नैव सम्भवति। सगुणब्रह्म ईश्वर इति अभिधीयंते। स च कर्मानुसारेण सुखदु-खादिफलं प्रददाति। "मायोपहितं ब्रह्म" ईश्वर इति कथ्यते।

32. वेदान्तदर्शनम्

भारतीयदर्शनसम्प्रदायस्य शीर्षस्थानीयो भवति वेदान्तः। वेदस्य अन्तः वेदान्तः। अस्य शब्दस्य प्रयोगः उपनिषत्सु दृश्यते। "वेदान्तविज्ञानसुनिश्चितार्थाः" मुण्डकं 3/2/7 "यः वेदादौ स्वरः प्रोक्तरे वेदान्ते च प्रतिष्ठितः" इत्यादिना वेदान्तपदस्य प्रचीनता स्पष्टं भवति। वेदान्तस्य अद्वैत-विशिष्टा-द्वैत-शुद्धाद्वैत-द्वैताद्वैतादीन्नेकानि सम्प्रदायानि सन्ति।

33. योगः

युज्यते इति योगः। युजिर्। "योगः चित्तवृत्तिनिरोधः। परमात्मनि चित्तस्य प्रतिष्ठापनं योगः। अस्योपज्ञाता पतंजलिः। क्लेश-कर्मविपाक-शयैरपरामृष्टः पुरुषविशेषः ईश्वर इति योगमतम्। अयं सेश्वरसांख्यमिति व्यवह्रियते।

सांख्यम् - "सम्यक् ख्यायते प्रकाश्यते वस्तुतत्वं अनया इति संख्या, सैव सांख्यम्।" सांख्यसिद्धान्तानुसारेण जडाजडाभेदेन पदार्थः द्विधा। तत्र प्रकृतिमहस्तत्वादयः जडरूपेण कथ्यते।

अजडः पुरुषः। गणानां साम्यावस्था एव प्रकृतिः। सेवं प्रकृतिः जडात्मिकापि पुरुषार्थसिद्यर्थम्, स्वभावेनैव जगद्रूपेण परिणमति। प्रकृतिरेव उत्पत्तेः कारणम्। पुरुषः चेतनात्मकः। स च प्रकृतेः सान्निध्यवशात् सुखदुःखाननुभवन्निव वर्तते।

आत्मा न कर्ता, न च भोक्ता इति सांख्यमतम् अनुशास्ति। षड्दर्शनेषु प्रथमभूतस्य सांख्यसिद्धान्तस्य कर्ता कपिलः। सत्पदार्थस्य नाशः असत् पदार्थस्य च उत्पत्तिः वा न सम्भवति इति तन्मतम्।

34. अन्यथा

अन्यप्रकारार्थे। अन्यप्रकारे "यदभावि न तद्भावि भावि चेन्न तदन्यथा" इति हितोपदेशो। निष्कारणे इति मेदिनी। अभावार्थे च" अन्यथानुपपत्तिरिति"।

35. ज्ञानम्

ज्ञायते ब्रह्म अनेनेति ज्ञानम् इति वेदान्तवाक्यम्। निरुक्तकारणतावच्छेदकतया ज्ञानपदशक्यतावच्छेदकतया वा सिद्धज्ञात्वजातिमत्वमिति ज्ञानलक्षणम्।

न्यायवैशेषिकदर्शने विद्याविद्याभेदेन ज्ञानं द्विविधं मतम्। तच्च प्रत्येकं चतुर्विधम्-संशयविपर्ययानुध्यवसायस्वप्नभेदेन। विद्यापि प्रत्यक्षानुमानस्मृत्यार्षभेदेन चतुर्विधा।

वेदान्तदर्शने ज्ञानात्पृथक् नात्मा। ज्ञानमेवात्मा इत्युच्यते। ज्ञानमपि नित्यानित्यभेदेन द्विधं मतम्। अनित्यं ज्ञानं अन्तःकरणावच्छिन्नम् वृत्तिमाकमस्ति। विषयसान्निध्ये सति तदुत्पद्यते। तदभावे च विलीयते। नित्यं ज्ञानं ततो नितान्तं भिन्नम्। तत् सर्वथैव स्वसत्तां विदधाति। आत्मनः इदं वैशिष्ट्यं बोधयितुं आचार्यः शङ्करः आह - दृष्टिः द्विधा भवति। नेत्रदृष्टिरात्मदृष्टिश्च। नेत्रदृष्टिर्न नित्या भवति।

36. केरलम्

भारतस्य दक्षिणपश्चिमभागे दृश्यते अयं देशः। पुरा केरलेषु मलबार्-तिरुवितांकूर्-गोश्री कोच्चिन् इति नाम्ना त्रीणि क्षेत्राण्यासन्। तानि राज्यानि मद्रास्संस्थाने अन्तर्भूतान्यासन्। 1956 तमे वर्षे तानि राज्यानि एकीकृत्य कासर्कोट्तालुकेन सह संयुज्य "केरलम्" नाम एकं नूतनं संस्थानमाविष्कृतम्। तत्रत्या देशीयभाषा "मलयालं" भवति।

अस्य देशस्य संज्ञायाः निष्पत्तिमधिकृत्य भाषाचरित्रपण्डितानां विभिन्नाभिप्रायाः सन्ति। संस्कृतभाषायां चकारस्य ककारादेशं भूत्वा "चेरलम्" एव केरलमिति नाम्ना प्रसिद्धः अभवदिति केचन पण्डिताः वदन्ति। केषाचिन्मते "केरान् लातीति" केरलपदस्य निष्पत्तिः। "उप्पलम्" इत्यत्र विद्यमानं अलं चेरपदेन संयुज्य "चेरलम्" इति यत् पदं निष्पन्नं तदेव केरलमिति संज्ञया प्रसिद्धं अभवत्। क्रिस्तोः पूर्वम् चतुर्थशतके कात्यायनः केरलपदेनैव अस्य प्रदेशस्य व्यवहारं कृतवान्। पूर्वम् पतंजलिमहाभागेन महाकविकालिदासेन च "केरलम्" इति पदस्य प्रयोगः कृतः। रघोः आक्रमणावसरे भयचकिताः केरलीययोषितः खकीयान्याभरणानि त्यक्त्वा प्रधाविताः आसन्निति कालिदासेन वर्णितम्। ततः पूर्वं वाल्मीकिना अपि "केरलम्"

वर्णितम्। कुरुक्षेत्रे पाण्डवसैन्यसाहायार्थम् केरलीयाः भटाः आगताः इति महाभारते कश्तिच् परामर्शः विद्यते। पाण्डवसैन्यस्य भोजनादानार्थम् "पेरु चोट्टुति यन्" इति कञ्चित् चेरराजा उद्युक्तः आसीदिति चरित्रेषु दृश्यते। येन केनापि कारणेन क्रिस्तुवर्षारम्भात्पूर्वमेव उत्तरभारतीयानां "केरलमिति" पदं सुपरिचितमासीत्। "कृतमालामलयाचलपश्चिमाम्भोधिमध्ये" इति मत्स्यपुराणे केरलदेशस्य सीमायाः परामर्शः विद्यते।

37. आर्यशर्मा

अस्ति केरलेषु "मलप्पुरम्" मण्डले "पुलामन्तोल्" नाम कश्चित् ग्रामः। ग्रामेऽस्मिन् प्रवहन्त्या "तूतप्पुषा" नाम्न्याः नद्याः तीरे सुप्रसिद्धेषु अष्टवैद्य कुटुम्बेषु एकतमः "पुलामन्तोल् मूस्" इति नाम्ना विख्यातः वैद्यकुटुम्बः वर्तते। एते वैद्यपरिवाराः वैद्यकविषये अतिनिपुणाः आसन्। कदाचिदस्मिन् कुटुम्बे "आर्यशर्मा इति अतिनिपुणः कश्चित् वैद्यः आसीत्। एते सामूतिरिमहाशयस्य राजवैद्यपदवीम् अलङ्कृतवन्तः। चतुर्दशाशताब्धाः सप्तदशशताब्द्याश्च मध्ये उपर्युक्ते वैद्यकुटुम्बे "आर्यन् मूस्" इति नाम्ना प्रसिद्धः कश्चिद्वैद्यः आसीत्। तेन च "आत्मस्वरूपकथनम्" अष्टाङ्गयोगकथनमित्यादि अनेकान् विषयानधिकृत्य "सदाचारवृत्तिवर्तनम्" नाम ग्रन्थः रचितः।

38. पञ्चात्मकत्वम्

ज्ञानाधिकरणमात्मा इति तार्किकाः। आत्मा च जीवात्मपरमात्मभेदेन द्विविधाः। जीवात्मा तु प्रतिशरीरं भिन्नः। अत्र तु प्रपितामह-पितामह-पिता-पुत्र-पौत्ररूपेण पञ्चवंशपरम्परा विवक्षिता।

39. ज्ञानेन्द्रियाणि

"इन्द्रियमिन्द्रिलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्दरजुष्टमिन्द्रदत्तम्" इति पाणिनिः। इन्द्रस्यात्मनो लिङ्गम्। ज्ञानक्रियासाधनेष। चक्षुरादौ हस्तादौ च। इन्द्रियं च द्विविधम् - ज्ञानकर्मेन्द्रियभेदात्। तत्र श्रोत्रादीनि ज्ञानेन्द्रियाणि। हस्तादीनि कर्मेन्द्रियाणि।

"श्रोत्रं त्वक् चक्षुषो जिह्वा नासिका चैव पञ्चभिः।

पायुपस्थां हस्तपादं वाक् चैव दशमी स्मृता।। इति मनु

40. मनः

"उभयात्मकमत्र मनः, सङ्कल्पकमिन्द्रियं च साधार्म्यात्। गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च। न्यायदर्शनानुसारेण युगपत् ज्ञानानुत्पत्तिर्मनसो लिङ्गम्। सुखदुःखादिज्ञानस्य साधनरूपेण वर्तते मनः।

"मनस्त्वभिसम्बन्धनात् मनः" इति वैशेषिकाः। समवायसम्बन्धेन मनस्त्वजातिः यत्र दृश्यते स एव मनः। तेषां मते संख्यपरिणामपृथक्त्वसंयोगविभागपरत्वापरत्ववेगगुणयुक्तः। मनः संयोगादेव बाह्येन्द्रियाणां स्वस्वविषयग्रहणं सम्भवति। सुखदुःखादीनां प्रत्यक्षकरणं मनः।

41. बुद्धिः

विकारस्य प्रथमा कृतिः महत् अथवा महानित्युच्यते। मनोऽहंकारयुक्ता सा बुद्धिरेव समस्तसृष्टेः कारणम्। "अध्यवसायो बुद्धिः" इति सांख्यमतानुयायिनः। उद्यम एव बुद्धिरित्यर्थः । सा च नित्यानित्यभेदेन द्विविधा। अध्यवसायेन ज्ञातृज्ञेयभेदः घोतते। स्वयंप्रकाशनं तथा अन्यवस्तूनां प्रकाशनं च बुद्धेःस्वाविको धर्मः। स्वाभाविकगुणाधिक्येन बुद्धौ धर्मज्ञानवैराग्यैश्वर्याणां वृद्धिः भविष्यति। आत्मभिन्ना बुद्धिः। आत्मा च द्रव्यगुणातीतः। ज्ञानादिव्यापाराणामाश्रयभूता बुद्धिः। सत्वगुणप्राधान्येनात्मा अस्मिन् प्रतिबिम्बभावेन दृश्यते। तेन बुद्धिः प्रकाशयुक्ता भविष्यति। "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्" इति न्यायसिद्धान्तानुयायिनः। समस्तव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्"। स्मृत्यनुभवभेदेन बुद्धिः द्विविधा। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः। यथार्थायथार्थभेदेन अनुभवोऽपि द्विविधः।

"सर्वव्यवहारहेतुर्गुणो बुद्धिः ज्ञानम्" इति वैशेषिकाः। पूवोक्तप्रकारेण स्मृत्यनुभवभेदेनास्य द्वैविध्यं स्वीक्रियते। यथार्थायथार्थभेदेन च अनुभवस्य प्रकारद्वयं तैरुक्तम्। तेषां मते अयथार्थानुभवः संशयविपर्ययतर्करूपेण त्रिविधः।

42. अहंकारः

महतः अहंकारस्योत्पत्तिर्जायते। मम इति भावः अहंकारः। "अभिमानोहंकारः" इति कपिलः। अहंकारः व्यावहारिकः। अहंकारवशात् पुरुष स्वयं कर्ता-कामि-स्वामिभावेनावगम्यते। संसारस्य समस्तव्यवहारहेतुभूतः अहंकारः। सात्विक राजस-

तामसभेदेनाहंकारस्त्रिविधः। सत्वगुणप्रधानः सात्विकः, रजोगुणप्रधानः राजसः, तमोगुणप्रधानः तामसः।

43. अक्षरः

न क्षरतीत्यक्षरः। परब्रह्मणि कूटस्थो चैतन्ये "अक्षरं परमं ब्रह्मेति" गीता। "क्षरः सर्वाणि भूतानि कूटस्थो क्षर उच्यते" इति। "यस्मात्क्षरमतीतोऽहं अक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितोः पुरुषोत्तमः" इति। अश्नुते व्याप्नोति वेदादिशास्त्राणि। अश् - सरन्। उक्तं च गीतायाम्- "अक्षराणामकारोस्मि द्वन्द्वसामासिकस्य च" इति। "अक्षरं वर्णनिर्माणं वर्णमप्यक्षरं विदुः"।

44. क्षरः

क्षरति स्पन्दते मुञ्चति वा क्षरः

प्रथमाध्यायस्य सारः

सदाचारवृत्तिवर्तनस्य प्रथमाध्याये कविः आर्यशर्मा सर्वप्रथमं नमस्कारात्मकं मङ्गलमाचरति। नमस्कार्या देवास्सन्ति गोपतिः, वाणी, गणेशः, षडाननः, ब्रह्म, नारायणश्च। देवान् प्रति नमस्कारानन्तरं कविना सज्जनानां गुरुणां तथा सज्जनानामपि चर्चा कृता। एवंप्रकारेण महाकाव्यस्य संघाटकेषु तत्वेषु केषांचित्परिपालनं तेनात्र कृतम्। मङ्गलाचरणमनुसृत्यैतत् निश्चितरूपेण कथयितुं न शक्यते यत् कं सम्प्रदायमवलम्बते इति। वस्तुतः तेन भगवतः शङ्करस्य भगवतः विष्णोः तथा योगशक्तेश्च यत्र तत्रोल्लेखः कृतः। अतः निश्चितरूपेणास्य सम्प्रदायविषये किमपि वक्तुं न शक्यते।

प्रथमाध्याये तेन अनेकेषां शास्त्राणामनेकेषां विषयाणां च उल्लेखः कृतः। अतः एतदपि निश्चेत्तुं न शक्यते यत् सः कतमं शास्त्रमधिकृत्य कं वा विषयमवलम्ब्य ग्रन्थमेनं रचितवान्। कस्याप्येकस्य विषयस्य न तु समग्ररूपेण तेनोपस्थापनं कृतम्, न वा कतमं प्रतिपादनम्। सः क्वचिदायुर्वेदस्य, क्वचित् धर्मशास्त्रस्य, क्वचित् नीतिशास्त्रस्य क्वचिच्च दर्शनशास्त्रस्य विभिन्नानां विषयाणामुल्लेखं करोति। अतः समग्रा क्वंचित् दृष्टिः अस्मिन्नध्याये नोपलभ्यते। तथापि स्थूलरूपेणैतत् कथयितुं

शक्यते यदत्र तेनात्मनः स्वरूपं निर्णेतुं प्रयत्नः कृतः। किन्तु आत्मनः स्वरूपमपि अस्मिन्नध्याये स्पष्टतया न दृश्यते। एतत्प्रतीयते यत् कवेर्मनसि विभिन्नाः भावाः उद्भूताः तेषां निबन्धनं तेन छन्दोबन्धरूपेण कृतम्। किन्तु श्लोकानां यः क्रमः अत्रोपलभ्यते, तस्मिन् पौर्वापर्यादीनांः पारस्परिकसम्बन्धस्य वा निर्वाहः न दृश्यते।

प्रथमाध्याये एकत्रिंशत्श्लोकादारभ्य एकपञ्चाशत्श्लोकपर्यन्तं ग्रन्थपातः अप्यस्ति। अत्र कविना किं लिखितमिति ज्ञातुं न शक्यते।

प्रथमाध्याये कविना स्वकीयः जीवनपरिचयोऽपि दत्तः। किन्तु तत्रापि समग्रता नास्ति। एतदेव ज्ञातुं शक्यते यत् सः एकस्मिन् वैद्यपरिवारे जन्म लेभे। एवं च तस्य पितामहस्य नामापि आर्यशर्मा आसीत्। स्वकीयकालविषये तेन किमपि नोक्तम्। अतः एतत् स्पष्टमस्ति यत् कस्मिन्नपि विषये कविना अनेन काव्यरचनापरम्परानुरूपं यदावश्यकं भवति तस्य निर्वाहः पूणतया न कृतः। तथापि केषुचिद्विषयेषु तस्य विचाराः अवधेयाः सन्ति।

द्वितीयोऽध्यायः

ज्ञानकल्पे अनात्मनिरसनम्

येषां स्मरणमात्रेण सर्वानर्थोऽपि नश्यति।
निर्मत्सराः सतां श्रेष्ठास्ते सन्तु हृदये मम।। 1
सन्तः सन्तु सदा सर्वे मनःस्सन्तोषकारकाः।
सन्तापस्योपशान्त्यर्थम् जीवात्मन्यमृतप्रदाः।। 2
पिता पितामहश्चैव पितरो ये च सन्ति मे।
काश्यपादिमहात्मानः सन्तु मे हृदयं गमाः।। 3
यदर्थम् यतवानस्मि तत्कार्यस्याशुसिद्धये।
अनुगृहण्वन्तु पितरः काश्यपाद्याः प्रजेश्वराः।। 4
रूपनामकुलाचारधर्मपाशेन यन्त्रितः।
लोकेऽहं किङ्करोऽस्मीति उत्कण्ठा जायते हृदि।। 5
अव्यक्तोऽहं पुराज्ञानादात्मज्ञानसमुत्सुकः।
स्वरक्तो रागवानस्मि, व्यक्तः सन्मार्गतां गतः।। 6
प्रत्यक्षं रागतः सिद्धं गोचरस्तु तदात्मनः।
आत्मरश्म्यावभासत्वादात्मछायेति तत्स्मृतम्।। 7
वैराग्यतः परोक्षं स्यादात्मनिर्विषयोऽत्र तु।
केवलात्मप्रकाशत्वाद् द्रष्टान्यो नाऽत्र सम्भवेत्।। 8
गोचरार्थस्तु गौणः स्यान्मुख्यो निर्विषयः स्मृतः।
परोक्षवादो वेदः स्यात् गौणार्थः छायया कृतः।। 9
एतत् स्वरूपसौख्यं स्याद् वेदवेद्यतया द्विधा।
छायावलोकनाच्चैव स्वंसंवित्तिश्च सम्भवेत्।। 10
गाणैर्थम् चैव मुख्यार्थमित्युभुयं गृहण्वते द्विजाः।
अद्वैतवादी बौद्ध स्यात् भ्रान्त्यर्थम् तत्र राजते।। 11

केवलानवलोकत्वात् स्वविभंशो भविष्यति।
अतो नानावलोकेन स्वसवित्तिर्धने भवेत्।। 12
अर्थाख्यं स्वं स्वविभ्रंशात् सर्वनाम न यास्यति।
नानाप्रकारभिन्नत्वात् तथा स्वं ज्ञाति वाचकम्।। 13
स्वविभ्रंशकृतोऽनर्थस्त्वर्थ भ्रान्त्यावलोकितः।
यत्र रागादि षड्वर्गाः षाडवर्गिक सुखच्छिदाः।। 14
आत्मात्मीयस्वविभ्रंशात् मूढो ज्ञातिधनान्धधीः।
अद्वैतवादी भ्रमति वेदार्थस्य विपर्ययात्।। 15
उत्तमाङ्गेन पश्यन्ति अधः कायाः देहिनः।
अधःकायसमालोकादुत्तमाङ्मनुमीयते।। 16
गौणं प्रत्यक्षतः सिद्धं मुख्यार्थस्त्वनुमानतः।
पूर्वकाण्डे तु मुख्यार्थो ज्ञानं कर्मैवतूत्तरे।। 17
विधिरूपनिषेधत्वात् भूतमात्रं विशिष्यते।
अनुमानात् पुनर्यज्ञे यद्भूतं तन्न पश्यति।। 18
प्रत्यक्षेणानुमानेन भ्रान्त्यर्थो भ्रान्तिरेव च।
दुःखावसानमर्थम् तद् अर्थमित्यभिधीयते।। 19
स्वर्गकामस्तु यजतामित्यस्यार्थमिहोच्यते।
आत्मानं गन्तुकामश्चेद्यजेदात्मा स्वमुच्यते।। 20
मुख्यार्थमेवं जानीयादथ गौणार्थ उच्यते।
स्वर्गस्तु सुरलोकः स्यात्तत्कामस्तु यजेदिति।। 21
आत्मनश्चेन्द्रियाणां च सुखार्थोऽर्थद्वयं स्मृतम्।
जीवात्मा परामात्मेति गौणामुख्यार्थावत्मनः।। 22
भिन्नश्चिन्त्यः परो जीवसङ्घात् सूत्रमिदं पुरा।
प्रवृत्तं व्यासमुखतत्तस्माज्जीवपरो भवेत्।। 23
परमात्मा स्वविभ्रंशात् जीवात्मत्वं प्रपद्यते।
स्वावलोकाच्च जीवात्मा परमात्मत्वतामियात्।। 24

यदात्मीयमालोक्य किमिदं त्विति मोहितः।
तदा जिज्ञासया जीवः स्वविभ्रंशेन जायते।। 25
ऋग्यजुस्सामेवेदेभ्यश्चाथर्वा सम्भविष्यति।
इत्येवं चतुरो भेदान् स्वस्मिज्जीवावलोकिता।। 26
स्वविभ्रंशोन्यथालोको स्याद्बोधः स्वचिन्तनम्।
जीवात्मनि चतुर्वेदं स्वविभ्रंशाद्विकल्पितम्।। 27
एवं चतुर्विधं वेदं जीवजिज्ञासया कृतम्।
स्वबोधे तु चतुर्वेदं प्रशान्तं स्वावलोकनात्।। 28
इत्थं जिज्ञासया जीवः स्वस्मिन् निर्वृतवानभूत्।
अथ वेदाश्च चत्वारः स्वस्मिन्नेव विलीयते।। 29
ज्ञातुमिच्छैव जिज्ञासा सा च बुद्धिरिति स्मृता।
आत्मन्यात्मस्मृतिभ्रंशाद् बुद्धिर्बोधप्रदा भवेत्।। 30
परमात्मा स्वविभ्रंशात् स जीवो बुद्धिमान् भवेत्।
जीवस्तु बुद्धिविभ्रंशादयथाज्ञानवान् भवेत्।। 31
अर्थाभासं तु तद्विद्यात् केचिन्मायेति तद्विदुः।
भ्रान्तिरित्यपरे प्राहुर्मोहोऽयमिति कैचन।। 32
तदेष पञ्चमो वेदश्चतुर्वेदविपर्ययात्।
प्रत्यक्षवादमनृतम् ऐन्द्रियं वेदमुच्यते।। 33
साक्षाद्वस्तुतिरस्कारादन्यथा तस्य धारणम्।
अनर्थे अर्थ परिज्ञानं अर्थे अनर्थावलोकनम्।। 34
स्वस्मिन्नस्वपरिज्ञानमस्वे स्वत्वावलोकनम्।
परेषु स्वपरिज्ञानं स्वस्मिन् परविलोकनम्।। 35
अनात्मन्यात्मनो भावमात्मभावमनात्मनि।
व्यावहारिकवेदीयमेन्द्रियं वेदमात्मनः।। 36
अन्योन्यव्यवहारं चात्मनः सुखकारणम्।
प्रत्यक्षं च परोक्षं च अन्योन्याभिमुखस्थितम्।। 37

सुखायैव भवेन्नूनमन्यथा दुःखमश्नुते।
अन्योन्यदर्शनाभावश्च केवलानर्थसूचकः।। 38
व्यावहारिकसत्यं स्यादात्मच्छायानिरीक्षणम्।
तदात्मीयं विजानीयात् तदृष्टात्मा स्वसंस्थितः।। 39
व्यावहारिकसत्यं तु वेदमित्यवधार्यताम्।
तेनात्मा विद्यते वेद्यो तदेवात्मसुखं स्मृतम्।। 40
आत्मात्मनि स्वविभ्रंशाद्वेदो भूत्वा बहिश्चरः।
नानामार्गवलोकेन नानारूपं समीक्षते।। 41
तत्रापि च स्वविभ्रशादैन्द्रियं वेदमास्थितः।
व्यवहारिकसत्येन आत्मैवावतिष्ठते। 42
व्यावहारिकसत्येषु नानामार्गवलोकनात्।
मुख्यं गौणादिभेदेन बोध्यबोधकता भवेत्।। 43
तदात्मीयं विजानीयात् वेदमित्यभिधीयते।
स वेद्यः शब्दगम्यत्वादक्षरः क्षरणात्क्षरः।। 44
बाह्याभ्यन्तरेभेदत्वादेकात्मा द्विविधः स्मृतः।
क्षरो बाह्यगतं रूपमान्तरं ध्यानगोचरम्।। 45
आत्मत्वं ध्यानगम्यत्वात् स्वानुभूत्या तु निर्वृतिः।
बाह्यं त्वभिमुखालोकात् परत्वं प्रतिपद्यते।। 46
मुख्यो क्षरो विधिः प्रोक्त अरूपोऽनर्थ एव च।
गौणरूपो क्षरोऽनर्थ स निषेध इति स्मृतः।। 47
न गौणो न च मुख्यश्च स्वीयो न च पर स्मृतः।
न बाह्या नान्तरा रूपी न वेदो वेदतः परः।। 48
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः।। 49
वेदात्पूर्वपरं यश्च मध्ये वेदात्मकश्च यः।
आद्यन्ते व्यक्तसंस्थो यः मध्ये व्यक्तः स एव च।। 50

आद्यन्ते स्वमिति ज्ञानं मध्ये कुण्डलसंस्थितम्।
आद्यन्तस्वर्णशकलं स्ववाचिधनसंस्थितम्।। 51
उपकाराय न भवेत् निर्विकारान्नकार्यकृत्।
विकारः कार्यकृन्नूनं तस्मात्कार्यम् करोम्यहम्।। 52
अव्यक्तंः कर्तुमात्मानं वेदं कल्पितवान् स्वयम्।
तदात्मीयमिति ज्ञेयमात्मत्वं तेन जायते।। 53
तदा स्वत्वं परत्वं च वेदो वैद्य इति श्रुतः।
तस्मात्कालत्रयं जातं तदात्मज्ञानमुच्यते।। 54
अस्वभावसमुद्भूता श्रुतिरत्यन्तभीषणा।
पुंश्चली पुरुषान् सर्वान् स्ववशेस्थाप्य मुञ्चति।। 55
वैद्याभिमानिनं मां तु दयारूपेण बाधिता।
मया सा खण्डिता मूढा दासीस्थाने निवेशिता।। 56

इति

ज्ञानकल्पे आनात्मनिरसनं नाम द्विंतीयोऽध्यायः

द्वितीयाध्यायस्य टिप्पणी

1. निर्मत्सराः

मद् हर्षे - "वुधूमादिभ्यः षित्"। असह्यपरसम्पत्तिः। मात्सर्यगुणयुक्तः। "न नत्सराः नातिरुष्टा नातिलुब्धा न कासुकाः।।" कृपणः इत्यमरमेदिनीकारौ। आत्मधिक्कारविशेषः। यथा -

"निन्दन्ति नां सदा लोका धिगस्तु मम जीवनम्।
इत्यात्मनि भवेद्यस्तु धिक्कारो स, च सत्सरः।।"

2. सन्तः

सन्। अस्ति इति। अस् शतृ। सूरिः, प्राज्ञः, पण्डितः, धीरः, सत्यम्, अभ्यर्हितम्, प्रशस्तम्, विद्यमानम्।

"दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सः।

मणिना भूषितः सर्पः किमसौ न भयंकरः।।" इति हितोपदेशे। साधु "रामं नमति सानन्दं धर्मानभिनिविश्य सन्" इति मुग्धा बोधे। वली ब्रह्म ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।

ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा।। इति भगवद्गीतायाम्।

"सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते।

प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ उच्यते।।" यतो विद्यमानजन्मनि उत्कृष्टचरिते च सदित्येतत्प्रयुज्यते अतो यज्ञादिकर्मणि प्रथमतः सच्छब्दः प्रयुज्यते" इति भगवत्गीताव्याख्या।

3. जीवात्मा

यो घ्राणादिना करणानां प्रयोक्ता स आत्मा। (वै.उ3/2/21) जीवात्मेवायं क्षेत्रज्ञादिपदवेदनीयः (सिं.च आत्मा पृ 12) जीवलक्षणं च इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् (गौ 1/1/10) इति। सुखदुःखादिकम् (त.दी. 2 पृ 22) इति वा। जन्यज्ञानाधिकरणत्वम् (सि.च 2 पृ 22) इति वा। जीवसद्भावे, पमाणं प्रत्यक्षमेव। जीवस्य अहं सुखी अहं दुखी इत्यादि मानसप्रत्यक्षविषयत्वात् इति नैयायिकाः (प्र.प्र.प्रमे.पृ 10) मु 2। जीवो न मानसप्रत्यक्षविषयः इति वेशेषिकाः आहुः। अयमाशयः अहं सुखीत्याद्याकारकं योग्यविशेषगुणयोगेनैवात्मनः। जीवस्य प्रत्यक्षं न तु वेकलं अहमित्याकारकम् इति (त.व. प्रमाणपरि. उश्लो. 51 मु.)। 9आत्मा पृ 105 वै 3/2/28 भा.प. श्लो.50)। जीवस्य प्रत्यक्षत्वे विप्रतिपत्तौ तु अनुमानमेव इन्द्रियार्थाभिन्नस्य जीवस्य सद्भावे प्रमाणम्। तत्र लिङ्गमुच्यते। प्राणापाननिमेषोन्मेष जीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि वे (.3/2/4)। सुषुप्तिदशायामपि प्राणापानयोरूर्ध्वाधोगत्योरनुकूलं प्रयत्नान्तरं जीवनयानिरूपमस्त्येवेति। एवं निमेषोन्मेषावपि शरीराधिष्ठातारमनुमापयतः इत्यादि (वै.उ. 3/2/4)। आत्मेन्द्रियार्थसन्निकर्षाद्यनिष्पद्यते तदन्यत् (वै.3/2/18) इच्छा प्रणिधानम् प्रणापानौदिः निमेषादिः क्षतसंरोहणादित्येवमादीनि लिङ्गानि आत्मानम् जीवात्मानम् गमयन्ति (त.व. श्लो. 2-28 पृ. 238 भा प. श्लो. 48-51)। इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य

हेतुः (वे.3/1/2) अनुमानप्रयोगस्तु रूपादिसाक्षात्कारो द्रव्याश्रितः गुणत्वाद्रववत् इत्यनुमानेनेतरबाधसहकृतत्वेन आत्मनः सिद्धिः (वै.वि. 3/1/2)। प्रसिद्धिः क्वचिदाश्रिता कार्यत्वात् घाटक् गुणत्वात् क्रियत्वाद्वा। सा च प्रसिद्धिः करणजन्या क्रियत्वात् छिदिक्रियवत्। यच्च प्रसिद्धेः करणं तदिन्द्रियम्। तच्च कर्तृप्रयोज्यम्। करणत्वात् वास्यादिवत्। तथा यत्रेयं प्रसिद्धिराश्रिता यो प्राणादीनों करणानां प्रयोक्ता स आत्मा (वै.उ.3/1/2)। बुद्ध्यादयः पृथिव्याद्यदृष्टद्रव्यातिरिक्तद्रव्याश्रिताः। पृथिव्याद्यदृष्टद्रव्यानाश्रितत्वे सति गुणत्वात्। यस्तु पृथिव्याद्यदृष्टद्रव्यातिरिक्तद्रव्याश्रितो न भवति नासौ पृथिव्याद्यष्टद्रव्यानाश्रितो गुणो भवति यथा रूपादि इति केवलव्यतिरेक्यनुमानम् (त.भा. प्रमेय- पृ.25)

4. अमृतप्रदाः

न मृतः अमृतः। मरणशून्ये जीविते। "अमृते जारजः कुण्डः" इत्यमरः "अपाम सोमममृता अभूम" इति श्रुतिः। मरणं चात्र "अभूतसंप्लवस्थानममृतत्वं हि भाष्यते" इति विष्णुपुराणो उक्तम्। महाकल्पावस्थायित्वं, देवानामपि तथैवामृतत्वं, "कार्यत्यये तदध्यक्षेण सहातः परमाम्नायात् "कार्य ब्रह्मणा सह सर्वेषां लयाभिधानात् (1) न मृतं मरणं यस्मात्। (2) पीयूषे तत् सेवने हि अमृतत्वं भरतादौ प्रसिद्धम्। तच्च प्रथमं पृथूपदिष्टैः देवैः इन्द्रं वत्सं कृत्वा गोरूपधरायाः पृथ्वा दुग्धं पश्चाच्च दुर्वासःशापात् समुद्रमध्यं गतं ततो देवासुरैः समुद्रो मथिते पुनरुत्पन्नमिति पौराणिकी कथा अनुसन्धेया। जले, तस्य प्राणहेतुत्वादमृतत्वम्। "अन्नमयं हि सौम्य। मन आपोमयः प्राणः" इत्युपक्रम्य षोडशकलः सौम्यः पुरुषः पंचदशाहानि माशीः काममपः पिषामोयमयः प्राणो न विच्छेत्स्यते"। इति छान्दोग्योपनिषत्। जलपानाभावे प्राणाविच्छेदत्वोक्तो तत्पाने च प्राणवृद्धे जलस्य मरणहेतुत्वम्। "अमृतोपस्तरणमसि स्वाहा" "अमृतापिधानमसि स्वाहा" इति आपोशनमन्त्रः।

अन्ने "अन्नमूलं हि जीवनम्" इत्युक्तेः तथात्वम्। न म्रियते क्षीयते इत्यमृतम्। मोक्षे, "विद्ययामृतमश्नुते" इति श्रुतिः। क्षयशून्यत्वात्तथा "अमृतस्यैव सेतुरिति स्तुतिः। अमृततुल्ये आनन्दकरत्वात् तथा। "अमृतं बालभाषितम्" इति हितोपदेशः। धान्वन्तरो, स हि समुद्रमथनसमये अमृतं बिभ्रत् उत्थित इति पुराणे प्रसिद्धम्। मरणशून्ये विष्णौ,

"अमृतः शाश्वतः स्थाणुः"। इति विष्णुसहस्रनामे।

5. काश्यपः

काश्यं मद्यं पिबत्यत्र। (1) मांसे। मांसस्य मद्यपानव्यभिचारात्तथात्वम्। काश्यं राजभेदं पाति नरकादिति। काश्यस्य नृपस्य। (2) पुत्रभेदे काश्यशब्दे। (3) कश्यपस्य गोत्रापत्यं, कश्यपगोत्रापत्से। (4) कणादे मुनौ। (5) मृगेदे कश्यपस्येदम्। कश्यपसम्बन्धीति।" एषः एव दितेर्गर्भः ओजः काश्यपमर्पितम्।" भाग. 3.25 (6) पृथिव्याम् स्त्री (7) कश्यपकन्या स्त्री काश्यपेयः। कश्यपगोत्रोत्पन्ने (9) विषचिकित्साभिज्ञे। (10) ऋषिभेदे।

6. कुलाचारः

कुलोचिते धर्म्मे

"जीवः प्रकृतितत्वं च दिक्कालाकाशमेव च।
क्षित्यप्तेजोवायवश्च कुलमित्सभिधीयते।।"
"ब्रह्मबुद्ध्या निर्विकल्पेष्वेतेषु आचरणं च यत्।
कुलाचार स एवोक्तो धर्मकामार्थमोक्षदः।।" इत्युक्तरूपे सर्वत्र ब्रह्मदृष्टिसाधके

(2) ज्ञानभेदे तन्त्रोक्ते (3) आचारभेदे च। तन्त्रसारे तदाचारप्रकारो दर्शितो यथा - "कालीतन्त्रे -

अथाचारं प्रवक्ष्यामि यत्कृते मृतमश्नुते।
सर्वभूतहिते युक्तः समयाचारपालकः।।
अनित्यकर्मसंत्यागी नित्यानुष्ठानतत्परः।
मन्त्राराधनमात्रेण शिवभागेन तत्परः।।
परस्यां देवतायां तु सर्वकर्मनिवेदकः।
अन्यमन्त्रार्चनश्रद्धा अन्यमन्त्रप्रपूजनम्।।
कुलस्त्रीवीरनिन्दां च तद्द्रव्यस्यापहरणम्।
स्त्रीषु रोषं प्रहारं च वर्जयेन्मतिमान् सदा।।
स्त्रीमयं च जगत्सर्वम् स्वयंभूवत्तथा भवेत्।
कुलजां युवतीं वीक्ष्य नमस्कुर्यात्समाहितः।।
यदि भाग्यवशात् देवि कुलदृष्टिः प्रजायते।

तदैव मानसीं पूजां तत्र तासां प्रकल्पयेत्।।" तासां भगादिदेवीनाम्।
तास्तु "भगिनीं भगचिन्तां च भगास्यां भगनामालिनीम्।
भगदत्तां भगाङ्गां च भकर्णाम् भगत्वचाम्।।
भगनासां भगस्तनीं भगस्थां भगसर्पिणीम्।" इत्यादयः।
कालितन्त्रे - "दिक्कालनियमेनात्र स्थित्यादिनियमो न च।
जपे न कालनियमो नार्चनादिबलिष्वपि।।
स्वेच्छानियम उक्तं च महामन्त्रस्य साधने।
वस्त्रास्तरस्थानदेहागारपुष्पादिवारिणः।।
शुद्धिं नाचरेत्तत्र निर्विकम्पं मनश्चरेत्।"
कुलार्णवे - "कुलाचारागृहाङ्गत्व भक्त्या पापविशुद्धये।
याचयेदमृतं कौलं तदभावे जलं पिबेत्।।
कुलाचारेण यद्दत्तं कृत्वा पात्रेण भक्तितः।
नमस्कृत्य च गृह्णीयादन्यथा नरकं व्रजेत्।।"
अन्यत्रापि "न वृथा गमयेत्कालं धूतक्रीडादिना सुधीः।
गमयेद्व्रतपूजाजपयागस्तवादिना।।"
"ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः"

7. रागवान्

रागः अस्यास्तीति रागवान। (1) रागो नामासक्तिलक्षणो दोषः। यथा तृष्णा (वात्स्या.4/2/3) (ख) पुनःपुनः विषयानुरंजनेच्छा (प्रशस्त. 2 पृ. 33) रागलक्षणं च उज्वलमणिनोक्तम् -

"सुखमप्यधिकं चित्ते सुखत्वेनैव रज्यते।
यतस्तु प्रणयोत्कर्षात् स राग इति कथ्यते।।" इति। वाचस्पत्यम् (ग) सुखाभिज्ञस्य सुखानुस्मृतिपूर्वकः सुखसाधनेषु तृष्णाख्यः गर्धोरागः (3) गायकास्तु निषाददिस्वरयोनिकः स्वरविशेषः इत्यभिप्रयन्ति। तत्स्व रूपं तु

"यैस्तु चेतांसि रज्यन्ते जगव्त्रितयवर्तिनाम्।
ते रागा इति कथ्यन्ते मुनिभिर्भरतादिभिः।।" इति वाचस्पत्यम्।

8. प्रत्यक्षम्

अक्षमक्षं प्रतीत्योत्पद्यते इति प्रत्यक्षमिति व्युत्पत्तिः। अक्षाणीन्द्रियाणि घ्राणरसनाचक्षुस्त्वक्श्रोत्रमनांसि षट् (प्रशस्त.गु.पृ.25) प्रतिगतमाश्रितमक्षम्। अत्यादयः क्रान्ताद्यर्थे द्वितीयया (2/2/18 पा. सूत्रे) वार्तिकम्) इत्यनेन समासः। प्राप्तापन्नालंगतिसमासेषु परवल्लिङ्गप्रतिषेधात् अभिधेयवल्लिङ्गे सति सर्वलिङ्गः प्रत्यक्षशब्दः (सिद्धः न्या. वि. ।पृ.7)।

"इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षंम्" (गौ 1/1/4 त.स. मु/2/3पृ.108)। तदर्थस्तु अव्यपदेश्यमशाब्दं ज्ञानम् (वात्स्या. 1/1/4) "निर्विकल्पज्ञानम्" गौ.वृ.1/1/4।) "अव्यभिचारिभ्रमभिन्नं ज्ञानम् (वात्स्ता.गौ.वृ)। व्यवसायात्मकम् कविकल्पकम् (वात्स्ता.1/1/4 गौ.वृ.1/1/4)। अत्रेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति प्रत्क्षलक्षणे आत्ममनःसंयोगजन्यसुखादिवारणाय ज्ञानमिति पदं दत्तम् (गौ.वृ.1/1/4।) इन्द्रियत्वावच्छिन्नकारणतानिरुपितकार्यताशालिज्ञानत्वमित्यर्थः इति प्रा चः आहुः म.प्र.। पृ.8)। इदं च जन्यप्रत्यक्षस्यैव लक्षणमिति वोध्यम्। तंदुत्पत्तिप्रकारस्तु - आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन। ततः प्रत्यक्षज्ञानमुत्पद्यते (वात्स्या.1/1/4 तर्कभा.पृ.6। अत्र प्रत्यक्षत्वं च ज्ञानव्याप्यजातिविशेषः।

(क) प्रत्यक्षं प्रति विषयस्य तादात्म्यैन हेतुत्वमिति नैयायिकानुभवसिद्धः कार्यकारणभावः। भाट्टास्तु विषयस्य कार्यकालिकवृत्तित्वमेव हेतुत्वमङ्गीचक्रुः। (ख) ज्ञानकारणकं ज्ञानं प्रत्यक्षम् (न्या.बो. 2 पृ. 22 मु2/3 पृ. 209) ज्ञानकरणकत्वव्यभिचारिजातिशून्यज्ञानत्वमिति विवक्षितोर्थः। (द्वि.2/3 पृ. 103)। इदं च जीवेश्वरोभयोप्रत्यक्षसाधारणं लक्षणमिति विज्ञेयम्। (न्या.बो.। 22)। तथा च ईश्वरप्रत्यक्षत्वस्य नित्यत्वेन न किंचिदपि कारणमस्ति। जीवप्रत्यक्षस्य च इन्द्रियमेव कारणं न किंचिदपि ज्ञानं करणम्। एवं च उभयोः प्रत्यक्षयोः ज्ञानकरणकत्वमक्षुण्णमेवेति लक्षणसमन्वयः। (ग)

प्रतिविषयाध्यवसायः प्रत्यक्षमिति सांख्याः आहुः। साक्षाद्धीः इति प्राभाकराः आहुः। साक्षात्वे च साक्षात्करोमीति अनुव्यवसायगम्यो जातिविशेषः (न्या.म. ।पृ2)।

न्यायमते साक्षात्वं च जातिविशेषः एव। प्रभाकरमते तु साक्षात्वं न जातिः। यत्किंचिदर्थस्य साक्षात्कारिज्ञानमिति बोद्धाः आहुः। (न्या. वि.। पृ.7) वैशिष्ट्यानवगाहिज्ञानं प्रत्यक्षमिति नास्तिकाः आहुः। अन्तःकरणवृत्यवच्छिन्नचैतन्येन विषयस्फुरणं प्रत्यक्षमिति मायावादिनो मन्यन्तो। मायावादिमते प्रत्यक्षलक्षणं च तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम्। (वेदा. परि. प.। पृ.12)। न्यायमतसिद्धं प्रत्यक्षं द्विविधम् नित्यानित्यम्, लौकिकमलौकिकं च। तत्र लौकिकप्रत्यक्षं द्विविधम्, सविकल्पकम्, निर्विकल्पकं चेति।

9. वैराग्यम्

(1) दोषदर्शनाद्विषयत्यागेच्छा (प्रशस्त. 2 पृ 33) (2) भोगानभिषङ्गः (न्या. वा. ।पृ 27) योगशास्त्रज्ञाः तुदृष्टानुश्रविकविषयवितृष्णस्ववशीकारसंज्ञा वैराग्यम्। (पा. यो. सू. 1/15) ऐहिकपारत्रिकविषयादौ दोषदर्शनान्निरभिलाषस्य ममैते विषयाः वश्याः नाहमेतेषां वश्य इति विमर्शः इत्याहुः (सर्व. स. पृ 366 पात) वैराग्यं च तत्वज्ञानाछिषयदोषदर्शनाद्भवति न्या.वा. ।पृ. 37 तस्य वैराग्यशमदमानन्तरम् ज्ञानद्वारा मोक्षहेतुश्च भवति विवेकचूडामणिः।

10. परोक्षम्

साक्षात्कारभिन्नं ज्ञानं परोक्षम्। यथा अनुमित्यादिना ज्ञानानां परोक्षत्वम्। प्रत्यक्षज्ञानभिन्नं ज्ञानं परोक्षम्। अत्र अक्ष्णः परमिति व्युत्पत्तिः। परोक्षे लिटिति निपातनात् साधुत्वम् (सि.कौ. पृ 60)।

परोक्षज्ञानविषयत्वं परोक्षत्वम् यथा पर्वतो वह्निमान् धूमादित्यादौ वह्नेः परोक्षत्वम्।

वक्तुः साक्षात्कारविषयत्वम्। (ग.व्यु.ल.पृ.139)। यथा बभूव योगी किल कार्तवीर्यः। (रघु.स.6 श्लो.38) इत्यादौ लिटोर्थः परोक्षत्वम्। वक्तृभिन्नकर्तृकत्वमेव परोक्षत्वमिति केचिदाहुः (ग.व्यु.ल.पृ139)।

11. गौणार्थः

(1) गौणः अर्थः गौणार्थः। गुणादागता गौणी। गौण्या वृत्या प्रवृत्तः शब्दः

गौणः। यथा ॐ गौणस्चेन्नामशब्दात् ॐ ब्रह्मसूत्रं 1/1/26 इत्यादौ। यथा वा -

"बहूनि मम नामानि कीर्तितानि महर्षिभिः।
गौणानि तत्र नामानि कर्मजानि च कानिचित्।।"

(भा.शा. अध्या. 343 इत्यादौ) (2) अमुख्यम्। यथा एवमागामियागीयमुख्यकालादधस्तनः। स्वकालादुत्तरो गौणः कालः सर्वस्य कर्मणः छान्दोग इत्यादौ। (3) अप्रधानम्। यथा गां दोग्धि पयः इत्यादौ गौः अप्रधानं कर्म। गौर्दृश्यते इत्यत्र अप्रधाने गोरूपकर्मणि लकारः। अत्रोक्तम्-

"गौणं कर्मणि दुह्यादेः, प्रधाने नीहृकृष्वहाम्" इति।

12. मुख्यार्थः

मुख्यः अर्थः मुख्यार्थः। मुख्यः (1) प्रथमकल्पः (2) श्रेष्ठः (3) प्रधानम्। अत्रायं विशेषो ज्ञेयः - कारणनिष्ठं मुख्यत्वं च स्वेतरासाधारणकारणककार्यकभिन्नत्वम्। (तं प। पृ 7) यथा मुक्तिं प्रति तत्वज्ञानरूपकारणस्य मुख्यत्वम्। फलनिष्ठं मुख्यत्वं च प्रवृत्युद्रदेश्यत्वात्। विशेष्यतानिष्ठमुख्यत्वं च प्रकारतान्यत्वम् (तं.प्र.र) इति विज्ञेयम्। यथा घाटवद्रभूतलमिति ज्ञाने भूतलनिष्ठमुख्यतायाः मुख्यत्वम्।

13. संवित्तिः

स्वस्यात्मनः संवित्तिःस्वसंवित्तिः। संवित्तिः स्त्री सम् + विद् + वितन् प्रेक्ष, प्रज्ञा, प्रतिभा, धिषणा, शेमुषी, मनीषा, बुद्धिः, मतिः मेधा, संख्या, उपलब्धिः।

'तत्वस्य संवित्तिरिवाप विद्यांम्।।' इतिं (किराते 26/32) प्रतिपत्तिः, जनस्य विवादः, चेतना, अनुभव।

14. षट्वर्गा रागद्वेषलोभमोहमदमात्सर्याः

रागः :- रज्जनमिति। रज्यते अनेन इति वा। प्रीतिः।
"वीतरागभयक्रोधस्थतधीर्मुनिरुच्यते" इति भगवद्गीताश्लोकटीकायां श्रीधरस्वामिः।

"सुखमप्यधिकं चित्ते दुःखत्वेनैव रज्यते।
यतस्तु प्रणयोत्कर्षात्स राग इति कीर्त्यते।।" इति । अनुरागः अभिमतविषयाभिलाषः। सतु पंचक्लेशान्तर्गतः। यथा- "अविद्यास्मितारागद्वेषा

द्वेषाभिनिवेशाः पं च क्लेशाः।" रागो भिमतविषयाभिलाषः" इति शिशुपालवधटीकायां मल्लीनाथः। "सुखानुशयी रागः" इति पतञ्जलिः। गानशास्त्रीयराग-।

क्रोधः - क्रु + भावे घ। प्रतिकूले सति तैक्ष्ण्यस्य प्रबोधः, कोपः, अमर्षः, रोषः, रुट्, क्रुधा, रुषा, हेलः, हरः, त्यजः, भामः, एहः, मन्यु, व्यथिः।

"काम एष क्रोध एष रजोगुणसमुद्रभवः। "इति भगवद्गीतायाम्।

मोहः- मोहनमिति। अविद्या, मौढ्यं, मूर्च्छा,।

संज्ञावहास्तु नाडीषु पिहितास्वनिलादिभिः।

तमो भ्युपैति सहसा सुखदुःखान्यपोहकृत्।।

सुखदुःखव्यपोहाच्चच्च नरः पतति काष्ठवत्।

मोहो मूर्च्छेति तां प्राहुः षड्विधा सा प्रकीर्तिता।।" इति सुश्रुतः। दुःखं देहादिष्वात्मबुद्धिः

"बुद्धेर्मोहः समभवदहङ्कारदभूद्मदः।

प्रमोदश्चभवत्कण्ठान्मृत्युर्लोचनतो नृप।।" इति

मात्स्ये द्वितीये अध्याये।

"मम माता मम पिता ममेयं गृहिणी गृहम्।

एतदन्यं ममत्वं यत् स मोह इति कीर्तितः।।" इति पद्मे। धर्म विमूढत्वम्।

"अकामतः कृतं पापं वेदाभ्यासेन नश्यति।

कामतस्तु कृतं मोहात् प्रायश्चित्तैः पृथग्विधैः।।" इति प्रायश्चित्तविवेकः।

लोभः (क) धर्मविरोधेन परद्रव्येच्छा (गौ.वृ.4/23) तदुक्तम्-

"परवित्तादिकं दृष्ट्वा नेतुं यो हृदि जायते।

अभिलाषो द्विजश्रेष्ठ स लोभः परिकीर्तितः।।" - पद्मपुराणम्।

यथा लोभश्चेदगुणेन किम् इत्यादौ। (ख) लिप्सातिशयः (मिताक्षरा , अ. 2) मदः - मदयतीति। हस्तिगण्डस्थलम्।

मघते इतिष। हर्षः आमोदः। मदो हर्षः इति तद्भाष्ये सायणाचार्यः। रेतः कस्तूरी। "मृगनाभिर्मृगमदो मदः कस्तूरिकाण्डजः।" इति वैद्यकरत्नमालायाम्। रागविशेषः, मद्यं, मत्तेति यावत्। मदलक्षणम्-

"अहं महात्मा धनवान् मत्तुल्यः कोऽस्ति भूतले।
इति यज्जायते चित्तं मदः प्रोक्तः स कोविदैः।।"

मात्सर्यः - (1) मत्सरस्य भावः मात्सर्यः। स्वप्रयोजनप्रतिसन्धानं विना पराभिमतनिवारणेच्छा। (2) परगुणनिवारणेच्छा (गौ.वृ.4/1/3) अन्यशुभद्वेष इति केचिदाहूः अन्ये तु

"निन्दन्ति मां सदा लोकाः धिगस्तु मम जीवनम्।
इत्यात्मनि भवेद्यस्तु विकारः स च मत्सरः।।" इत्याहुः क्रियायोगसारे।

15. अनुमानम्

अनुमितिकराणमनुमानम्। अनुमितिकरणं द्विविधम्। तत्र प्रथमं व्याप्तिजन्यं, यथा पर्वतो बह्निमान् धूमादित्यादौ धूमो वह्निव्याप्य इति व्याप्तिज्ञानानुमितिकरणं भवति। द्वितीयमनुमितिकरणं तु लिङ्गपरामर्शः। यथा वह्निव्याप्यधूमवानयमिति ज्ञानं अनुमितेः करणं भवति। अनुमानं द्विविधम् - स्वार्थम् परार्थम् चेति। परस्य प्रतिवदिनो मध्यस्थस्य वा अर्थः अनुमित्यात्मकं प्रयोजनं संशयनिवृत्तिर्वा यस्मात्तत् परार्थम्। प्रकारान्तरेणानुमानं त्रिविधम्। - पूर्ववत्, शेषवत्, सामान्यतो दृष्टं चेति। अत्र व्युत्पत्तिः पूर्वम् कारणं तद्वदिति। तदर्थस्तु कारणं लिङ्गं शेषवच्छब्दस्य व्युत्पत्तिस्तु शेषवः कार्यम् तद्वदिति। तदर्थस्तु यथा मेघोन्नति विशेषेण वृष्ट्यनुमानम।। अत्र कायेण कारणं यनुमीस्ते कार्यलिङ्गकम्। यथा नदीवृद्या वृष्ट्यनुमानम्। तत्र कार्येण कारणमनुमीयते। सामान्यतो दृष्टं च कार्यकारणभिन्नलिङ्गकम्। यथा कर्येण कारणमनुपीयते। आत्मानुमानम्। एवं केवलान्वयि-केवलव्यतिरेकि-अन्वयव्यतिरेकीति त्रिविधमनुमानं बोध्यम्।

वितमवीतमिति भेदेन द्विविधमनुमानमिति सांख्याः। मीमांसकास्तु अन्वयव्यतिरेक्येकमेवानुमानमस्ति, केवलान्वयि केवलव्यतिरेकी वा अनुमानं नास्ति इत्याहुः। मायावादिनस्तु अनुमानं न त्रिविधं किन्तु अन्वयिरूपमेकमेवेत्याहुः।

16. विधिः

विधिर्विधायक (गौ. 2/1/62)। अयं विधिर्ब्राह्मणभागः। (वात्स्या 2/1/60) अत्र विधिशब्दस्य विधिरूपे शब्दे इष्टसाधनत्वादिरूपे विध्यर्थे च प्रयोगः दृश्यते। तत्र विधायक इति आद्योऽर्थः। यद्वाक्यं विधायकं चोदकं स विधिः। विधिस्तु

नियोगोनुज्ञा वा। यथा अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादि। (2) इष्टसाधनताबोधकप्रत्ययसमभिव्याहृतवाक्यम्। गौ.वृ.2/1/63) (3) विध्यभिधायकप्रत्ययः तद्घितवाक्यं वा (न्या.म.4)। विधीयते विधिरूपशब्देन प्रतिपाद्यते इति विधिरिष्टसाधनत्वादिः। तस्याभिधायको वाचक इति। (4) प्रवृत्तिपरं वाक्यम्। यथा ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यादिवाक्यमेव विधिः (5) मीमोसकारस्तु अज्ञातार्थज्ञापको वेदभागः विधिरिति। स च तादृशप्रयोजनवदर्थविधानेनार्थवान्। (6) धर्मार्थकामव्यापारो विधिः (सर्वं.सं.पृ. 169(अज्ञातस्यानुष्ठेयकथानत्वं विधिः (जै.न्या.अ-1पा 4 अधि-6)

17. निषेधः

(1) अनिष्टसाधनताबोधको वाक्यविशेषः। स चं द्विविधः। लौकिकः वैदिकश्च। तत्र लौकिकः 'विषं मा भृङ्क्ष' इति वाक्यम्। वैदिकं तु 'न कलञ्जं भक्षयेत्' 'न सुरां पिबेत्' इत्यादि वाक्यम्। अत्र मांसभोजने अनिष्ट साधनत्वं बोधयति। (2) निवृत्तिपरं वाक्यम्। यथा 'न कलञ्जं भक्षयेदि'ति। अत्र कलञ्जभक्षणं नेष्टसाधनमिति वाक्यार्थः। इष्टविशेषश्चात्र पापानुत्पत्तिरेव। तथैव वाक्यतात्पर्यादिति विज्ञेयम् (त.कौ.4 पृ.17) मीमासंकास्तु पुरुषस्य निवर्तकं वाक्यं निषेधः इत्याहुः। यथा न कलञ्जं भक्षयेदित्यादिवाक्यम्। तथा हि निषेधस्तु निवर्तनं प्रतिपादयन् स्वनिवर्तकत्व निर्वाहार्थम् निषिध्यस्य कलञ्जभाक्षणादेः परानिष्टसाधनत्वमाक्षिपन् पुरुषं ततो निवर्तयतीति (लौ.भा.पृ. 46)। शस्तद्रवाचयायाः प्रवृत्तिसभाक्तायाः न घ्ज्ञटसत्वविरोधिघटा (लौ.भा.पृ48-52) अत्रायं विशेषो ज्ञेयः -

18. भ्रान्तिः

स्त्री (भ्रम् + क्तिन् अनुनासिकस्यं क्विझलोः किङ्ति इति दीर्घः।) अनवस्थितिः, भ्रमणम्, भ्रमः, मिथ्यामतिः।

"षाण्मासिके तु सम्प्राप्ते भ्रान्तिः संजायते यतः।
धात्राक्षराणि सृष्टानि पत्ररूढान्यतः पुरा।।" इति ज्योति स्तत्वम्।
"युक्तिहीनप्रकाशत्वाद् भ्रान्तेर्नह्यस्ति लक्षणम्।
यदि स्याल्लक्षणं किंचिद्भ्रान्तिरेव न सिद्ध्यति।।" इति तार्किकाः।

19. ऋग्यजुःसामवेदाः

ऋच्यते सूयते। वेदभेदे। स च मन्त्रब्रह्मणोभयात्मकः। तत्र मन्त्रसमूहात्मकः

ऋक्शब्दे वक्ष्यमाणलक्षणात्मकः संहितारूपो ग्रन्थः। तत्र दशमण्डलानि सन्ति।

"चातुर्वेद्यं चत्वारो वेदाः विज्ञाता सन्ति - ऋग्वेदो, यजुर्वेदो सामवेदः, अथर्ववेदश्चेति।

यजुर्वेदः - "अस्य महतो भूतस्य निश्वसितमेतद् ऋग्वेदो (यजुर्वेदो बृ.2/4/10) तस्माद्यज्ञात्सर्वहत ऋचः सामानि जज्ञिरे। छन्दासि जज्ञिरे। तस्माद्यजुस्तस्मादजायत" इति च। इदं सर्वमसृजत ऋचो यजूषि सामानि। इति तेन त्रयो वेदा अजायन्त इति च। यजुर्वेदो वायोरजायंत। अस्य वेदस्य चरकादयः षडशीतिर्भेदाः सन्ति। तत्र वाजसनेयानां जाबलादयः सप्तदश भेदाः भवन्ति। यजुर्वेदस्य उपवेदः भवति धनुर्वेदः।

सामवेदः.- स्यति छिनत्ति दुःखं गेयत्वात्। स्यति दुःखयति दुरध्येयत्वादिति वा। स्यति विरोधमिति, सान्त्व साम सान्त्वने इत्यस्मात् मनिन् वा। शमयति विरोधमिति शाम नान्त तालव्यदि च। शत्रुवशीकरणोपायविशेषः, प्रियवादार्थप्रधान सम्बन्धादिभिः क्रोधोपशमनम्, "ये शुद्धवशा ऋजवः प्रतीता धर्मे स्थिताः सत्यपराः विनीताः। ते साम साध्याः पुरुषाः प्रविष्टाः मानोन्नता ये सततं च राजन्" इति वात्स्ये।

"सामपूर्वभूवा चासौ तं क्षत्ता संस्थितं मुनिम्।
गच्छतां यत्र ते कार्यम् यथेष्टं द्विजसत्तम।।"

इति (देवीभागवते 1/27/31)। वेदविशेषः। चतुर्वेदान्तर्गततृतीयवेदः।

20. बुद्धिः

बुद्ध्यतेऽनयां इति बुद्धिः निश्चयात्मिका अन्तःकरणवृत्तिः। सविकल्पकज्ञानं, मनीषा, धिषणा, धीः, प्रज्ञा, शेमुषी, मतिः, प्रेक्षा, उपलब्धिः, चित्, संवित्, प्रतिपत्, ज्ञप्ति, चेतना, धारणा, प्रतिपत्तिः, मेधा, मननं, मनः, ज्ञानं, बोधः, संख्या, प्रतिभा, आत्मजा, पण्डा, विज्ञानम्। "बुद्धिर्विवेचनास्यात् सा ज्ञानजनीनी श्रुतौ" इदि ब्रह्मवेवर्ते।

21. व्यावहारिकसत्यम्

मायावादिमते सत्ता त्रिविधा - पारमर्थिकी, प्रातिभासिकी, व्यावहारिकी चेति। व्यावहारिकी च घटादीनां सत्ता। व्यवहारकाले अबाध्यत्वात।

22. बाह्यम्

बहिर्भवः बाह्यम्।

23. आभ्यन्तरम्

अभि अन्तरम् आभ्यन्तरम्। अन्तं राति ददाति। च्छिद्रं, परिधानं, मध्यं, व्यवधानं, अन्तरात्मा, अवकाशः, बहिर्योगः, भेदः, विशेषः, अवसरः, अवधिः, अन्तर्धानं, तादर्थ्यम्, आत्मीय, विना, सदृशः, अवधी - "निरन्तराभ्यन्तरबातवृष्टिशु" इति। परिधाने "अन्तरे शाटका परिधानीया" इत्यर्थः। तन्तर्द्धौ - "पर्वतान्तरितो रविः"। भेदे - "यदन्तरं सर्षपशैलराजयोः, यदन्तरं वायसवैनतेययोः" इति रामायणे। तादर्थ्ये - "त्वामन्तरेण ऋणं गृहीतम्," त्वदर्थमित्यर्थः। च्छिद्रे - "प्रहरेदन्तरे रिपुस्" इति। आत्मीये - " अयमप्यन्तरो मम" इति। विनार्थे - "हरे अवसरे-" अत्रान्तरे च कुलटा कुलवर्त्मपातेत्यादि। मध्ये-"आवयोरन्तरे जाताः पर्वताः परितो द्रुमाः" इति। सदृशो-"हकारस्य धकारो न्तरतमः" इति भारतः।

24. निर्विकारः

प्रकृतेरन्यथाभावः विकारः, स निर्गतो यस्मात्। जन्मादिषड्भावविकारहीने। परमात्मनि। विकारशून्ये। "त्वयेह भवने मह्यं वस्तव्यं निर्विकारया" इति। "सिद्ध्यसिद्धयोर्निविकारः कर्ता सात्विक उच्यते"।

25. आत्मज्ञानम्

आत्मनो ज्ञानम्। यथार्थरूपेणात्मनो ज्ञाने तज्ज्ञानस्य च मोक्षसाधनत्वं श्रुतावुक्तम्- "अभयं वै जनकः प्राप्तोऽसि येनात्मानमेवादेः," "महान्तं विभुमात्मामं मत्वा धीरो न शोचति" इति श्रुतिः। तस्येतरस्माद् भेदज्ञानं यथा स्वरूपज्ञानं च आत्मज्ञानम्, तच्च साक्षात्काररूपं, तस्यैव मोक्षसाधनत्वात्।

"आत्मज्ञाने शमे च स्यद्वेदाभ्यासे च यत्नवान्"। इति मनुः।

26. श्रुतिः

कर्मादौ। (1) वेदे सर्वस्य श्रूयमाणत्वात् श्रुतित्वम्। (2) कर्णे कर्णस्य श्रवणहेतुत्वात् तथात्वम्। (3) श्रवणेन्द्रियजन्ये ज्ञाने च। अङ्कशास्त्रोक्ते त्रिभुजक्षेत्रादौ भुजकोट्योः संयुज्यमाने। (4) रेखाभेदे च।

"प्रथमश्रवणाच्छब्दः श्रुयते हस्तमात्रकः।

सा श्रुतिः सम्परिज्ञेया स्वरावयवलक्षणा"।। इति। श्रुतिसंख्यानियमश्च तत्र दर्शितः। "श्रुतिस्थाने स्वरान् वक्तुं नाहं ब्रह्मास्मि तत्वतः"। जले च।

द्वितीयाध्यायस्य सारः

द्वितीयाध्यायस्यारम्भे सज्जनप्रशंसारूपं मङ्गलं विदधाति कविः। निर्मत्सराः मनःसन्तोषकारकाः श्रेष्ठाः सन्तः दुःखनिवारणार्थं मनसि प्रकाशयन्तु, इति तेन प्रार्थ्यते। उद्दिशष्टकार्यस्य निर्विघ्नपरिसमाप्त्यर्थं काश्यपादीन् गुरून् नमस्करोति कविः।

द्वितीयेऽध्याये प्रधानतया प्रतिबिम्बवादः शून्यवादः इत्येवमादीनां वादानामुल्लेखो दृश्यते। जीवात्मपरमात्मनोः बिम्बप्रतितिम्बभावकल्पनाप्यत्र दृश्यते। जीवः रूपनामादिबन्धनानां वशीभूतः सन् दुःखमनुभवति। विषयेषु रागे सति आत्मा सविषयो भवति। रागतः प्रत्यक्षोऽर्थः सिध्यति। इन्द्रियार्थसन्निकर्षजन्य ज्ञानं प्रत्यक्षम्। योऽर्थः इन्द्रियगोचरः स गौणार्थः। एवं प्रत्यक्षार्थः गौणार्थः।

अर्थेषु रागाभावे सति आत्मा निर्विषय इत्युच्यते। वैराग्यतः परोक्षार्थः सिध्यति। परोक्षार्थः मुख्यार्थः। वेदवेद्यरूपेण मुख्यार्थगौणार्थयोर्मध्ये पारस्परिको विवेको निर्विषयस्य मुख्यार्थस्य आत्मनः छाया भवति सविषयः गौणार्थः। द्रष्टदृश्यदर्शनयोगात् केवलस्य परमात्मनः प्रकाशो जायते।

मुख्योऽर्थःनिर्विषयः, गोचरार्थस्तु गौणार्थः। वेदो परोक्षवादः। प्रत्यक्षवादः अनृत इत्युच्यते। एवमिन्द्रियो वेदः पंचमः वेद इत्युक्त्वा कश्चिन्नूतनाशयोऽत्र प्रकटितः कविना। प्रत्यक्षपरोक्षरूपौ जीवात्मपरमात्मानौ अन्योन्याभिमुखै स्थितौ। आत्मच्छायामात्रं व्यावहारिकसत्यम्। तद्रष्टा चात्मा। तेनात्मावतिष्ठते। व्यावहारिकसत्येषु नानामार्गावलोकनात् मुख्यगाणार्थभेदेन बोद्ध्यबोध्लोकता दुष्करा स्यात्। मुख्यार्थः वेद्यः। आत्मा शब्दगम्यत्वादक्षरः। तथा बाह्यशरीररूपेण क्षरणात्क्षर इत्युच्यंते। एक एवात्मा बाह्याभ्यन्तरभेदेन द्विविधः। क्षरः बाह्यरूपः अक्षरः आन्तरिकः। मुख्योऽर्थः विधिः गौणार्थः निषेधः।

वस्तुतः आत्म च न गौणः, न मुख्यः, न स्वीयः, न परस्मृत, न बाह्यः, न चान्तरः। एतादृशमात्मानं ज्ञातुं ज्ञापयितुं च वेदः एव प्रमाणम्।

तृतीयोऽध्यायः

नानाभावप्रतिषेधैकात्मयोगकथनम्

यदन्तस्थमिदं व्यक्तं प्रकाशं लोकसंज्ञितम्।
कर्मज्ञानमयो वेदो अस्ति तस्मै नमो नमः।। 1

आत्मभावं समुत्सृज्य परार्थम् च स्थिरीकृत्वा
ये लोके स्थावराः सन्ति तानहं शरणं व्रजे।। 2

ये भवन्ति परार्थाय नानागुल्मलतादयः।
ओषध्यः फलपाकान्ताः वानस्पत्याश्च तान् भजे।। 3

हृदयं मम जानीयात् वीणापुस्तकधारिणीम्।
स्वराक्षरैकरूपेण मिलितां वाङ्मयीं सतीम्।। 4

अष्टाङ्गं मां विजानीयादष्टमूर्तिरिति श्रुतम्।
ममैव हृदयं वेदः तस्मावेद्यं तु मां विदुः।। 5

मम तद्हृदयं विद्याज्जगत् स्थावरजङ्गमम्।
मदात्मत्वाच्च मत्पुत्रस्तस्मादात्मीयसंज्ञितः।। 6

आत्मात्मीयतया साक्षात्कार्यकारणविग्रहम्।
सत्यं मां ये न जानन्ति असन्तस्ते भवन्ति च।। 7

लोकांश्चात्मीयभावेन पश्याम्यन्तःस्थितानहम्।
ये लोका मां न जानन्ति ते नश्यन्ति पितृद्रुहः।। 8

आत्मीयत्वादनुमितमात्मभावमिहात्मनि।
अन्धत्वान्नैव पश्यामि आत्मीयानाश्रयाम्यहम्।। 9

यथा कर्कटकी पुत्राद्विनाशं प्रतिपद्यते।
तथात्मरूपमुत्सृज्य स्वलोकं प्रतिपद्यते।। 10

अदृष्टं लोकपितरं ये लोका नैव विन्दते।
ते बद्धा मृत्युपाशेन आत्मात्मीयस्वविच्युताः।। 11

निबद्धाः मृत्युपाशेन आत्मात्मीयस्वविच्युताः।
अनर्थानि च भुञ्चन्ति अवृत्तिर्व्याधिपीडिताः।। 12
अवृत्तिर्व्याधिशोकार्ताः मृत्युपाशाच्च दारुणाः।
यस्मान्मृत्युभयं घोरं यान्ति जीवाः सनातनाः।। 13
येषां ज्ञात्यां धने सत्वं ते च मृत्युपदं गताः।
आत्मात्मीये सर्वनाम्नि येषां ते स्वर्गसंस्थिताः।। 14
मत्परं नित्यसत्यं स्यात्तदात्मा दृश्यमेव मे।
व्यावहारिकसत्योऽहमक्षरः स्वरसंयुतः।। 15
यदादृष्टं विजानाति तदा स्वःसुखमृच्छति।
यदादृष्टं न जानाति तदानर्थम् प्रपद्यते।। 16
सत्यं मां द्रष्टृ भावेन कल्पितं महसांमहः।
अदृष्टं सत्यतां कर्तुं मत्परं तं नमाम्यहम्।। 17
मां तु ज्ञानं विजानीयात् मत्त ज्ञानं प्रकाशितम्।
सोपाधिकोऽहं ज्ञानाख्यो ज्ञापकत्वाच्च धूमवत्।। 18
ज्ञातृज्ञेयोभयोर्योगात् ज्ञानं स्याद्योगशक्तितः।
व्यावहारिकसत्यं तत् साक्षात्सत्यस्य सूचना।। 19
आत्माव्यक्तस्त्वहं व्यक्तो सत्यमेतन्न संशयः।
अतो विपर्ययो बोधस्तदुपाधिरिहोच्यते।। 20
आत्मा बोध्यो विजानीयादहं बोध उदाहृतः।
अग्नीन्धनवदाभाति धूमवज्ज्ञानमुच्यते।। 21
अग्निं व्याप्यं विजानीयादिन्धनंव्यापकं स्मृतम्।
उभयोर्योगतः सिद्धं धूमलिङ्गमुदाहृतम्।। 22
आत्मा व्याप्यो विजानीयादहं व्यापकवत्स्थितम्।
उभयोर्येगतः सिद्धं ज्ञानलिङ्गमुदाहृतम्।। 23
इन्धनेनैधते वह्निः शमं याति निरिन्धनात्।
तथाऽस्मदि स्थितोह्यात्मा अस्मच्छान्तौ शमं व्रजेत्।। 24

अहमित्यभिमानं स्यादात्मसत्यावलम्बनात्।
आधारं तं विजानीयादात्माधोयमिति स्मृतम्।। 25
अहमेवात्मनः साक्षी आत्मा मय्यवतिष्ठते।
आत्मधारणयाहं तु अहंभावं गतोऽस्म्यहम्।। 26
ब्रह्मेति मां महद्भावात् प्रवदन्ति मनीषिणः।
गौणश्चतुर्मुखो विद्यान्मुख्यो वेद इति स्मृतः।। 27
बीजाद्यथा महावृक्षो बहुबीजाश्रयो बभौ।
तथैकात्मसमुद्भूतो बह्वात्मानं वहाम्यहम्।। 28
एकजीवसमुद्भूतो वैद्योऽहं मानमश्रितः।
नानाजीवान् समद्धर्तुम् यतते पितृवाञ्छया।। 29
कृत्वा जीवेषु मद्भावं जीवभावं तथात्मनि।
उद्धरिष्येऽहमधुना जीवात्मानं स्वसंस्थितम्।। 30
साक्षाद्यस्य भवेत्सत्यं सेव साक्षीति विश्रुतः।
सत्यलोकादहं साक्षी सुब्रह्मण्योऽस्मि निर्वृतः।। 31
सुब्रह्मण्यः कुमारोऽस्मि रमाकुरहमेव च।
श्रीभूमिरहमेवास्मि भूर्भुवः स्वः सरस्वती।। 32
पितामहपदं प्राप्य नारायण इति श्रुतः।
भिषक् ततो मम पिता नित्यसत्यं प्रसीदतु।। 33
यदिच्छया भवं प्राप्तः प्रवृद्धोऽहं यदिच्छया।
यस्मादपूर्ववैद्यौऽस्मि तं वन्दे सत्यविग्रहम्।। 34
ज्ञानं त्वौपाधिकं मत्वा ज्ञानज्ञानं गतोस्म्यहम्।
तस्मादपूर्ववैद्योऽस्मि ज्ञानस्योपरि वर्तनात्।। 35
गुरुशिष्यप्रसङ्गेन यद्ज्ञानं हृदि भावितम्।
सोपाधिकं तु तद्विद्यात् सत्यं स्यात्स्वप्रकाशकम्।। 36
मत्पिता धर्मनिरतः पितामहमनुस्मरन्।
स्वयं प्रकाशितज्ञानमात्मभावेन दत्तवान्।। 37

आत्मा वै पुत्र इत्युक्तवेदशासनगौरवात्।
तदीयं ज्ञानमखिलं मय्याविश्य प्रकाशते।। 38
अहं पुत्रत्वमुत्सृज्य पितृमाहात्म्यगौरवात्।
पितास्मि गतसन्देह आत्मीयत्वाद्विमोचितः।। 39
आत्मैवाहं न चात्मीयो किमु ज्ञाति धनं मम।
नानाभावविनिर्मुक्तः केवलोऽस्मि पिता बभौ।। 40
पुत्रे पितरि सम्प्राप्ते माता पश्चान्न कार्यकृत्।
पुत्रार्थमेव दम्पत्योः सङ्गमं त्वाह सज्जनः।। 41
पुत्रे साध्ये सति पिता साधनं व्यापकं भवेत्।
मातोपाधिर्भवेत्तत्र लिङ्गं तत्पुत्रतेजसः।। 42
पितृकार्यम् तु पुत्रः स्यात् पिता पुत्रस्य कारणम्।
माता तत्र निमित्तं स्यात् पितैवात्र सुतः स्मृतः।। 43
आत्मा वै पुत्र इत्याह वेदः सत्यावलोकनात्।
अतो द्विजादिसंस्कारात्पुत्रः पितृसमो भवेत्।। 44
कुमारशब्दं व्याख्यास्ये कुर्भूर्मा च भुवः स्मृतः।
रेफोऽग्निः वेद एव स्वर्वाङ्मयी च सरस्वती।। 45
मातृजं मांसपिण्डं स्यादुपाधिरिदमात्मनः
जीवकोशं तु विज्ञेयं शरीरं पाञ्चभौतिकम्।। 46
वेदातीतः पिता साक्षादात्मा भोगविवर्जितः।
अस्माद्भावविनिर्मुक्तः स परः फलरूपधृक्।। 47
जीवत्मनि ससंवेद्यो नानानुभवगोचरः।
सुखदुःखानुभूतित्वात् साक्षात्कारेण वर्तते।। 48
स्त्रीणामुपाधिरूपत्वात् तया कर्म प्रपद्यते।
सैव साक्षी तु जीवानां या जीवं धार्यते हृदि।। 49
पिता भर्ता सुतः स्त्रीणां भोगभोग्यानुभूतये।
ज्ञानं ज्ञेयं ज्ञानगम्यं पिता भर्ता सुतः स्त्रियः।। 50

अम्बां ज्ञानानुभूत्याहं धारयामीह जन्मना।
अभोगोनात्मना तातं ज्ञानकर्म वहाम्यहम्।। 51
कर्मज्ञानं प्रियं मातुः ज्ञानकर्मपितृप्रियम्।
उभयस्य तु कर्तास्मि उभयं कृतवानहम्।। 52
जन्मज्ञानं तु पितृतः कर्म भर्तुः प्रियाद्भवेत्।
स्त्रीणां तु पुत्रः सुखदः न स्त्री स्वातन्त्र्यमर्हति।। 53
जन्ममात्रं पिता येषां तेषां ज्ञातिधनैः सुखम्।
परेच्छेमानुवृत्तित्वात्परत्र च सुखं भवेत्।। 54
कर्मज्ञानात्मकं वेदं कार्यकारणविग्रहम्।
धारयाम्यहमोजस्वी निश्चलस्थिरतां गत-।। 55
जीवात्मपरमात्मानौ पितृपुत्रौ मयि स्थितौ।
तौ खगौ मां समासाद्य वसतोऽन्योन्यवीक्षितौ।। 56
आदिवृक्षमहं चित्रं वयश्शतसमाश्रयम्।
हंसानामपि जीवानां यथा भोगफलप्रदः।। 57
सुखाख्यं फलमश्नन्ति हंसास्तु गलितामृतम्।
विषादं मोहदं मुख्यं जीवा भुञ्जन्ति शाश्वतम्।। 58
एकमेवाश्रयं चित्तं सुखदुःखफलप्रदम्।
पितृमातृसुतास्तिस्रो मूलं रसचतुष्टयम्।। 59
आहारादिरसं विद्यात् पाणिपादचतुष्टयम्।
शेफश्चेति शिफाः पंचकामाद्यैषट्स्वरूपकः।। 60
सप्तधातुस्त्वगष्टैव दिक्शाखो नवकोटरः।
दशेन्द्रियच्छदो वृक्षस्त्वेकादशविधोऽस्म्यहम्।। 61
संसारवृक्षः सोऽपि स्यात् संसारं येन दृश्यते।
अभिच्छेदात् याति वृक्षो आदिर्जीव उदाहृतः।। 62
इन्दियाणि च्छदं विद्यान्मूलमात्मत्रयं मम।
उर्ध्वमूलमधःशाखं वृक्षमेतन्मनाहरम्।। 63

अत्यन्तशीघ्रगामित्वादश्वत्थमिति कथ्यते।
आशुगेनैव चित्तेन चित्तजन्मनिवर्तनात्।।
याति संसारवृक्षं स्यादात्मभावनयाऽस्तु धीः।। 64
इन्द्रियं चित्तपुच्छं स्यात् चित्तमूलमतीन्द्रियम्।
आमूलाग्रावलोकेन आदिमध्यान्तमाबाभौ।। 65
आदिमध्यान्तविज्ञानदेकात्मेव त्रिधा भवेत्।
एवमात्मत्रयं विद्यादात्मन्यात्मात्मदर्शनात्।। 66
स्थिरत्वात् स्थावरं त्वात्मा चलत्वाज्जङ्गमं वदेत्।
यस्य चित्तं स्थिरं विद्यात् सोऽपि स्थिरतरो भवेत्।। 67
आत्मनः परिपूर्णत्वादात्मा सर्वत्र वर्तते।
यदात्मानुभवं प्राप्तं तदात्मीयमुदाहृतम्।। 68
आत्मात्मीयतया यस्य भिन्नात्मत्वं भवेद्यदि।
स जीवः परतो भिन्नः पितृद्रोह्यसुखं व्रजेत्।। 69
दृश्येष्वनादराद्भिन्नः स्वरूपानवलोकनात्।
आत्मद्रोही भवेन्मूढो भिन्नाङ्गत्वाद्विनश्यति।। 70
मोहमार्गमतिक्रम्य सन्मार्गमवलोकितः।
कार्यकारणनिर्मुक्तं कर्मैवाहं करोमि च।। 71
गौरवात्पितृवाक्यस्य पितुरिच्छावलम्बितः।
अधः प्रविसृतान् लोकानुद्धरिष्येऽहमञ्चसा।। 72

नानाभावप्रतिषेधैकात्मयोगकथनं नाम
तृतीयोऽध्यायः

तृतीयाध्यायस्य टिप्पणी

1. व्यक्तम्

वि + अज्जू व्याप्तौ न क्तः प्राज्ञः इत्यामरः। स्फुटः इति मेदिनी। यथा साहित्यदर्पणे-

"विभावेनानुभावेन व्यक्तः सञ्चारिण तथा।
रसतामेति रत्यादिः स्थायिभावः सचेतसाम्।।" इति।

विष्णुः। यथा - "व्यक्तो वायुरधोक्षजः "इति विष्णुसहस्रनामस्तोत्रे। स्थूले - "व्यक्ताव्यक्तज्ञविज्ञातान्" इति सांख्यकारिका।

2. प्रकाशः

(1) आतपे (2) विकासे (3) विकासयुक्ते। प्रकाशश्च सत्वज्ञानं तेजः साधारणः यथोक्तम्- "जडप्रकाशयोगात् प्रकाशः" इति वैशेषिकाः आहु-। प्रागप्रकाशरूपस्य जडस्यात्मनो मनःसंयोगात् ज्ञानाख्यप्रकाशो जायत इति चेन्न। प्रकाशत्यं तेजः सत्वचैतन्येप्यनुगतमखण्डोपाधिरनुगतव्यवहारादिति। ननु प्रकाशस्य परत्वेऽपि तेजोवद्धर्मधर्मिभावोऽस्ति न वा। तत्राह - "निर्गुणत्वान्न चिद्धर्मा।" "पुरुषस्य प्रकाशरूपत्वे सिद्धे तत्सम्बन्धमात्रेणान्यव्यवहारोत्पत्तौ प्रकाशात्मकधर्मकल्पनागौरवमित्यपि बोध्यम्। तेजसश्च प्रकाशख्यरूपविशषाग्रहे अपि स्पर्शपुरस्कारेण ग्रहात् प्रकाशतेजयोर्भेदः सिद्यति। आत्मनस्तु ज्ञानाख्यप्रकाशग्रहकाले ग्रहणं नास्तित्यतो लाघवात् धर्मथार्मिभावशून्यं प्रकाशरूपमेव आत्मद्रव्यं कल्प्यते। तस्य च न गुणत्वं संयोगादिमत्वात् अनाश्रितत्वाच्चेति। आत्मनस्तु ज्ञानारण्यप्रकाशग्रहकाले ग्रहणं नास्तीत्यतो लाघवात् कल्प्यते। तस्य न गुणत्वं संयोगादिमत्वात् अनाश्रितत्वाच्चेति। तथा च स्मर्यते -

"ज्ञानं नैवात्मनो धर्मो न गुणो वा कथंचन।
ज्ञानस्वरूपमेवात्मा नित्यपूर्णः सदाशिवः।."

वैवस्वतमनोः पुत्रभेदे।

3. लोकः

लोक्यते असौ। (1) भूवने भुवनशब्दे दृश्यम्। (2) जने इत्यमरः।

4. स्थावरः

(1) अव चले (2) अस्थिरे वृक्षादौ। "स्थावरं जङ्गमं चैव यद्यपि स्वयमाजनन्" इति स्मृतिः। (3) पर्वते (4) धनुगुणे

5. ओषधिः

ओषः पाको धीयतेऽत्र। फलपाकान्ते व्रीहियवादौ स्थावरभेदे। ओषधिश्च स्थावरभेदो, यथाह सुश्रुतः - "तासां स्थावराश्चतुर्विधः वनस्पतयो, वृक्षाः, विरुद्धः, ओषधयः चेति। तास्वपुष्पाः फलवन्तो वनस्पतयः। पुष्पफलवन्तो वृक्षाः। प्रतानवत्यः स्तास्विन्यश्च विरुधः। फलपाकान्ताः ओषधयः। मनुरप्याह -

"उद्भिजाः स्थावराः ज्ञेयाः बीजकाण्डप्ररोहिणः।
ओषध्यः फलपाकान्ताः पहुष्पफलोपगाः।।" इति।

6. अष्टमूर्तिः

अष्टौ भूम्यादयो मूर्तयोयस्य।

"क्षितिर्जलं तथा तेजो वायुराकाशमेव च।
यष्टार्कश्च तथा चन्द्रः मूर्तयोऽष्टौ पिनाकिन-।।" इत्युक्ताष्टमूर्तिधारिणि।। शिवे

"महेश्वरेण यो राजन् ह्यजीर्णाह्यष्टमूर्तिना।
कस्तमुत्सहते वीरो युद्धे जरयितुं पुमान्।।"

"अवेहि मां किङ्करमष्टमूर्तेः" इति रघुवंशे। उग्रो वायुमूर्तिः भीम आकाशमूर्तिः। क्षित्यादिमूर्तिभेदेन तस्य नामधेयः यथा सर्वः क्षितिमूर्तिः। एवं भवो जलमूर्तिः रुद्रो अग्निमूर्तिः उग्रो वायुमूर्तिः भीमः आकाश मूर्तिः पशुपतिर्यजमानमूर्तिः। महादेवः सोममूर्ति, ईशानः सूर्यमूर्तिः। एता एव तस्याष्टो सूर्तयः शाकुन्तले वर्णिताः।

7. जङ्गमम्

पुनः पुनः गच्छतीति। अस्थावरः। गतिशक्तिविशिष्टः। तत् पर्यायः (1) चरिष्णुः (2) चरः (3) त्रसः (4) इङ्गः (5) चराचरः। यथा रघौ (2/44)

"मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः।" इति।

"ओषधायस्तावद् द्विविधाः स्थावराः जङ्गमाश्च।" "जङ्गमाः अपि चतुर्विधाः च जरायुजाण्डजस्वेदजोद्भिजाः। तत्र पशुमनुष्यव्यालादयो जरायुजाः। खगसर्पप्रभृतयो कडजाः कृमिकीटपिपीलिकाप्रभृतयो स्वेदज़ाः। इन्द्रगोपमण्डूकप्रभृतयो द्भिन्नाः।" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये।

8. विग्रहः

विविधं सुखदुखादिकं गृह्णातीति। यद्वा विविधैर्दुःखादिभिः गृह्यते इति। युद्धम्।

"सन्धिं च विग्रहं चैव यानमासनमेव च।
द्वैधीभावं संश्रयं च षड्गुणाश्चिन्तयेत्सदा।।" इति मनुः (7/60)। शरीरम्।

"विग्रहेण मदनस्य चारुणा
सोऽभवत् प्रतिनिधिर्न कर्मणा।।" इति रघौ (11/13)। वाक्यभेदः। समासार्थबोधकं, विरोधमात्रम्।

"त्यजत मानमलं बत विग्रहैर्न पुरनेति गतं चतुरं वयः।
परभृतादिभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः।।" इति रघौ (19/47)

9. सत्यम्

(1) सते हितं यत् तत् सत्यम्। (2) सत्ययुगे (3) शतपथे (4) याथार्थ्ये।

"यथार्थवथनं यच्च सर्वलोकसुखप्रदम्।
तत्सत्यमिति विज्ञेयमसत्यं तद्विपर्ययम्।।" इति पद्मपुराणम्। सर्वलसोकसुखाप्रदमिति न लक्षणघटकम्, सत्यस्याप्यप्रितयत्वे कथननिषेधात्। अत एव मनुमोक्तम् - "सत्यं ब्रूयात्प्रियं ब्रूयात् न ब्रूयात्सत्यमप्रियम्।" इति। (5)अश्वत्थवृक्षे (6) परमात्मनि। यथा - "सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतिः। (7) श्रीरामे (8) विष्णौ। "सत्यरूपो जनार्दनः" इति कूर्मपुराणे। (9) भूतपंचके (10) सत्यत्वं च त्रिकालबाध्यत्वमिति वेदान्तिनः। (11) यथार्थज्ञानविषयत्वं सत्यत्वमिति नैयायिकाः।

10. पितुद्रोही

पितृन् द्रुह्यतीति पितृद्रोही।

11. सनातनः

सना भावः। नित्यं, ध्रुवं, शाश्वतम्, सुनिश्चलः।

(मनुः 7/98)

विष्णुः, शिवः, ब्रह्मा, पितृणामतिथिः, दिव्यमनुष्यः।

"सनत्कुमारो धर्मश्च सनकश्च सनातनः।

सनन्दश्चापि सूर्यश्च ये न्ये वाब्रह्णः सता।।"

विचक्षणाः न तद्वक्तुं के वा न्ये जडबुद्धयः।" इति ब्रह्मवैवस्वते। वैष्णवराजः।

12. उपाधिः

धर्मचिन्ता, कुटुम्बव्यापृतः, छलम्।

"उपाधिर्न मया कार्यो वनवासे जुगुप्सितः" इति रामायणे। विशेषणम्। पदार्थकोपाधिविभजककोपाधिसत्वम्" इति मुक्तावली। नाम चिह्नं, हेतोरव्यापकः। यथा धूमवान् बह्निरित्यत्र आर्द्रकाष्टंमुपाधिः। अस्य प्रजोयनं व्यभिचारस्यानुमानम्। आलङ्कारिकमते जातिगुणक्रियायदृच्छास्वरूपः

13. ज्ञेयम्

ज्ञा - कर्मणि यद्। बोद्धव्ये। यथा व्याकरणादिः। पाणिन्यादेर्ज्ञैयैकदेशार्थमपि। ज्ञातुं योग्ये ब्रह्मणि च।

"ज्ञेयं यत् तत्, पवक्ष्यामि यद्ज्ञात्वा मृतमश्नुते।

अनादिमत् परं ब्रह्म न सत् तंन्नसदुच्यते।।"

"सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्।

सर्वेन्द्रियगुणाभासं सर्वमावृत्य तिष्ठति।।

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।

असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च।।

बहिरन्तश्च भूतानामचरं चरमेव च।

सुक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत्।

अविभक्तं विभक्तेषु विभक्तमिव च स्थितम्।

भूतभर्तृ च तज्ज्ञेयं अविष्णु प्रभविष्णु च।।
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्याधिष्ठितम्।।" इति भगवद्गीता।

14. बोधः

बोधनमिति। ज्ञानमिति त्रिकाण्डशेषे।
सूर्यरूपभेदः। यथा मार्कण्डेये -
"बोधश्चावगतिश्चैव स्मृतिर्विज्ञानमेव च।
इत्येतानीह रूपाणि तस्य रूपस्य भास्वतः।।
जागरणकालः। चैतन्यम्। यथा मार्कण्डेये-
"प्रबोधश्च जगत्स्वामी नीयतमच्युतो लघुः।
बोध च क्रियतामस्य हन्तुमेतौ महासुरौ।।" इति।

15. व्याप्यम्

(वि आप् + ण्यत्) (1) व्याप्ते। (2) अल्पदेशवृत्तौ। "व्याप्यत्वादपरापि च। च।" भाषण। (3) अमुनितिसाधने लिङ्गे। (4) साधनमात्रे।

16. व्यापकम्

(1) विशेषेणाप्नोति (वि + आप् + शुल्)। अधिकदेशवृत्तौ "व्यापकत्वात्परापि स्यात्" भाषा। न्यायोक्ते स्वाधिकरणवृत्यभावप्रतियोगिनि च। (2) पदार्थे (3) तन्त्रोक्ते (4) सर्वाङ्गसम्बन्धिनि न्यासभेदे (5) "अङ्गुलिव्यापकन्यासै" इति तन्त्रसारः। (6) आच्छादके।

17. आधारः

आध्रियन्तो अस्मिन्निति आधारः। "अध्यायन्या" इति सूत्रे अवहाराधरेत्युपसरव्यानादधिकरणे घ। व्याकरणशास्त्रे अधिकणकारकम्। "आधारोऽधिकरण्" तडागः, आशयः, अधिकरण्, आलवालम्, अम्बुधारणम्। क्षेत्रादिसेकार्थम् सेतुना बहुनालं जलं निरुद्य यत्र स्थाप्यते स आधारः बद्धकन्दरादिः। बाँध" इति ख्यातः। सस्याद्यर्थम् जलबन्धनं, क्षेत्रादिसेकार्थम् जलधारस्थानम्।

"आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम्।

कच्चिन्न वाय्वादिसपप्लवो वः श्रमच्छिदामास्रमपादपानाम्।।" इति (रघुवंशे। 5/6)।

"तथात्को प्यनेकस्तु ज् ल घारेष्विवांशुमान्।" इति याज्ञवल्क्यः (676)

18. चतुर्मुखः

चत्वारि मुखानि यस्य सः चतुर्मुखः ब्रह्मा।

19. बीजम्

विशेषेण ईजते वि + ईज् गतिकुत्सनयो अच्। वबयोरभेदात् बः प्रसवकारणम्, शुक्रम्, वीर्यम्।

20. भिषक्

बिभेति रोगो यस्मादिति। वैद्यः, आयुर्वेदी, दोषज्ञः, चिकित्सकः।

"अज्ञातौषधिमन्त्रस्तु यश्च व्याधोरतत्ववित्।

रोगिभ्यो र्थम् समादत्ते स दण्ड्यश्चौरवद् शिषक्।।" इति ज्योतिस्तत्वम् (612)

21. आत्मीयः

स्वकीयः अन्तरङ्ग। "प्रसादमात्मीयमिवात्मदर्शः - इति रघुवंशे।

22. पुत्रः

पुनाति पित्रादीन् इति। (पु + पुवो ह्रस्वश्च इति क्त्र, धातोः ह्रस्वत्वं च)। तकारद्वये तु पुन्नाम नरकात् त्रायते इति। पितृन् पाति इति व्युत्पत्या पृषोदरादित्वात्साधुः। पुंसन्तानः, पुंनामनरकत्राता, आत्मजः, तनयः, सुनुः, सुतः, तनूजः, अपत्यं, दायादः, कुलधारकः, नन्दनः, आत्मजन्मा, द्वितीयः, प्रसूतिः।

"पुं नाम नरकाद्यस्मात् - पितरं त्रायते सुतः।

तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयाम्युवा।।" इति महाभारते (1/74/37)

23. पिता

पाति रक्षत्यपत्यं यः। उत्पादकः, तातः, जनकः, प्रसविता, वप्ता, जनयिता, गुरुः, जन्मदः, जन्यः, जनिता, बीजी, वप्रः।

"अन्नदाता भयत्राता यस्य कन्या विवाहिता।

जनिता चोपनीता च पंचैते पितरः स्मृताः।।" इति चाणक्यः।

"कन्यदातान्नदाता च ज्ञानदाता भयप्रदः।

जन्मतो मन्त्रतो ज्यैष्ठभ्रता च पितरः स्मृताः।।" इति ब्रह्मवैवर्ते।

"मन्यः पूज्यश्च सर्वेभ्यः सर्वेषां जनको भवेत्।"

"मान्यः पूज्यश्च सर्वे भ्यः सर्वेषां जनको भवेत्।

अहो यस्य प्रसादेन सर्वान् पश्यति मानवः।।

जनको जन्मदाता च रक्षणाच्च पिता नृणाम्।

तातो विस्तीर्णकरणान् कलया सा प्रजापतिः।।" इति ब्रह्मवैवर्ते।

"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः।

मातुलः श्वशुरस्त्राता मातामहपितामहौ।।

बन्धुर्ज्येष्ठपितृव्यश्च पुंस्वेते गुरवः स्मृताः।।" इति कौर्मे (99, 504)

24. साधनम्

साध् + करणे भावे च ल्युट्। उपकरणम्, करणकारकविशेषः, तृतीयाविभक्तिः, द्रविणं, धनं, द्रव्यं, लिङ्गं, यातना, सेनसङ्गं, संसिद्धिः। कारणं हेतुः। यथा-

"औषधंन्यगदो विद्या देवी च विविधा स्थितिः।

तपसैव प्रसिद्ध्यन्ति तपस्तेषां हिसाधनम्।।" इति मनुः (11/338)। मारणम्।

"अधो शरस्तेन मदथमुजिझतः फलं च तस्य प्रतिकामसाधनम्" इति किराते। अनुव्रज्या, अनुगमनं, सैन्यं, सिद्धौषधिः, उपायः।

"तपोभिः प्राप्यते भीष्टं नासाध्यं हि तपस्यतः।

दुर्भगत्वं वृथा लोको वहते सतिसाधने।।" - इति मत्स्यपुराणम्। सिद्धिः, कारकम्, प्रमाणम्, व्याप्यम्।

"अनुमात्वनुमानं स्याद् व्याप्यं लिङ्गं च साधनम्।।" इति त्रिकाण्डशेषः।

25. भोगः

भुज् - भावकर्मादौ च। सुखे। दुःखे। सुखदु-खाद्यनुभवे। सर्पदेहे। तत्फणायां च इत्यमरः। धने। पालने। भोजने च इति मेदिली। देहे, सर्पे, माने चेति शब्दरत्नावली। विभवभेदे -

"कर्ता च देही भोक्ता चात्मा भोजयिता सदा।
भोगे विभवभेदश्च निष्कृतिर्मुक्तिरेव च।।" इति।

26. परमात्मा

सर्वस्य द्रष्टा सर्वस्य भोक्ता सर्वज्ञः सर्वानुभावी वात्स्या (1/1/9) परमात्तत्वं चात्र प्रकृतेः सृष्टिस्थितिलयकर्तृत्वम् (सि. च. । पृ.10)। अथवा नित्यज्ञानादिमत्वेन सर्वोत्कृष्टत्वम् (त.प्र. ।पृ.4) परमात्मलक्षणं च ईश्वरत्वम्। तच्च नित्यज्ञानाद्यधिकरणत्वम् (त.दी.)। अत्रादिशब्देनानन्दो गृह्यते। परमात्मसत्वे प्रमाणमनुमानम्। यः सर्वज्ञः एकः स एव चास्माकमीश्वरः (न्या.म.4पृ.5)। (2) शरीरनिरपेक्षज्ञानवान्।

"परमात्मा परं ब्रह्म निर्गुणं प्रवृतो परः।
कारणं कारणानां च श्रीकृष्णो भगवान् स्वयम्।।" (ब्रह्म.वै.पु. अध्यायः 23) "उत्तमःपुरुषस्त्वन्यः परमात्मेत्युदाहृतः (गीता 151)। ब्रह्मेति परमाप्मेमेति भगवानिति शब्द्यन्ते (भाग 1/2/11) इत्यादौ। 3 नित्यज्ञानादिमान्। स च गुणविशिष्टमात्मान्तरमिश्वरः (वात्स्या. 4/1/21) ईश्वरः एक एव। मायावादिवेदान्तिनस्तु मायावच्छिन्नचैतन्यमीश्वरः इत्याहुः। कर्मैवेति मीमांसकाः समुपासते। शिव इति शैवाः। पुरुषोत्तम इति वैष्णवाः। विशुद्धं चैतन्यमिति मायावादिनः। अपरिमिता अपाकृष्टा ज्ञानानन्दादयो गुणाः परमात्मनि सन्तीति माध्वाः जगुः। परमात्मा गुणशून्य एवेति मायावादिनो वदन्ति।

27. शोफः

शी पन्। शित्रे इत्यमरः। शयनकर्तरि शक्रपाते सति शेते। शी-आसी फुक् च शेफो अत्र न।" गोर्लिङ्गं चिह्नशोफयोः।"

28. धातवः

"रसासृङ्गमांसमेदोस्थिमज्जशुक्राणि धातव" शरीरधारणात् धातवः। ते च दूष्या। यस्मात् वातादीनां दूषणस्वभावत्वाद्या दोषसंज्ञा। सान्वर्थसंज्ञा। दुषयन्तीति दोषः। अतोऽवश्यं ते दूष्यमपेक्ष्यन्ते। कर्म विना कर्तुः क्रियायाः असम्भवात्। कर्तारं विना कर्मणो न। एवं दोषैर्विना रसादीनां दूष्यं नाम न घटते। तैर्विना वातादीनां दोष नाम। तस्मात् परस्परापेक्षत्वादनयोः दूष्यदोषयोः दूष्यत्वेन दोषत्वेन च संज्ञालाभः।

29. इन्द्रियाणि

"इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तम्।" घ निपातितः। इन्द्रस्यात्मनो लिङम्। ज्ञानक्रियासाधने। चक्षुरादौ। हस्तादौ च। इन्द्रियं च द्विविधम् - ज्ञानेन्द्रियकर्मेन्द्रियभेदात्। तत्र श्रोत्रादीनि ज्ञानेन्द्रियाणि। हस्तादीनि कर्मेन्द्रियाणि।

"श्रोत्रं त्वक् चक्षुषो जिह्वा नासिका चैव पंचमी।
वायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता।।" इति मनुः।

30. मोहमार्गः

मोहस्य मार्गः। मुह् घञ् ।मूर्च्छायां, भ्रान्तिसाधने, अज्ञाने, वेदोक्ते अविद्यावृत्तिभेदे, दुःखो, देहादिष्वात्मभिमाने च।

31. सन्मार्गः

सतां मार्गः सन्मार्गः। सत्-अस्-शतृ। सत्ये। साधौ। पूजिते धीरे। प्रशस्ते। विद्यमाने च इत्यमरः। सा च पतिव्रतायां स्त्रियाम्। सौरार्ष्ट्रमृदि। प्रह्मणि। "को तत्सदिति निर्देशो ब्रह्मणः त्रिविधः स्मृतः" इति गीता। पतिव्रतापरत्वे संज्ञात्वाभावात् तस्याभावः।

32. कारणम्

कारयति क्रियानिवर्तनाय प्रचर्तयति। क्रियानिष्पादके हेतौ। उद्देश्येदेहे। इन्द्रिये। कृ - वधो स्वार्थे णिच् भावे ल्युट्। वधे। करवाद्यभेदे। करण एव कारणः। कारस्थे करणमेव क्लार्थो अण्। साधने। कर्मणि। गीतभेदे इति रत्नकोशः। न्यायमते कारणत्वलक्षणभेदादिकं मुक्तावल्यां प्रदर्शितम्। यथा - "पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्।" पारिमाण्डल्येति पारिमाण्डल्यम्। अणुपरिमाणम्। कारणत्वं च ताभिन्नामानित्यर्थः। अणुपरिमाणं तु नकरस्यापि कारणम्। तद्धि स्वातन्त्र्येणारब्धंद्रव्यपरिमाणारम्भकं भवेत्। तच्च न सम्भवति परिमाणस्य स्वजातीयोत्कृष्टपरिमाणजनकत्वात् महदारब्धस्य महत्तरत्ववत् अण्डजन्यस्याणुतरत्वप्रसङ्गात्। एवं परममहत्परिमाणंमतिन्द्रियसामान्यं विशेषं चेति बोध्यम्। इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वं, ज्ञायमानसामान्यं न प्र्यासत्तिः, ज्ञायमानं लिङ्गं नानुमितिकरणं इत्यभिप्रायेण मानसप्रत्यक्षे आत्ममहत्वस्य कारणत्वात्

महत्परिमाणं कालादेर्बोध्यम्। तस्यापि न कारणत्वमित्याचार्याणांमाशयः इत्यन्ये। तन्न। ज्ञानातिरिक्तं प्रति कारणतया एव आचार्यैरुक्तत्वात्

"अन्यथासिद्धिशून्यस्य नियतापूर्ववर्तिता।

कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम्।।" इति

तृतीयाध्यायस्य सारः

अद्वैतवादः अत्र दृश्यते। आत्मीयभावेनात्मा अनुमीयते। स्वपदस्य ज्ञातिधनाद्यर्थे स्वीकृते सति लौकिकार्थबोधो जायते। तेन च मृत्युपाशं प्राप्नुवन्ति आत्मात्मीयार्थे सति स्वर्गस्थिताः भवन्ति। अदृष्टं स्वज्ञात्वा अनर्थं प्रतिपद्यते। अहमेव ज्ञानम्। मत्परं नित्यसत्यं यदात्मा तत् दृश्यम्। व्यावहारिकसत्योऽहं द्रष्टा। व्यावहारिकेसत्येन साक्षात्सत्यस्य सूचना भवति।

सोपाधिकोऽहं ज्ञानमात्मा च ज्ञेयम्। आत्मा अव्यक्तः अहं तु व्यक्तः। अस्य विपर्ययः तदुपाधिः। आत्मा बोध्यः अहं बोधः। यथा व्यापकं धूमं दृष्ट्वा व्याप्यः अग्निरनुमीयते तथा व्यापकं मां दृष्ट्वा व्याप्यस्यात्मनोऽनुमानम्। वह्निः इन्धनेन वर्धते। निरिन्धनेन च शमं याति। यथा अस्मदिस्थितात्मा अस्मच्छान्तौ शमं नयेत्। अहमाधारः आत्मा चाधेयः। आधेयभूतस्यात्मनः साक्षी अहम्। यथैकस्माद् बीजात् बहुबीजाश्रयः महावृक्षो भवति तथा एकात्मसमुद्भूतः अहं नानारूपेण वर्ते। गुरुशिष्यप्रसङ्गेन यत् ज्ञानं तत् सोपाधिकं ज्ञानमुच्यते। स्वप्रकाशकं ज्ञानं सत्यम्। तच्चात्मा। आत्मा वै पुत्र इति वेदशासनानुसारेण तत् पारम्पर्येण पितामहात्पितरि पित्रा च मयि प्रकाशते। तस्मादहमात्मैव नात्मीयः। कारणं कार्यं च मयि एव वर्तते। जीवात्मपरमात्मानौ पितृपुत्रौ मयि स्थिरौ। तौ खगौ भागेफलप्रदं संसारवृक्षमासाद्य वसतः। परमात्मा तु सुखाख्यफलमश्नाति, जीवस्तु विषादं मोहदं दुःखं भुञ्जति।

चतुर्थोऽध्यायः

प्रत्यक्षात्मप्रबोधकथनम्

ब्राह्मणेभ्यो नमो नित्यं यत्र ब्रह्म प्रतिष्ठितम्।
ब्राह्मणा क्षत्रविट्शुद्रास्तेभ्यस्तस्मान्नमो नमः।। 1
नानारूपं मनोगम्यं चिन्मयं प्रणवात्मकम्।
यत् प्रसूत प्रकाशोऽहं वन्देहं पितरं हृदा।। 2
वन्देहमात्मनात्मानं यो मां कृत्वा प्रशाम्यति।
तमहं कृतवानस्मि पितामहसमीक्षणात्।। 3
प्रणवस्तु नवात्मत्वात् नवपुत्रमधिष्ठितः।
स सुतः संज्ञया युक्तो पितरं चापि जीवयेत्।। 4
प्रणवात्पुत्रभूतोऽस्मि संज्ञयाहं पितामहः।
आत्मसंज्ञाप्रबोधेन पितरं कृतवानहम्।। 5
रूपेण पुत्रभूतोऽस्मि आत्मना च पिता स्मृतः
नाम्ना पितामहः साक्षात् साक्षित्वात्प्रपितामहः।। 6
अहं त्वद्दृष्टरूपत्वादस्मद्भावविवर्जितः।
सर्वस्मिन्नहमित्यास्ते लिङ्गभावबहिष्कृतः।। 7
तथाप्यहं लिङ्गधरः पितुः प्रियचिकीर्षया।
मातरं सम्यगालोक्य कर्मज्ञानपरायणः।। 8
साध्यसाधनरूपेण पितरौ मे प्रकाशितौ।
तयोर्मेलनतः प्राप्यमात्यन्तिकसुखं ततः।। 9
साध्यं कामं विजानीयात् इच्छा साध्यस्य साधनम्।
तद्योगः सुखमित्युक्तमहं तस्य चमत्कृति।। 10
इच्छान्तस्था बहिः कामस्तयोर्योगोऽर्थ उच्यते।
इच्छाकामोद्भवो मोक्षस्तयोः प्रीत्या भविष्यति।। 11

तयोर्विरोधात् स्वभ्रंशः स्वभ्रंशान्न सुखं भवेत्।
असुखाच्च भवेन्मृत्युस्तदा जन्म निरर्थकम्।। 12
इच्छाकामौ तु मां प्राप्य मुमुदाते परस्परम्।
तेषामालम्बनायाहं रूपमेतत् प्रकाशितम्।। 13
पूर्णम् स्थिरतरं स्वच्छं केवलं निर्विशेषणम्।
वेदातीतं सुसूक्ष्मं मे रूपं त्वनुभावात्मकम्।। 14
मय्यावेश्य स्थितौ तौ तु पितरौ चित्तवर्तिनौ।
नानारूपधरात्मनौ नानाशृङ्गारकारकौ।। 15
अपूर्णावस्थिरौ स्वच्छौ दम्पती सविशेषणौ।
वेदात्मानौ स्थूलरूपौ प्रणवेक्षणसौहृदौ।। 16
तयोर्हृदयवर्तित्वात्तद्गुणान् मयि वीक्षते।
करोमि सृष्टिसंहारौ तन्मय्यौ पितरौ मम।। 17
पितरौ कालमायाख्यौ प्रणवौ बहूरूपिणौ।
विना तु सृष्टिसंहारौ कथं तौ भवतः प्रभू।। 18
तत्प्रियायाहमधुना भवं प्राप्य सुनिर्वृतः।
अवाक्शिरसलोकांश्च ऊर्ध्वम् कर्तुम् यतामहे।। 19
कालमायोभयोर्नाशादव्यक्तस्त्ववशिष्यते।
तदेव मं विजानाति मत्तः कालः प्रवर्तते।। 20
संहारादिं तु मां विद्यात् सृष्टयन्तर्भवमेव तत्।
व्यक्तावन्तर्भवो व्यक्तस्तस्मात्तत्पितरौ च तौ।। 21
मय्येवाद्यन्तकर्तृत्वादाद्यन्तं मां न बाधते।
अरूपत्वादनाद्यन्तस्त्वाद्यन्ते मां प्रपद्यते।। 22
भूतं भव्यं च मां याति वर्तमानं भवात्मकम्।
भवेप्यनुभावाकारमतर्क्यमिति मां विदुः।। 23
व्यावहारिकसत्ये तु बोध्यबोधकसंयुतम्।
यत्सत्यं पितरौ तन्मे तदानन्तरिकोऽप्यहम्।। 24

प्रातिभासिकसत्योऽहं साधनं नैव मे भवेत्।
युक्तिभिन्नैव गम्योऽहं अव्यक्तः केवलत्वतः।। 25
उभयोर्सुखसंयोगाद् सुखमेवास्मि सर्वदा।
दुःखं कदापि न भवेदस्ति चेत् प्रणवे चले।। 26
भोग्यभोगोभयोर्योगे यत्कृत्यं तदनर्थदम्।
कर्मणो वर्तमानत्वाद्यत्नं तत्र भविष्यति।। 27
अयत्नान्न भवेत्सौख्यं यत्नोऽनर्थविधायकः।
अयत्नात्सुखमाप्नोति यत्नस्तत्र न सम्भवेत्।। 28
इदानीं जडमध्यस्थो भव्भावतिरस्कृतः।
बडवानलावच्छेदे तिरस्कृतमहामहः।। 29
जडं शरीरं जानीयात् तस्मिच्छेते महेश्वरः।
तमेव मां जिवानीयात् जडराशिर्ममाश्रयः।। 30
मूढं मामाश्रयं विद्यात् सर्वज्ञोऽहं महेश्वरः।
तस्माज्जलाशयं प्राप्य शयिष्येऽहं सनानतः।। 31
जीवं ये मां न जानन्ति ते सर्वे जडतां गताः।
मामित्यात्मपरामर्शी आकारान्तो नमामिह।। 32
एवं विधिंनिषेधः स्यात् अर्थतत्वं प्रकाशितुम्।
विधि साधयितुं सत्यं निषेधस्तु विधीयते।। 33
गुणा एव च सत्यानि कार्याणि गुणतो भवेत्।
कारणं गुणतो भूयात् गुणः सत्यमसद् गुणी।। 34
आत्मानां निर्गुणं विद्यादनात्मा गुणवान् भवेत्।
आत्मवानिति चात्मानं यश्चिन्त्येत् मूढ एव सः।। 35
आनात्मानं गुणैर्हीनमात्मानं चिन्तयेत्तु यः।
तं तु वैद्यमिति ब्रूयाद् आत्मकार्यप्रकाशकम्।। 36
असदात्मेति विज्ञेयमात्मकार्यं तु सद्भवेत्।
अनर्थानां निवृत्तित्वादर्थमेव भविष्यति।। 37
आत्मज्यानिः यदायाति तदा चैव परोदयः।
दुःखभाजनमात्मास्यात् परंतु सुखभाजनम्।। 38

आत्मामर्त्यमिदं विद्यादीश्वरस्तु परस्स्मृतः।
मर्त्यभावपरित्यागादीश्वरत्वं भवेदिह।। 39
नश्वरंत्विति यद्भावः तद्भावं मर्त्यमुच्यते।
यस्मिन्ननश्वरं भावमैश्वर्यम् तदुदाहृतम्।। 40
अज्ञानात्माशरीरं स्यात् ज्ञानात्मा जीव उच्यते।
उभयं भिन्नरूपत्वादनर्थम् स्यादनाश्रयात्।। 41
अद भाक्षण इत्यस्मात् निषेधो मेत्युदाहृतः।
आत्मेति कथ्यते यत्र तत्र भोगो न विन्दति।। 42
अकार्यत्वादरूपत्वात् केवलात्मा निरर्थकः।
अहं तदुभयोर्योगादक्षरः क्षररूपधृक्।। 43
गुणवान् मम देहोऽयं विद्यायोगे तु तद्गुणम्।
विद्यायोगादहं वैद्यो योगत्वात्कीर्त्यतां गतः।। 44
नैव मे कारणं किंचित् योगत्वात्सर्वकारणम्।
अहं कार्यम् न जानामि सर्वेषां कार्यसाधक।। 45
अहं तु योगकृद्वैद्यो योगो वैद्यमिति स्मृतम्।
मत्कारणमहं विद्यात् मत्कार्यम् त्वहमेव च।। 46
कार्यकारणरूपस्य नानारूपाणि कारणम्।
नानागुणं तु मत्कार्यम् विद्यायोगस्वरूपिणः।। 47
अज्ञानमेवमद्रूपं ज्ञानं मद्हृदयं स्मृतम्।
अज्ञानेनावृतं बाह्यं ज्ञानेनान्तःप्रपूरितम्।। 48
*भवोऽस्मि सत्यं भव एव जन्म मां जानतीत्थं विमलैकबोधम्।
स्वतः प्रवृत्तं रमयाश्रिताङ्गं नारायणं तं भवमित्यवैमि।। 49
पालनार्थम् भवो भूत्वा साक्षान्नारायणो हरिः।
ब्रह्मरूपेण चरति मायामिलितविष्टरः।। 50
सदसद्रूपमेतन्मे मायेशस्य मनः प्रियम्।
एतत्परमहंसानां प्रियमानन्दकारणम्।। 51
एतन्निरस्तकुहकं धर्मकामार्थसाधनम्।
सर्वेषां स्वात्मभावेन रूपं हृदयवेष्टितम्।। 52

1* छन्दोभङ्गः

रमारमणमेतन्मे रूपमन्यैर्न बोध्यते।
बोध्यबोधस्वरूपेण यस्मिन् जीवद्वयं स्थितम्।। 53
कालकर्मगुणादीनामाश्रयं भूर्भुवः स्वः।
तदाश्रयस्तु प्रणवः प्रणवस्याश्रयोऽप्यहम्।। 54
भूतभव्यैकरूपेण वर्तुलो वलयाकृति।
अहं मय्येव सकलं वर्तते प्रणवात्मकम्।। 55
अकारं तु स्वरं विद्याद् हकारो व्यंजनः स्मृत।
स्वरव्यंजनसंयोगादहमित्यभिधीयते।। 56
अक्षेत्युच्चरणादेवं प्रत्याहारं लिपेः क्रमात्।
अक्षेण राजमानत्वादक्षरं मां प्रपद्यते।। 57
अक्षरक्षरणाच्छन्दः तस्मान्मामभ्यधात्क्षरम्।
मायापुरुषयोर्योगादात्मामायेति सूचितम्।। 58
व्यक्तस्योभयपार्शेऽदमव्यक्तमिह किं भवेत्।
अव्यक्तस्योभयं पार्श्वं तथा व्यक्तं भविष्यति।। 59
अव्यक्तं व्यक्तमध्यस्थं व्यक्तमव्यक्तमध्यगम्।
व्यक्तं वाऽप्यथवाव्यक्तं मध्यमं पुरुषं वदेत्।। 60
इदानीं व्यक्तमध्यत्वादव्यक्तभावं गतोऽस्म्यहम्।
अहं व्यक्तेः पुराव्यक्तोऽप्येवमद्रूपमादिशेत्।। 61
अन्यथा मां वदन्त्येके ते तु मायावलोकिताः।
मायेत्युभयरूपेण मत्पार्श्वपरिवर्तिनी।। 62
असती वामपार्श्वस्था सती दक्षिणपार्श्वगा।
मुख्यं तु दक्षिणं पार्श्वम् वामपार्श्वम् तु निन्दितम्।। 63

इति

प्रत्यक्षात्मप्रबोधकथनं नाम

चतुर्थोऽध्यायः

चतुर्थाध्यायस्य टिप्पणी

1. ब्राह्मणः

अदृष्टविशेषप्रयोज्यब्राह्मणत्वमधर्मवान्। यथा जात्या ब्राह्मण इत्यादौ। अत्र ब्राह्मणपदार्थघटकतादृशधर्मे तृतीयान्तर्थस्य जात्यभेदस्यान्वयः। अत्रार्थे व्युत्पत्तिः - ब्रह्म वेदं परब्रह्म वा वेत्यधीते वा इति। ब्राह्मणलक्षणं च विशुद्धमातापितृजन्यत्वम्। अत्र विशुद्धत्वं च षट्कर्माधिकारत्वम्। तस्य स्वरूपं यथा -

"जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च।

एभिर्युक्तो हि यस्तिष्ठेन्नित्यं स द्विज उच्यते।।" इति वह्निपुराणे। वसिष्ठेनोक्तं ब्राह्मणस्वरूपं यथा-

"योगस्तपो दमो दानं सत्यं शौचं दया श्रुतम्।

विद्याविज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम्।।" इति।

ब्राह्मणगुणप्रयुक्तं फलमाह सर्वत्र दान्ताः-

"श्रुतपूर्णकर्णा जितेन्द्रियाः प्राणिवधे निवृत्ता-। इति। तस्य माहात्म्यादि यथा सर्वेषामेव वर्णानां ब्रह्मणः परमो गुरुः। तस्मै दानानि देयानि भक्तिश्रद्धासमन्वितैः" इति वाचस्पत्यम्। किंच अविद्वांश्चैव विद्वांश्च बाहेणो दैवतं महत्। अत्र जन्मना ब्राह्मणो गुरुः इति स्मृतिर्ज्ञेया। मनुना अपि उक्तम्। यथा-

"वैशिष्ट्यात् प्रकृतिश्रैष्ट्यात् नियमस्य च धारणात्।

संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः।।"

2. चिन्मयम्

ज्ञाने चेतनायाम् इत्यमरः। चैतन्ये। "सच्चिदान्दविग्रहम्"। चित्तवृत्तिभेदे। "चिदसि मनसि धीरासि "इति यजुर्वेदः।" अचेतनदेहादिसंघातस्य चेतनत्वं सम्पादयन्ती बाह्यवस्तुषु निर्विकल्परूपं समान्यज्ञानं जनयन्ती वृत्तिश्चित्तं तदेवात्र चिदित्युच्यते। निर्विशेषस्फुरणमात्रे चेतने स्वतः एव प्रकाशमाने ब्रह्मणि "निर्विकल्पकं सर्वावभासकं ज्ञानं प्रत्यक्षात्मस्वरूपं चिदिति" व्याख्यातारः। "चिदिहास्मीति चिन्मात्रमिदं भावयेत्" इति वेदान्ते। इति योगवासिष्ठम्।

3. लिङ्गभावः

लिङ्गस्य भावः लिङ्गभावः। लिगि अच्। चिह्ने पुंसः असाधारणचिह्ने उपस्थेन्द्रिये इत्यमरः। अनुमानसाधने हेतौ।। सांख्योक्ते प्रधाने तस्यात्मविवेकहेतुत्वात् तथात्वम्। शिवमूर्तिभेदे। व्याप्ये। व्यक्ते। शब्दनिष्ठे। पदसाधुताप्रयोजके। धर्मभेदे अर्थप्रकाशनसामर्थ्ये च। "क्षमता च लिङ्गम्" इति मीमांसकाः। "लिङ्गत्वच्च प्रकृतगुणगतावस्थात्मको धर्म एव तद्विशेषः च पुंनपुंसकत्वादिः।

4. लिङगधरः

लिङ्गं धरतीति लिङ्गधरः।

5. इच्छा

इष् भावे। इदं भूयादिति। वेदान्तिमते मनोधर्मभेदे, सुखदुःखसाधनविषयतन्निवृत्तौ न्यायमते, सुखादिज्ञानेन तत्साधनत्वज्ञानेन च जायमाने इदं मे भूयादित्येवंरूपे आत्मधर्मे। अभिलाषे च।

"आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत्कृतिः।

कृतिजन्या भवेच्चेष्ठा चेष्टाजन्यो भवेत्क्रिया।।" इति न्यायसिद्धान्तः। "कामसङ्कल्पो विचिकित्साश्रद्धा श्रद्धाधृतिरधृतिर्धीर्भीरित्तेत् सर्वम् मन एवेति" श्रुतेः मनोधर्मत्वमिति सांख्यवेदान्तिनः। "विगतेच्चाभयक्रोधाः" इति गीता।

सा इच्छा च द्विविधा। फलोपायरूपविषयभेदात्।

तत्र फलेच्छां प्रति फलज्ञानं कारणम्। अत एव स्वतः पुरुषार्थः सम्भवति। तत्रेदं बोध्यं फलेच्छायां कारणं यत् सुखाज्ञानमुक्तं तत् स्मरणानुमित्यादिसाधारणम्। प्रत्यक्षत्ये प्रत्यक्षं प्रति विषयस्य हेतुतया विषयज्ञानजन्यसुखादेर्वर्तमान एव तत्सम्भवेन वर्तमानस्य सुखस्य सिद्धत्वात् सिद्धे च इच्छाविरहात् न तद्विषयकेच्छासम्भवमिति सूचितं चेतत् कणादसूत्रोपस्कारयो यथा "सुखाद्राग" इति।

उपायेच्छां प्रति इष्टसाधनज्ञानं हेतुः। भवति च पाके भोजनसाधनतया, भोजने च क्षुन्निवृत्तिसाधनतया ज्ञानादिच्छा। सेयमिच्छा ज्ञान कृत्यादिवत् सविषया। तद्विषयश्च द्विविधाः, वाधिताबाधितभेदात्। यत्र इष्टसाधने वस्तुनि इष्टसाधनत्वज्ञानादिच्चा सा तद्विषयिणी। यत्र तु अनिष्टसाधने वस्तुनि इष्टसाधनत्वभ्रमजा सा असद्विषयिणी।

सा च प्रणिमात्रसाधारणी। ईश्वरेच्छा तु सदा सद्विषयिछी तस्याबाधितपदार्थविषयकत्वाभावादेव तथात्वम्। तेन तस्या नित्यत्वेन इष्टसाधनत्वज्ञानाधीनत्वाभावेऽपि योगिनां तु प्रकामःकामावसायितारूपैश्वर्ययोगात्, तदनुसारिणी एव विषया भवन्तीति नासद्विषयिणी।

सेयमिच्छा अन्तःरकरणधर्मो नात्मधर्मः इति वेदान्तिनः प्रतिपेदिरे। आत्मनो निर्गुणत्वाद् प्रागुक्ततया "कामः सङ्कल्पः" इत्यादि श्रुत्या मनोधर्मत्वावगमःच्च तथात्वम्। यथा च कामादीनां नात्मधर्मत्वं तथा शङ्कापूर्वकं उपनिषद्भाष्ये समर्थितम्। यथा "सुखित्वदुःखित्वादिदर्शनात् नेति चेन्न। "न लिप्यते लोकदुःखेन बाह्य" इति श्रुतेः।

(कामस्य हृदयाश्रितत्वं प्रसिद्धम्। एवमेव सांख्याः पातञ्जलाश्च ज्ञानादिवत् सुखदुःखेच्छाछ्वेषप्रयत्नधर्माधर्माऽपि बुद्धेरेव धर्माः इत्याहुः। ईश्वरेच्छा तु समूहालम्बनात्मिका सक्वजगत् भूयादित्याकारिका। "सो कामायत बहुस्यां प्रयाजयये" त्यदिश्रुति। इच्छा नित्येति नैयायिकादयः। नित्यत्वं च न तत्र कारणापेक्षा। व्यामोहादिवदनित्येति वेदान्तिनः। मिथ्यात्ववादिमतेऽपि सृज्यमानजीवादृष्टरूपसहकारेणैव तत्तत्कार्योत्पत्तिरिति ईश्वरशब्दे वक्ष्यते। मनोधर्मत्ववादिमते मनस्त्रिगुणात्मकत्वे अपि रजस एव तत्कारणत्वम् "काम एष बोध एष रजोगुणसमुद्रभव-" इति गीतायां कामस्य रजोगुणकार्यवतोक्तेः। अत एव इच्छाशक्तिक्रियाशक्तिज्ञानशकित्स्वरूपिणीत्यादौ प्रकृतेरिच्छाशक्त्यादिरूपत्वकथनमिपि सङ्गच्छते। शक्तिशक्तिमतोरभेदात् प्रकृतिशर्थक्तत्वाच्च तस्याः बुद्धिगुणत्वमवगम्यते। अत एव "या देवी सर्वभूतेषु इच्छारूपेण संस्थिता" इत्युक्तम्।

ईश्वरोपाधिमायया इच्छादिमत्वेनैव ईश्वरस्य तद्वत्वं रन्त्रत्रयपरीक्षायामुक्तम्। यथा-

"नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्मचैतन्यमेकम्
धर्मोधर्मीति भेदद्वितयमपि पृथग्भूय मायावशेन।
धर्मस्तत्रानुभूतिः सकलविषयिणी सक्वकार्यानुकूला
शक्तिश्चेच्छादिरूपा भवति गुणगुणिनोराश्रयस्त्वेक एव।।" इति। तन्त्रोक्ते कलिकायाः पीठखक्तिभेदे "इच्छाज्ञानक्रियाश्चैव कामिनी कामदायिनी" इत्युक्तम्।।)

6. कामः

अव्ययम् - कम् - घञ्। (1) अनुज्ञायाम् इति विश्वः। (2) निकामे (3) अत्यर्थो (4) काम्ये, कामाय हितम्। (5) रेतसि (6) वाढमित्यर्थे (7) अनुमतौ (8) इच्छायां "कामः सङ्कल्पो विचित्साश्रद्धा श्रद्धाधृतिरधृतिह्रीर्धीर्भिरित्येतत् सर्वम् मन एव इति श्रुतेः तस्य मनोधर्मत्वमिति वेदान्तिनः। सांख्याश्च मन्यतन्ते।

"अकामस्य क्रिया काचित् दृश्यते नेह कर्हिचित्।

यद्वति कुरुते किंचित् तत्तत् कामस्य चेष्टितम्।।" इति मनुना सर्वक्रियां प्रित कामस्य हेतुत्वमुक्तम्। सङ्कल्पः। अनेन कर्मणा इदमिष्टं फलं साध्यताम्" इति बुद्धिः। तथा च इष्टसाधनताज्ञानरूपात् सङ्कल्पात् काम इच्छा भवति। ततः क्रियानिष्पत्तिः। स च अप्राप्तविषयस्य प्राप्तिसाधने चित्तवृत्तिभेदः। कामस्तु रजोगुणहेतुकः। यथोक्तं गीतायम्।

"काम एष क्रोध एष रजोगुणसमुद्भवः।" इति। कामश्च इष्टविषयाभिलाषः। धर्मार्थकाममोक्षमध्ये कामशब्देन कामस्यैव ग्रहणं तस्यैव पुरुषार्थत्वात्।

कामनाविषयं च सुखास्वरूपमात्मैवेति वेदान्तिनः। तदेव मुख्यं प्रयोजनम् " न वा अरे पत्युः कामाय पतिः प्रियो भवति चात्मनस्तु कामाय पतिः प्रिये भवति" इति बृहदारण्यकोपनिषत्। सुखस्वरूपात्मन एव परप्रेमास्पदत्वोक्तेः। सुखमिव दुःखभावोऽपि मुख्यं काम्यमिति नैयायिकादयः। मोक्षकाङ्क्षिभिः काम्यमाने परमेश्वरे च। अनुरागभेदे, तत्रैव लोके कामशब्दस्य रूढिर्दृश्यते।

"देवीं दक्षिणबाहुशक्रनयनं कामं कलञ्छितम्।" इति। दक्षिणबाहुः ककारः। तस्य वर्णसय मातृकान्यासे दक्षमूले न्यस्यत्वात् तथात्वम्। शक्रो लकारः। नयनं वामनेत्रम्। तेन ईकारः कलालाञ्छितं बिन्दुभूषितम्, तेन क्लीमित्येवंरूपं काम इत्यर्थः। प्रकारान्तरेण तदुद्धारः। तन्त्रसारे श्रीक्रमे-

"तां विद्यां शृणु देवेशि काममिन्दुसमन्वितम्।
नादबिन्दुकलाभेदात् तुरीयस्वरसंयुतम्।।
समहाश्रिसुन्दरी विद्या महात्रिपुरसुन्दरी।
काकरे सर्वमुत्पन्नं कामे कैवल्यदायकम्।।

लकारे सदलैश्वर्यमीकारे सर्वसौख्यदम्।" इति कुञ्चिकातः। "परा च कमला कामो वाग्भवं शक्तिरेव च।" ककाराक्षरे च। शिवबीजं (ह)। तथा कामं (क) इन्द्रम् (ल) देवीं (सध इति नियोजयेत्।" इति षोडशीविद्यायां शक्तिकूटोद्धारे।

7. सुखम्

"धर्ममात्रसाधारणकारणकगुणः"। सुखं च जगतामेव काम्यं धर्मेण जन्यते। तथा च धर्मत्वेन सुखत्वेन कार्यकारणभावः। अयं च धर्मसुखयोः सामान्यकार्यकारणभावः प्राचां मतेनोक्तः। नवीनमते तु नित्यं विज्ञानमानन्दं ब्रह्मेति श्रुत्या भगवति नित्यसुखसिद्धौ धर्मस्य कार्यतावच्छेदकं जन्यसुखत्वं सुखत्वावान्तरजातिर्वा इति बोध्यम्। सुखस्य लक्षणं तु सुख्यहम् इत्याद्यनुव्यवसायगम्यसुखत्वं जातिविशेषः। यद्वा काम्यभावत्वम्। अथवा इतरेच्छानवच्छानधीनेच्छा विषयत्वे सति भावत्वम् (न्या.बो.)।

सुखं चात्मधर्म इति नैयायिकाः आहुः। तच्च चित्तधर्म इति सांख्याः । अत्र सांख्यानां मायावादिनां चायमाशयः। सुखं चित्तधर्मोऽपि अध्यस्ततया प्रतिबिम्बरूपेण वा आत्मनि वर्तत इति।

प्रशस्तपादाचार्यादीनां मते अनुग्रहलक्षणं सुखम्। स्वर्गाद्यभिप्रेतविषयसान्निध्ये सति इष्टोपलब्धीन्द्रियार्थसन्निकर्षात् धर्माद्यपेक्षात् आत्ममनसोः संयोगात् यद्यदनुग्राह्याभिष्वङ्गनयनादिप्रसादजनकमुत्पद्यते तत्सुखम्। तदिदमतीतेषु विषयेषु स्क्चन्दनादिषु स्मृतिजम्। अनागतेषु सङ्कल्पजम्। अनित्येच्छानधीनेच्छाविषयः सुखम्। सुखत्वसामान्यंवत्। इदं च जीवेश्वरसुखसाधारणलक्षणमिति विज्ञेयम्।

निरुपाद्यनुकूलवेद्यं सुखम्। अत्रानुकूलकमिच्छाविषयः उपाधिः प्रयोजकः इत्यर्थ इति पदार्थचन्द्रिकायामुक्तम्। सर्वेत्मनामनुकूलवेदनीयम् सुखमिति तार्किकाः। बुद्धिसत्वस्य परिणामविशेष इति सांख्याः आहुः। स्वर्ग इति मीमांसकाः।

न्यायमते सुखं चतुर्विधम् - वैषयिकं, आभिमानिकं, मानोरथिकंम्, आभ्यासिकं चेति। मीमांसकमतें च सुखं द्विविधम् - सांसरिकं पारमर्थिकम्। वेदान्तिमते च सुखं द्विविधम् - नित्यं जन्यं चेति। तत्र विषयसम्पर्काद्वैषयिकं सुखं जन्यम्। ब्रह्मस्वरूपं तु सुखं नित्यमिति।

8. अहम्

तत्कालीनस्वातन्त्रयोच्चरयितृच्चैत्रत्वादिविशिष्टः। अत्र स्वातन्त्रयोक्त्या च "वाच्यस्त्वया मद्वचनात्स राजा" इत्यादौ न मत्पदात्कवेर्बोधः (दि.4पृ179.) अत्र स्वातन्त्र्योच्चारणम् (ग.शक्ति-पृ 27)। स्वोच्चारणर्कृतावच्छोदकधर्मावच्छिननः। यथा अहं गच्छामीत्यादौ अर्मदर्थः (ग.शक्ति.पृ.26-27)। अत्र स्वोच्चारणकर्तृतावच्छैदकावच्छिन्नविषयकत्वस्वजन्यत्एतदुभयसम्बन्धेन अस्पत्पदप्रकारकबोधविद्यायकः संकेतः अस्मत्पदस्थले अभ्युपेयते।

9. मोक्षः

मोक्ष असने + भावे घञ्। मोक्ष्यते तुखमनेन। मोक्ष करणे घञ्। मुक्तिः, "न मोक्षो नभासः पृष्ठेन पाताले न भूतले।

सर्वाशासंक्षये चेतः क्षयो मोक्ष इति श्रुतेः।।" इति सांख्यसागरे (2/27/25)। पाटलिवृक्षः (822), मोचनम्, "ताभ्योमोक्षस्तव यदि सखी, क्रीडालोलाः श्रवणपरुषैर्गजितैर्भीषायेत्साः-" इति मेघदूते (61)। मृत्युः, विश्लेषः

"जरामरणमोक्षाय मामाश्रित्य यततन्ति ये।

ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्।।" इति भागवत्गीतायाम् (17/19) "मोक्षाय विश्लेषणाथम्" इति तट्टीकायामानन्दगिरिः। आत्मस्वरूपदर्शनम्, निरसनं, पतनं, " मदोद्धताः प्रत्यनिलं विचेरुर्वनेस्थलीर्मर्मपरपंत्रमोक्षः" जीर्णपर्णपात इति तट्टीकायां मल्लीनाथः (124)

10. प्रीतिः

प्री तर्पणे + भावे हित्तन् तृप्तिः। यथा रामायणे (1/38/12)

"प्रतिज्ञां मम राजेन्द्र निर्वर्तयितुमर्हसि।

पुत्रयोरुभयोरेव प्रीतिं त्वमुपलप्स्यसे।।" इति। तत्पर्यायः मुत् (2) प्रमदः (3) हर्षः (4) प्रमोदः (5) आमोदः (6) सम्मदः (7) आनन्दः (8) आनन्दः सुखं इत्यमरः (1/4/28)। केचित्तु सुखादिसप्तकं प्रीतौ इष्टर्शनजन्यं सुखमिति मोक्षधर्मे नीलकण्ठः। कामपत्नीति मेदिनी। विष्कम्भादिसप्तविंशतियोगान्तर्गतद्वितीययोगः। तत्र जातंफलम्-

RASHTRIYA SANSKRIT SANSTHAN DEEMED UNIVERSITY UNDER MINISTRY OF H.R.D. GOVT. OF INDIA
ACCESSION NO. 30464
DATE 20/11/12

"प्रसूतिकाले यदि प्रीतियोगो
नरो ह्यरोगः सुखवान् विनोदी।
रक्तानुरक्तो विदुषां प्रपन्नः
संप्रर्थितो यच्छति वित्तमेव।।" इति कोष्ठीदीपः। प्रेम इति मेदिनी।

11. अनुभवः

अनु + भू - अप् (1) समृतिभिन्ने ज्ञाने। विषयानुरूपभावना च बुद्धिवृत्तेरनुभावत्वम्। "वृत्तिसारूप्यमितरत्र" इति पात ञ्जलसूत्रे, विषयानुरूपत्वं चित्तवृत्तिरभिहितम्। तथा हि - यथा पयः प्राणाल्या क्षेत्रादिकं प्राप्य चतुरस्राद्याकारणेण परिणमते एवमेव इन्द्रियादिप्रणाल्या अन्तःकरणं बहिर्निसृत्य विषयाकारेण परिणमते। तादृशपरिणामरूपवृत्या विषयगतमज्ञानं निवारयतीति अन्तःकरणस्य विषयरूपानुरूपभावनादनुभवत्वम्। स्मृतौ तु विषयसन्निकर्षाभावात् न विषयाकारताप्राप्तिरिति तद्भिन्ने ज्ञाने एवास्य प्रयोगोबाधितेति सांख्य वेदान्तिमतम्। अनुभवस्य प्रत्यक्षानुमानोपमानशाब्दभेदेन चतस्रो विधाः इति नैयायिकादयः। वेदान्तिनो मीमांसकाश्च अर्थापत्यनुपलब्धिरूपमधिकं तद्भेदद्वयमुररीचक्रुः। वैशेषिकाः सौगताश्च प्रत्यक्षानुमानरूपमेवानुभवद्वयं स्वीचक्रुः। अन्येषां सर्वेषामनयोरन्तर्भावात्।

12. प्रभुः

प्रभवतीति। अधिपतिः, स्वामि, ईश्वरः, पतिः, ईशिता, अधिभूः, नायकः, नेता, परिवृढः, अधिपः, पालकः।

"न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते।।" इति भगवद् गीतायाम् (5/28)। नित्यं, शक्तः।

"आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति" - इति कुमारसम्भवे (3/40)। श्रेष्ठः,

"वैशेष्यात् प्रकृतिश्रैष्ठ्यात् नियमस्य च धारणात्।
संस्कारस्य विशेषच्च वर्णानां ब्राह्मणः। प्रभुः।।" इति मनुः (10/3)। विष्णुः, शिवः, "हरश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः" इति महाभारते (13/17/31)।

13. प्रातिभासिकम्

प्रतिभासादागतः। प्रतिभासाधीनसत्ववति मिथ्यारजतादौ। वेदान्तमते हि त्रिविधं पारमार्थिकं व्यावहारिकं प्रातिभासिकं च। तत्र ब्रह्मणः सत्वं पारमर्थिकं त्रिकालाबाध्यत्वात्, घटादीनां सत्वं व्यावहारिकं व्यवहारकाले अबाध्यत्वात्, शुक्तौ रजतादेः सत्वं प्रातिभासिकं अधिष्ठानज्ञानबाध्यत्वात् प्रतिभासकालमात्रसच्चेति वेदिन्तपरिभाषायां स्थितम्।

14. जडम्

जलति लोकान् जीवयतीति। डलयोरैक्यात् लस्य डत्वम्। जलम्। इत्यमरटीकायां रायमुकुटः। जलति घनीभवतीति अचेतनपदार्थानां स्वरूपम्। यदुक्तं पंचदश्याम् (6/127)

15. बडवानलः

बडवायाः अनलः (1) बडवाग्निः तत्पर्यायः। सलिलेन्धनः 2) बडवामुखः (3) काकध्वजः (4) वाणिजः (5) स्कन्धाग्निः (6) तृणधुक् (7) काष्ठधुक् इति त्रिकाण्डशेषः। और्वः बाडवः इत्यमरः (1/1/56)। उर्वस्य ऋषेरपत्यम् और्वः। बडवायां विद्यमानो बाडवः। बडवायाः अनलः बडवानलः। मदनदहनाय हरनेत्रसमुद्रभूतः अग्निरपि बडवानलः। वटिकौषधिविशेषः। यथा-

"भक्षयेत्पवने चोग्रे बडवानलसंज्ञितम्।

इति बडवानलो रसः।।" इति वैद्यरसेन्द्रसारसंग्रहे ज्वराधिकारेऽ

16. विधिः

(1) स्रष्टरि (2) भाग्ये (3) क्रमे इत्यमरः। "चिकीर्षाकृतिसाधनत्वहेतुधीविभवो विधिः"। उक्ते प्रवर्तनरूपे। नियोगे। तज्जनके अप्राप्तप्रापकरूपे वाक्यभेदे। मीमांसकमते विधिस्वरूपभेदादिकं दर्शितम्। तद्यथा 'तत्र अज्ञातार्थज्ञापको वेदभागो विधिः। स च तादृशप्रयोजनवदर्थविधानेन अर्थवान्। तादृशं च अर्थम्, प्रमामान्तरेण प्राप्तं विधत्ते। यथा "अग्निहोत्रं जुहुयात् स्वर्गकामः" इति विधिना अनन्तरेष्वप्राप्तस्वर्गप्रयोजनवद् दोषं विधत्ते। अग्निहोत्रहोमेन स्वर्गम् भावयेदिति वाक्यार्शबोधः। "यत्र कर्म मानान्तरेण प्राप्तं, तत्र तदुद्देशेन गुणमात्रं विधत्ते। यथा दध्ना जुहोतीत्यत्र होमस्य अग्निहोत्रं

जुहुयादित्यनेन प्रप्तत्वात् होमोद्देशेन दधिमात्रविधानं दध्ना होमं भावयेदिति। यत्र तु उभयप्राप्तं तत्र विशिष्टं विधत्ते। यथा च सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात् सोमविशिष्टविधानम्। स च विधिश्चतुर्विधः - उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति। तत्र कर्मस्वरूपमात्रबोधको विधिरूत्पत्तिविधिः। यथा च "अग्निहोत्रं जुहोति" इत्यत्र च विधौ कर्मणः करणत्वेनान्वयः। अङ्गप्रधानसम्बन्धबोधको विधिः विनियोगविधिः। यथा "दध्ना जुहोति" इति। गुणविधौ धात्वर्थम् च बाह्यत्वेनैवान्वयः।

17. निषेधः

(नि + सिध् भावे घञ्)। (1) वारणे (2) निवर्तने। निषिध्यो अनेन करणे। अनिष्टसाधनताबोधकवेदादिवाक्ये "स च वेदः विधिमन्त्रनामधेयनिषेधार्थवादभेदात् पंचविधः। निषेधवाक्यानामर्थहेतुक्रियानिवृत्तिजनकत्वेनैवार्थवत्वात्। तथा हि यथा विधिः प्रवर्तनां प्रतिपादयन् स्वप्रवर्तकत्वनिर्वाहार्थम् विलेयस्य यागादेः इष्टसाधनत्वमाक्षिपन् पुरुषं तत्र प्रवर्तयति। यथा "न कलञ्जं भक्षयेद्" इत्यादिनिषेधोपि निवर्तयन् स्वनिवर्तकत्वनिर्वाहार्थम् निषेधस्य कलञ्जभक्षणस्य परानिष्ठसाधनत्वमाक्षिपन् पुरुषं ततो निवर्तयति। स्वतः पुरुषार्थभूतं दानहोमादीनां निषेधस्य पुरुषार्थत्वाभावेऽपि निषिध्यमानस्यानर्थहेतुत्वम्। यथा क्रतो स्त्रीगमनादेः।

18. अनात्मा

अनात्मा व्यक्तं महदादि बुद्धिरहंकारः, पंचतन्मात्राणि, एकादशेन्द्रियाणि। पंचभूतानि। एतावदेव आत्मानात्मानौ कथ्यते। तयोः विवेकः विचारः उच्यते।

19. आत्मज्यानिः

आत्मनः ज्यानिः आत्मज्यानिः। ज्यानिन्वयोहानौ। तटित्वम्। जीर्णे।

20. नश्वरम्

नाशयतियोगिनि।

21. केवलात्मा

केवलं च तदात्मा च केवलात्मा। केद् - सेवने वृषा कल। वल् प्रापणे। अद्वितीये असहाये। एकमात्रस्त्रियां "संज्ञाछन्दसोरेव नित्यम्"। ज्ञानभेदः। सांख्यंकारिकायामुक्तम्- "अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्' इति।

22. विद्या

ज्ञानं तच्च कणादनये यथा "विषेषणवद्विशेष्यलिङ्गपरामर्शा रूपगुणजन्यो बुद्धिविशेषः (त.व.213)। यथार्थज्ञानमिति भावः। विद्यायाः विभागादिकं तु बुद्धिशब्दव्याख्याने दृश्यम्। (2) विजातीयज्ञानहेतुः शास्त्रम्। यथा आन्वीक्षिकी न्यायविद्या। "आश्रयः सर्वधर्माणां विद्योद्देश्ये प्रकीर्तिता"। (वात्स्या.1/1/21) इति। न्यायनये विद्याश्चतस्रः आन्वीक्षिकीत्रयीवार्तादण्डनीतिरूपाश्चतस्रो विद्या विद्याप्रस्थाने कथिताः (गौतमसूत्रवृत्ति 1/1/1)। आन्वीक्षिकी न्यायविद्या। त्रयी वेदविद्या। वार्ता नीतिशास्त्रम्। दण्डनीतिस्त्वर्थशास्त्रम्। (3) पौराणिकनये विद्याश्चतुर्दशाष्टादश चापि।

"षडङ्गमिश्रिता वेदा धर्मशास्त्रपुराणकम्।
मीमांसा तर्कमपि च एता विद्याश्चतुर्दश।।" इति अष्टादश चान्यक्रोक्ताः।
"अङ्गनि वेदाश्चत्वारो मीमांसान्यायविस्तरः।
धर्मशास्त्रं पूराणं च विद्या ह्येताश्चतुर्दश।।
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थम् चविद्या ह्यष्टादशैव ताः।।" इति विष्णुपुराणम्। श्रुतौ तु विद्या द्विधैवोक्ता परा अपरा च। तत्र परा यया ब्रह्मावगमः सा। यथाक्षरमधिगम्यते सा परा इति श्रुतेः। ऋग्वेदादिलक्षणा परा। सा चाध्ययनाध्यापनरूपा। (4) "पशुगुणो विद्या" इति सर्वदर्शनसंग्रहे उक्तम्।

23. वैद्यः

। पण्डितः। यथा "नाविद्यानां तु वैद्येन देयं विद्याधनात्क्वचित्" इत्यादौ भिषाग्विशेषः। वैद्योत्पत्तिश्च "वैद्योश्विनिकुमारेण जातश्च विप्रयोषिति। वैद्यवीर्येण शूद्रायां बभूर्वुबहवो जनाः।।" इति पुराणेषूक्तम्।

24. अज्ञानम्

(1) ज्ञानाभावः (2) अविद्या। तत्रोक्तम् -

"अनादिभावरूपं यत् विज्ञानेन विलीयते।
तदज्ञानमिति प्राज्ञाः लक्षणं संप्रचक्षते।।" इति मायावादिवेदान्तिनो वदन्ति (सर्वदर्शनसंग्रहः पृ. 23)

25. ब्रह्म

वेद। यथा तस्मादेतद्ब्रह्मरूपमन्नं च जायते मुक्तावली। (2) तपः (3) सत्यम्। तत्वम् (5) हिरण्यगर्भादयो जीवाः (6) विप्रः (7) ऋत्विक्विशेषः (8) विषयभोगत्यागः (9) परब्रह्म परमात्मा इति वेदान्तिनो वदन्ति। "ब्रह्मेति परमार्मेति भगवानिति कथ्यते" (भाग. 1/2/1)। माध्वमते विष्णूरेव परब्रह्म। स चैक एव सच्चिदानन्दविग्रहः। मायावादिमते तु सगुणनिर्गुणभेदेन द्विविधं ब्रह्म। तत्र मायाश्रितः जाग्रताद्यवस्तात्रयसाक्षी च ईश्वरः सगुणः। मायातीतमवस्थात्रयातीतं च निर्गुणमिति विशेषो ज्ञेयः। ब्रह्मणः तटस्थालक्षणं च जगज्जन्मस्थितिप्रलयानां प्रत्येकमुपादप्रत्यक्षचिकीर्षाकृतिमत्वमिति। ब्रह्मणः स्वरूपलक्षणं च सच्चिदानन्दत्मकमिति। अत्र श्रुतिः "सत्यं ज्ञानमनन्तं ब्रह्म" (तौत्तिरीयोपनिषत् 2/1/1) इति। "निर्गुणं" निष्कलं शान्तं निरवद्यं निरञ्जनम् (श्वेताश्वतरोपनिषत् 6/19) इत्यादिश्च।

26. विष्टरः

"उर्ध्ववेशो भवेद्रब्रह्मा लम्बेकेशस्तु विष्टरः" इति "वामार्क्तस्तु विष्टरः" इति च स्मृत्युक्ते। दर्भकृते आसनभेदे। आसनमात्रे। वृक्षे। कुशमुष्टौ चेत्यमरः।

27. भूर्भुवःस्वः

भवत्यस्मिन्निति भूः। पृथिवीत्यमर-। यथा मनुः-

"न चैनं भुवि शक्नोति कश्चितप्यभिवीक्षणम्" इति। यथा च वैद्यकरन्तमालायामस्याः पर्यायः-

"भूर्भूमिः पृथिवी मेदिनी वसुधवनिः।
क्षितिरुर्वी मही क्षोणीक्ष्मा धारा कुर्वसुन्धरा।।" इति । स्थानमात्रमिति मेदिनी। यथा भागवते-

"यच्छक्तयो वदतां वादिनां वै।
विवादसंवादभुवो व्दन्ति।।" इति। यज्ञग्निरिति जडाधर-।

भक्तीति भूः। भू + भुरञ्जिभ्यां कित्। आकाश इति हेमचन्द्रः। महाव्याहतिभेदः। यथा मनुः-

"अकारवाप्युकारं च मकारं च प्रजापतिः।

वेदत्रयान्निरदुहत् भूर्भुवः स्वरितीति च।।"

स्वरव्ययम्। स्वर्यते सूयते इति स्वः। स्वः (पु) ज्ञतिः। यथा मनुः (5/104) आत्मा इत्यमरः (3/3210)। विष्णुरिति महाभारतम्।

28. अक्ष

अश्नुते व्याप्नोति विषयान् स्ववृत्या संयोगेन वा। इन्द्रिये। "अक्षाणि पण्डितजनाः विदुरिन्द्रियाणि"। उपनिषत्। ज्यातिषोक्ते राशीचक्रावयवभेदे। सिद्धान्तशिरोमणिगणिताध्यायोक्ते विषुवद्रदिनांके। नतिरूपे पलाशभेदे। पाशके कर्षपरिमाणे विभीतकवृक्षे तृषे, आत्मनि, रुद्राक्षे, सर्पे, जातान्धे, गरुडे च। तत्र रुद्राक्षे अक्षमाला। कर्षे "अनुभवति धाराभिः अक्षमात्राभिरिति, विभीतिके। "यथा वै द्वे आमलके, द्वे वा कौले, द्वौ वा अक्षै" इति श्रुतिः। व्यवहारे अक्षदर्शकः।

29. प्रत्याहारः

चित्तेन्द्रियादेः विषयेभ्यो निवारणे योगङ्गभेदे। तल्लक्षणं च "प्राणायामादिषट्केन प्रत्याहारः उदाहृतः। स्वविषयासंप्रयोगे चित्तस्य स्वारूपानुकार इवेति निच्चनिरोधे निरुद्धानीत्येव प्रत्याहारः।" "ततः परमा पश्यतेन्दिरयाणाम्" शब्दादिष्वव्यसनमिन्द्रियजय इति केचित्।

30. लिपिः

शब्दस्मारकः शब्दानुमापको वा रेखाविशेषः। यथा 'क' इति रेखा प्रजापतिरीशब्दस्य स्मारिका। केचित्तु लिपिं प्रमाणान्तरं मन्यन्ते। लिपिभेदास्तु तत्तद्देशभेदेन देवनागरीग्रन्थाक्षरलिप्यादयो बहवः। अत्र सिद्धान्तविदः तु लिपिस्तु शब्दस्मारकतया शब्दानुमापकतया वा प्रमायामुपयोगिनी न तु प्रमाणान्तरमित्याहुः। अमुमानं च अयं पुरुषः घटमानय इति शब्दविषयकाभिप्रायवान् घटमानयेति शब्दव्यंजकलिपिकर्तृत्वात्। यथा अहमिति अस्मदनुमानात् घटमानयेति शब्दस्यामुमितिर्विदति। ततः अर्थप्रत्ययः इति ज्ञेयम्।

31. छन्दः

छदि-संवरणे। धातोरनेकार्थत्वात् इच्छायां अच्। अभिलाषे (2) वंशतायाम् - "स्वच्छन्दोच्छलदच्छकुच्छकुहरछातेतराम्बुच्छटा" इति काव्यप्रकाशः। (3) विषभेदे चेत्यमरः। (4) रहसि। "वरदानात् पितुः कामं छन्दमृत्युरसि प्रभो"।

चतुर्थाध्यायस्य सारः

चिद्रूपः प्रकाशः सर्वेषु वस्तुषु प्रकाशतेति ज्ञात्वा ब्राह्मण-क्षत्रिय-वैश्य-शूद्रेभ्यो नमस्कारं करोति कविः। तं प्रत्यक् स्वरूपं नित्यसत्यं सद्वस्तुभूतमीश्वरं प्रकाशयितुं सत्यप्रमाणान्येव शक्तानि भवन्ति। एतादृशं सत्यप्रमाणमेव वेदव्यपदेशमर्हति। उक्तं च "एक एव पुरा वेदः प्रणवः सार्ववाङ्मयः" इति। अकार-उकार-मकारयुक्तेन रज-सात्विक-तामसगुणयुक्तेन प्रणवेनैव लोके सर्वाण्यपि वस्तूनि प्रकाशन्ते। निर्विकारं ब्रह्म अरूपं सत् सर्वस्मिन् वस्तुनि आस्ते। अद्वैतस्य मूलभूतः विवर्तवादः अत्र प्रतिपादितः। साध्यसाधनरूपेण इच्छाकामरूपेण कालमायाख्यौ पितरं मयि प्रकाशेते। रूपककल्पनया दम्पतीरूपेण कालमाययोः कल्पना क्रियते, अनात्मानं च तयोः पुत्ररूपेण।

वेदातीतं सुसूक्ष्मं पूर्णम् स्वरूपं निर्विशेषं ब्रह्म एव मायायाः विविर्तत्वात् साकारं प्राप्य सगुणः सन् भवं प्राप्य सुनिर्वृतः सन् अज्ञानावृतान् लोकान् ऊर्ध्वम् कर्तुम् यतते। एवं जगतः उपादानकारणत्वेन, पुरुषरूपेण लोकस्य निमित्तकारणत्वेन वर्तते। कालमाययोः नाशेन च अव्यक्तः परमात्मा अवशिष्यते। अत्रेदमुदाहरणम् - स्वशरीरात्प्रसारितेन तन्तुसमूहेन स्वकीयं नीडं निर्माय, स्वशरीरादाविर्भूतान् तन्तूनुपादानकारणत्वेनोपस्थापयति। वस्तुतः। तन्तुवायतन्तुसमूहयोरभेदोऽस्ति। एवं जगदुपादान कारणभूतः मायावच्छिन्नमात्मा परमात्मनः अभिन्न एव। विवर्तवादे तु केवलं निर्गुणं परब्रह्म अवशिष्यते। "स्वस्वरूपोमर्दनं विना अन्यथाभावो विवर्तः" इति लक्षणानुसारेण ब्रह्मणः कोऽपि परिणामः न सम्भवति।

बोध्यबोधकयुतं व्यावहारिकसत्यमिति मायावादिनो वदन्ति। तन्मतानुसारेण प्रतिबिम्बदर्शनेन बिम्बज्ञानं जायते। दर्पणरूपमुपाधिमाश्रित्यैवात्र प्रतिबिम्बस्य ज्ञानं भवति। किन्तु दर्पणे दृश्यमानस्य प्रतिबिम्बस्य ह्रस्वदीर्घादिभेदाः, वर्णभेदाः च बिम्बे न दृश्यन्ते। तस्मात् व्यावहारिकसत्यं स्वीकर्तुम् न शक्यते। प्रातिभासिकसत्ये साधानस्याभावात् तस्य स्वीकारो पि न युक्तः। ब्रह्मणः अव्यक्तत्वात् केवलत्वात् च युक्तिभिरपि अवगन्तु नशक्यते। अतः प्रत्यगात्मरूपं नित्यसत्यं प्रकाशयितुं वेदाः एव समर्थाः भवन्ति। कर्मज्ञानमये वेदे कर्मणि वर्तमानत्वात् दुःखमेव भविष्यति।

अत्र तु जडमध्यस्थः अहंपदार्थः बडवानलवत्तिरस्कृतः सन् शेते। एतादृशमर्थतत्वं प्रकाशयितुं वेदेः विधिनिषेधाः विधीयन्ते। "सत्यरूपो गुणो कायरूपस्य जगतः कारणभूतस्य परमात्मनश्च हेतुत्वेन वर्तते" इत्युक्त्वा कश्चिन्नवीनाशयः प्रकटितः। एवं च गुणः सत्यम्। गुणी असत्। आत्मा निर्गुणः अनात्मा तु सगुणः। तस्माद् "अहमात्मवान्" इति बोधः न युक्तः। अत्र तु आस्मा आत्मनः भिन्न" इति भावः स्यात्। अयमाशयः - आत्मा सत्यं भवति। "आत्मवान्" इत्यत्र रूपसद्भावातद् असत्। यः वात-पित्त-कफदूषितं शरीरं आत्मानमिति चिन्तयति, स आत्मकार्यप्रकाशकत्वात् "वैद्य" इति व्यवह्रियते।

शून्यवादिनः असदात्मवादिनः सन्ति। तेषां मते आत्मा असत् भवति। सत् तु आत्मनः कार्यम्। अनर्थे निवृत्ते सति अर्थः प्रकाशते। यथा वार्द्धक्यावस्थावगमने एव परमात्मविषयिणी चिन्ता हृदि जायते। दुःखभाजनं जीवात्मा, सुखभाजनं तु परमात्मा। शरीरं मर्त्यः ईश्वरस्तु परःस्मृतः। तस्मान्नश्वरं मर्त्यभावं उत्सृज्य अनश्वरमीश्वरं प्राप्नोति। अज्ञानात्मा शरीरम्, ज्ञानात्मा तु जीव उच्यते। तयोर्भिन्नरूपत्वादनर्थः स्यात्। एकरूपेण च अर्थः स्यात्।

पञ्चमोऽध्यायः

अज्ञानप्रकरणे असान्निरसनम्

जीवायनं कुमारेच्छुं वन्दे नारायणाभिधम्।
अन्योन्यमेलनादेकं पार्वतीपरमेश्वरम्।। 1
ईश्वरं शङ्करं दृष्ट्वा पार्वती प्रियकाम्यया।
त्रिदशैरीरिता वाणी माधवेति मुहुर्मुहुः।। 2
मायाश्च धवतां प्राप्तो माधवः पार्वतीपतिः।
ह्रीङ्कारः पुत्रभार्याभ्यां मिलितः स हरोऽवतु।। 3
हरार्धम् माधवेत्युक्तं देववाण्याभिरक्षितम्।
पार्वतीत्यर्धमादत्ते तामादीमित्यवैति ताम्।। 4
अहं तस्मादतीतोऽपि वैद्यभावं समाश्रितः।
सन्मार्गमीक्षितुं नित्यं तमेव शरणं व्रजे।। 5
माधवो पुंश्चली विद्यात् सदा पुरुषचिन्तया।
तदात्मा पुरुषो भूत्वा पुंश्चेष्टां विदधात्यपि।। 6
असतीं तां विजानीयात् तत्पार्श्वे शमसम्पदम्।
सत्याश्रितं शैवपदं नित्यं सदिति मन्मते।। 7
अनित्याश्रितपक्षं तु अनित्यासद् भवेत् ध्रुवम्।
पार्वत्याश्रितपार्श्वम् तु नित्यसत्यं भविष्यति।। 8
पर्वण्यावति या बुद्धिः पार्वतीं तां प्रचक्षते।
माधवो स्त्रीति या बुद्धिस्तद्बोधो माधवः स्मृतः।। 9
माधवो दक्षिणं पक्षं श्रीवन्दीपुरवासिनः।
तस्माच्छ्रीमान् महादेवस्त्वसदिति कथ्यते।। 10
माधवो रमणी रामा पुरुषस्य प्रयोगतः
पुल्लिङ्गवाचकेनोक्तस्त्वसतीर्भर्तृतो गुरुः।। 11
माधवस्यानुयायित्वात् वामदेवो भविष्यति।
श्रीवन्दीपुरवासी तु वामदेव इति श्रुतः।। 12

यदाश्रिताः क्षयं यान्ति वेश्यालालससेवनम्।
वेश्या पुरुषमाक्रम्य भोक्ष्यते पुरुषायती।। 13
तदधीनः पुमान् मूढः स्वकीयान्नावलोकते।
वेश्यायाः वामपार्श्वस्थो भृत्यत्वं प्राप्य वर्तते।। 14
वैकुण्ठपुरवासेच्छुर्वेश्यायाः पतिरेव च।
दासभावं समाश्रित्य स्वभावं परिमुञ्चति।। 15
सम्पत्प्राप्तपुरेऽप्यस्मिन् हरो माधववामगः।
दक्षिणं पक्षंमाश्रित्य वर्तते माधवोऽत्र तु।। 16
वामपार्श्वम् तु नीचं स्यात् दक्षिणं पार्श्वमुत्तमम्।
भर्तारं वामतः कृत्वा वेश्या वर्तते दक्षिणे।। 17
एवं स्यादसती भार्या नीचं कृत्वा स्वबान्धवम्।
तत्सङ्गमादसद्भावं मूढत्वं चात्मनो भवेत्।। 18
अजदेहसमुद्भूतो दक्षो नाम प्रजापतिः।
साक्षात्कोऽपि निजं रूपमसदालोक्य मोहितः।। 19
असतीं तनुमाश्रित्य ब्रह्माख्यं रूपमुज्झितः।
वेदरूपसमुद्भूतां सतीं दक्षोऽवमानितः।। 20
अत्यन्तकुपिता देवी सती सा स्वेन तेजसा।
प्रजापतेः प्रियतमं ददाहात्मकलेबरम्।। 21
असतामेति सद्बुद्ध्या बोधयन्ती प्रजापतिम्।
असद्देहात्मभावेन अन्धीभूतस्य चक्षुषम्।। 22
वेदानर्थाः भवन्ति स्म स्वार्थभावे तिरस्कृते।
तदा प्रभृत्यसज्जन्म भवति स्वार्थविच्युतम्।। 23
अजभावपरिभ्रष्टं वेदार्थस्य विघातकम्।
तमहं हतवानस्मि तस्याजत्वं पुनर्ददौ।। 24
तदा प्रभृति सम्भूतमनर्थम् वेदवर्त्मनि।
ब्राह्मणः कर्मकाण्डे च सोपवीतेति निश्चितः।। 25
सत्यङ्गनाशे भगवान् वेदार्थम् भावयन् हृदा।
दक्षिणामूर्तिरूपेण वेदार्थम् धृतवान् स्वयम्।। 26

सा देवी गोत्रजा भूत्वा हृदये धृतशङ्करम्।
प्रत्यक्षं तोषयामास परोक्षेणन्तरात्मना।। 27
वेदात्मा भगवान् शम्भुः दक्षिणं हृदि धारयन्।
तद्रूपस्तु विवेकाख्यः केवलात्मेति कथ्यते।। 28
प्रकृतिं हृदि निष्ठस्य भगवान् लोकभावनः।
इदानीं मम हृद्पद्मे गोत्ररक्षार्थमास्थितः।। 29
श्वशुरप्रीतिकाम्यार्थम् गोत्रजार्धशरीरभृत्।
यथा कैलासशिखरे तथा मामधितिष्ठति।। 30
मया तु खण्डिता वेश्या निरालम्बा मम प्रिया।
आश्रितारूपिणीभीता मद्दास्यं कांक्ष्यतेऽधुना।। 31
अजानने तु दक्षे तु रूपलक्ष्मीर्निराश्रया।
मद्भृत्यवर्गानाश्रित्य ममाङ्कणविमार्जिनी।। 32
दासीभावमुपाश्रित्य वर्तते मत्प्रियार्थिनी
रूपिणी सापि निर्लज्जा मम दास्यानि कुर्वते।। 33
भूसुराननादृत्य गोत्रजार्धवपुर्धरम्।
यतन्ते गोत्रनाशार्थम् गोत्रारिकृतसौहृदाः।। 34
गोत्रजा गोत्रबन्धुं मां गोत्ररक्षार्थमाश्रिता।
गोत्रानर्थप्रदातृंश्च विनाशयाम्यहमोजसा।। 35
इदानीं भूसुराःसर्वे भासुरं रूपमाश्रिताः।
विरूपं भर्त्स्यन्ते मां हृदा जानामि तान्यहम्।। 36
अहं तु दक्षिणामूर्तिर्दक्षकर्मविघातकः।
अरूपत्वाद्वैद्यरूपी विद्यासम्बन्धकार्यकृत्।। 37
सर्वेऽप्येवं विजानन्तु हृदयस्थं महेश्वरम्।
तदा हृदयदौर्भाग्यं दूरदूरं गमिष्यति।। 38
पितृरूपप्रणयतः सती शङ्करवल्लभा।
भर्तृवाक्यमतिक्रम्य यदायात्यसतीति सा।। 39
विस्मृत्यान्तरितं तेजो बाह्यरूपं समीक्षते।
तदेवासदिति प्रोक्तमव्यक्तंत्वन्यथा स्मृति।। 40

अव्यक्तं पुनरायाति असद्भूतं न सम्भवेत्।
सतां भावनया सच्च सत्वतामुपयास्यति।। 41
स्वशक्तिरसतो न स्यात् अव्यक्तस्तु,स्वशक्तिमान्।
तस्मात्स्वत्वं तु सत्यं स्यात् परं त्वसदिहोच्यते।। 42
स्वत्वं तु शब्दतन्मात्रमर्थस्तत् पर उच्यते।
अर्थस्त्वसदिति ज्ञेयो शब्दः सत्यं तु नित्यतः।। 43
अहं तु शब्दतन्मात्रं शब्दार्थो मां न बाधते।
प्लामन्तोलिति विख्याते शब्दमात्रेण गृह्यते।। 44
नाममात्रेण नित्योऽहं रूपनित्यत्वतो न च।
नाममात्रेण जानाति रूपालोकान्न मां स्मरेत्।। 45
रूपप्रकाशे तु जनो को भवानिति पृच्छति।
नाम्नोऽस्य श्रवणादेव बुबुधेत्यनुमीयते।। 46
पूर्वादृष्टघटालोके रूपान्नाम प्रपद्यते।
नामज्ञानं विना मां तु नैव जानाति कश्चन।। 47
नामासीति पुरा वाणी सव्यकर्णे प्रवेशिता।
सत्यं कर्तुम् वेदवाक्यं नाम्ना सञ्चारयाम्यहम्।। 48
वेदोऽपि मत्सत्यतया सत्यं भावं प्रपद्यते।
सत्यस्यापि च सत्यं मां वैद्यमित्यभिधीयते।। 49
साक्षाद्विद्यां योऽध्यास्ते स एव वैद्य इति श्रुतः।
तदात्मगुणनाम स्यात् ममात्मा व्यक्तमेव च।। 50
अव्यक्ताव्यक्तमात्मानं कारणस्यावलोकनात्।
व्यक्तमव्यक्तमापाद्य वर्तते रज्जुसर्पवत्।। 51
इत्यार्यशर्मरचितमात्मतत्वं पुरातनम्।
ब्रह्मज्ञानमनेकार्थम् सर्वेषामुपकारकम्।। 52

इति

अज्ञानप्रकरणे असन्निरसनं नाम

पञ्चमोऽध्यायः

पञ्चमाध्यायस्य टिप्पणी

1. कुमारः

कुमारयति क्रीडति, कुत्सितो मारो यद्यस्मात्। कौमारयति दुष्टान्। (1) कार्तिकेये (2) युवराजे (3) शुके पक्षिणि (4) अश्ववारके (5) वरुणवृक्षे (6) पञ्चवर्षीये बालके च इति मेदिनी। "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।" भागवते। (7) सिन्धुनदे (8) मन्त्रभेदे (9) स्कन्दे "अग्नेः पुत्रः कुमारस्तु श्रीमान् शरवणालयः" भागवते।

2. ईश्वरः

ईष्टे इति। ईश् + वरच्। यद्वा अश्नुते व्याप्नोतीति। अश्धातोः वरट् उपधायाः ईत्वं च। (1) शिवः। यथा - "अतोश्वरं देवगणः सह सप्तर्षिभिर्विभूम्" इति (कुमारम्भवे 7/51)। यथा वा-

"ततः सृष्ट्वा प्रजाः शेषं तदा तं क्रोधमीश्वरः।

विन्यस्तवान् स भूतेषु स्थावरेषु वरेषु च।।" इति । सुश्रुते कल्पस्थाने तृतीयाध्यायः। (2) कन्दर्पः इति मेदिनी। (3) विशुद्धसत्वप्रधानज्ञानोपहितवैतन्यम्" इति वेदान्तः। न्यायमते ईश्वरगुण। सांख्यादिषु चबुद्धिः इच्छा प्रयत्नश्च। ऐश्वर्यशाली।

3. शैवपदम्

शिवमधिकृत्य कृतो पन्थाः। वेदव्यासप्रणीते शिवप्रभाववर्णनात्मके महापुराणभेदे। शिवसम्बन्धिनि। "यावद्ध्यानं समाधिश्च तावच्छैवं प्रचक्षते" इति।

4. पार्वति

पर्वतस्यापत्यं स्त्री। दुर्गायाः पार्वतीशब्दनिरुवितर्यथा-

"तिथिभेदे कल्पभेदे पर्वभेदप्रभेदतः।

ख्यातौ तेषु च विख्याता पार्वती तेन कीर्तिता।।

पर्वस्य सुता देवी आविर्भूता च वर्तते।

पर्वताधिष्टातृदेवी पार्वती तेन कीर्तिता।।" इति प्रवृतिखण्डे दुर्गोपाख्याने उक्तम्।

5. श्रीमान्

श्रीरस्यास्तीति श्रीमान्। हरिश्रपति इति श्रि + किवकब्वचिप्रच्छीति विवप्,

दीर्घश्च (1) लक्ष्मीः, कमला, पद्मा, पद्मवासा, हरिप्रिया, क्षीरोदतनया, मा, लोकमाता। (2) शोभा। वृद्धिनामौषधम्।

" न दातुम् नोपभोक्तुं वा शाक्नोति कृपणः श्रियम्।"

6. असत्

अस् + शतृ ततोनञ्समासः। अविद्यमानम्। असाधुः। मूर्खः। ब्रह्मभिन्नवस्तु इति वेदान्तः। जडवर्गः। यथा-

"यच्च विंचित्क्वकिद्वस्तु सदसदाखिलात्मके।

तस्य सर्वस्य सा शक्तिः सा सदात्वं किं स्तूयसे सदा।।" इति देवीमाहात्म्ये (अध्यायः) सत् चेतनवर्गः। असत् जडवर्गः।

"तस्य सर्वस्य या शक्तिः सा यदा त्वं तदा कथम्।" स्तव्येत्यर्थः। इति तट्टीकायां नागोजिभट्टः। निष्फलम्। यथा-

"अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।

असदित्युच्यते पार्थ नव तत्प्रेत्य नो इह।।". इति श्रीमद्भागवद्गीयातां (17 अध्याये 28 श्लोक)। निन्दित-। यथा - "असत्कुलप्रसूता या कान्तं विज्ञातुमक्षमा।" इति ब्रह्मवैवर्ते प्रकृतिखण्डम्। अनित्यम्।। यथा "अज्ञानं तु सदसद्भ्यामनिर्वचनीयम्" इत्यादि वेदान्तसारः।

7. गुरुः

गिरति ज्ञानम्। मृणात्युपदिशति धर्मः, मृ गिरणे। गीर्यते स्तूयते वा। (1) बृहस्पतितौ देवाचार्ये इत्यमरः।

निषेकादिनि कर्माणि यः करोति यथाविधिः।

सम्भाव्यति चान्नेन स विप्रो गुरुरुच्यते।।" इति मनः। "आचार्यश्च पिता ज्येष्ठो भ्राता चैव महीपतिः।

मातुलः श्वशुरस्त्राता मातामहपितमहौ।।

वर्णज्येष्ठः पितृव्य पुंस्येते गुरवो मताः।" इत्यागमनासरे।

"गुकारः सिद्धितः प्रोक्तो रेफपापस्य दातः।

उकारः शम्भुरित्युक्तस्त्रितयात्मा गुरुः स्मृतः।।

गुकारो ज्ञानसम्पत्यै रेफत्तत्वप्रकाशकः।
उकारात् शिवतादात्म्यं दद्यादिति गुरुः स्मृतः।।" इति । उपनिषत्सु च "गुकारोस्त्वन्धकारः स्यारुकारस्तन्निवर्तकः।
अन्धकारानिवर्तितत्वाद्गुरुलित्यभिधीयते।।" इति।

8. वामदेवः

वाम एव देवः वामदेव। शिव इत्यमरः। यथा महाभारते "वामदेवश्च वामश्य प्राग्दक्षिणश्च वामनः।" इति। ऋग्वेदे। यथा पञ्चदश्याम्-
"आगामिप्रतिबन्धश्च वामदेवे समीरिता।
एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः।।"

9. वैकुण्ठः

विकुण्ठायाः अपत्यम्। विगता कुण्ठा यस्माद्वा। कृष्णः, जनार्दनः, विष्णुः
चाक्षुषस्यान्तरे देवो वैकुण्ठः पुरुषोत्तमः।
विकुण्ठायामसौ जज्ञे दैवतैः सहः।।" इति विष्णुपुराणम्।
"पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सरसोत्तमैः।
तयोः स्वकलया यज्ञे वैकुण्ठो भगवान् स्वयम्।।" इति भागवते (8/5/4/22)

10. अजः

(1) जायते नोत्पद्यते ....
"न हि जातो न जयेऽहं जनिष्ये ददावन।
क्षेत्रज्ञः सर्वभूतानां तस्मादहं स्मृतः।।" इति भारते। "यो मामजमनादिं च वेत्ति लोकमहेश्वरम्" इति भगवद्गीतायाम्। (2) ब्रह्मा। विष्णुः। शिवः। कामदेवं। सूर्यवंशीयराजविशेषः। मेघः इति ज्योतिषम्। मक्षिकधातुः इति हेमचन्द्रः। जन्मरहिते वाच्यलिङ्गः।

11. दक्षः

दक्ष-कर्तरि। (1) ताम्रचूडे दक्षसंहिताकर्तरि। (2) मुनिभेदे (3) शिववृषभे (4) वृक्षभेदे (5) अग्नौ चेति विश्वः। (6) महेश्वरे इति शब्दरत्नावलिः। ब्रह्मणो

दक्षिणाङ्गुष्ठजाते। (7) प्रजापतिभेदे (8) चतुरे।

"दक्षस्त्वजायताङ्गुष्ठात् दक्षिणाद्भगवान् ऋषिः।

ब्रह्मणः पृथिवीपाल शान्तात्मा सुमहातपाः।।" इति। विष्णौ। बले निघण्टुः। स दक्षाणां दक्षपतिर्बभूव (ऋ.1/95/6)। दक्षाणां बालानां मध्ये यदतिशयं बलं तस्याधिपतिः। "भागवते।" सर्वैर्दक्षैः वीर्यैः सामर्थ्यै सह, दक्षशब्दोऽत्र वीर्यार्थः। दक्षपिता दक्षं वीरह्यम् पातीति पालयिता" इति वेददीपिका।

12. प्रजापतिः

प्रजानां पतिः। ब्रह्मा इत्यमरः (1/1/17)। यथा महाभारते-

ब्रह्मासुरगुरुःत्थाणुर्मनुः कः परमेष्ठ्यथ।।" इति। दक्षदिः यथा-

"पुनर्माहेश्वरं भागं ध्रुवं दक्षप्रजापतिः।

प्रायो नकल्पयामास प्रोच्यमानः सुरैरपि।।" इति वरले। चिकित्सास्थाने तृतीये ध्याये। महीपाल इति मेदिनी। इन्द्रः। यथा महाभारते-

"अयमेव विधाता हि तथैवेन्द्रः प्रजापतिः। :।" (3/195/161)। पिता। यथा -

"जनको जन्मदानाच्च रक्षणाच्च पिता नृणाम्।

ततो विरतीर्णकरणात् कलया च प्रजापतिः।।" इति ब्रह्म वैवर्ते गणपतिखण्डे 44 अध्यायः। स्वनामख्यातकीटविशेषश्च।

13. कलेबरम्

कले शुक्रे वरं श्रेष्ठम्। देहे।

"शरीरे जर्जरीभूते व्याधिग्रस्ते कलबरे।

औषधं जाह्नवीतोयं वैद्यो नारायणःस्वयम्।।" इति।

14. परोक्षम्

अक्ष्णोः परम्। अप्रत्यक्षम्। असाक्षात्। यथा चाणक्यशतके-

"परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।

वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्।।" इति। परोक्षं परोक्षत्वं विद्यतेऽस्य इत्यर्थः। तद्विशिष्टे श्रुत्याप्तजन्यादिज्ञानविशेषः यथा भागवते (6/23/1)-"सनोः सभानरश्चक्षुः परोक्षश्च सुतास्त्रयः" इति।

15. भगवान्

भगः अस्यास्तीति भगवान् । भगः-

"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।

शान्तवैराग्ययोश्चैव षण्णां भग उदीरणा।।" इत्युक्तलक्षणषडैश्वर्यमस्यास्तीति। पूज्यः। बुद्धः, श्रीकृष्णः

"भगवानपि ताः रात्रीः शरदोत्फल्लमल्लिकाः।

वीक्ष्य रन्तुं मानश्चक्रे योगमायामुपाश्रितः।।" इति भागवते। शिवः, निवेदनः, सुगन्धारो महाधनुः।

"गन्धपाली च भगवान् उत्थानः सर्वकर्मणाम्" - इति महाभारते (23/17/127)।

16. विवेकः

परम्परया वृत्या वस्तुस्वरूपनिश्चयः 'प्रकृतिपुरुषयोर्विभागेन ज्ञानमित्यन्ये' इति भरतः। तत्पर्यायः पृथगात्मता इत्यमरः। विवेचनमिति शब्दरत्नावलिः। पृथग्भाव इति धरणिः। "विवेको वस्तुनो भेदः प्रकृते पुरुषस्य वा" इति जडाधरः। यथा - "नित्यनित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोन्यदखिलमनित्यमिति विवेचनम्" इति वेदान्तसारः। "कर्मणा विवेकार्थम् धर्माधर्मो व्यवेचयत्" इति मनुस्मृतिः। जलद्रोणौ। विचार इति मेदिनी। यथा मनुस्मृतौ-

"तस्य कर्मविपेकार्थम् शेषाणामनुपूर्वशः" इति।

17. श्वशुरः

शु आशु अश्नुते। पत्युः पितरि। भार्यायाः पितरि वेत्यमरः।

18. कैलासः

के जले लासो लसनं दीप्तिस्यास्तीति कैलासः। स्फटिकस्यैव शुभ्रः कैलीनां समूहः। कैलं तेनास्यतेऽत्र आस आधारे धाम् वा। शिवकुबेरयोः स्थाने पर्वतभेदे।

इत्युक्तम्। तत्स्वरूपं च हरिवंशकथायां 217 तमेध्याये वर्णितम्। तद्यथा-

"मन्दरश्चोग्रशिखर स्फटिकैर्मणिभिश्चित-।

वज्रगभैर्मिरालम्बैः स्वर्गोपम इवाबभौ।।

सहशृंगैश्च कैलासः शिलाधातर्विभूषितः।

तोरणश्चैव निबिडैः प्रांशुभिश्चैव पादपैः।।

मधुरैवार्द्यगीतैश्च नृत्यैश्चाभिनयोद्भतैः।

शृगारेः सुप्रवाहैश्च कैलासो मदनायते।।" इति। तस्य विष्णुनाभिपद्मस्य गर्भाङ्कुररुपत्वंमुक्तम्। यथा-

"ये तु गर्भाङ्कुराः सारात्तान् दिव्यान् पर्वतान् विदुः" इति हरिवंशकथायामुक्तम्।

19. दक्षिणामूर्ति

दक्षिणा अनुकूला मूर्तिर्यस्यास्तीति। शिवमूर्तिभेदे। तद्ध्यानादिकं यथा-

"प्रोद्यच्छाखमहावटद्रुमतले योगासनस्थं प्रभुम्

प्रत्यक्तत्वमुमुत्सुभिः प्रतिदिनं प्रोद्वीक्ष्यमाणाननम्।

मुद्रां तर्कमयीं दधन्नमलं कर्पूरगौरं शिवं

हृद्यन्तःकलये स्फुरन्नहर्निशं श्रीदक्षिणामूर्तिम्।।"

"नित्यशो दक्षिणामूर्तिध्यायेत् ब्राह्मणसत्तम-।।" इति च।

20. स्वशक्तिः

स्वस्य शक्तिः स्वशक्तिः। शक्यते जेतुमनया इति शक्तिः। अस्त्र भेदः। कासूः, सर्वलनामास्त्रम्, कायजननसामर्थ्यम्।

"या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता।" इति। सामर्थ्यमात्रम्, द्रविणं, तरः, सह, बलं, शौर्यम्, स्थामः, शुष्मं, पराक्रमः, प्राणः, शुष्म, ऊर्जः, गौरी, लक्ष्मीः।

21. प्लामन्तोल्

केरलेषु पालवकाट्मण्डले वर्तते पुलामन्तोल् इति नाम्ना विख्यात ग्रामः।

22. नाम

नाम्यते इति। कोपे। उपनमे। प्राकाश्ये। सम्भावनायाम्। कुत्सने क्त्येमरः। तत्र कोपे" ममापि नाम दशाननस्य परैरभिभवः। उपगमः सासूये ङ्गीकारः" एवं नामास्तु। प्रकाश्ये "हिमालयो नाम नगाधिराज" इति। हिमालयः प्राकाश्येन अतिप्रसिद्ध इत्यर्थः। सम्भावनायाम् "इह नाम सीता भविष्यति" इति। कुत्सने "को नामां

सवितुरूदये स्वोपमेयं विधत्ते।" इति। विस्मये। स्मरणे। विकल्पे चेति मेदिनी। विस्मये "अन्धो नाम गिरमारोहति" इति।

पंचमाध्यायस्य सारः

पंचमे अध्याये पार्वतीशंकारयोरीश्वरमायारूपेण वर्णनं दृश्यते। अत्र पार्वतीसम्पर्केण महादेवस्य वास्तविकं सत्स्वरूपं वर्णितमस्ति। स्त्रीलिंगविशिष्टमाधवशब्दः मायारूपार्थबोधक। पुल्लिंगविशिष्टमाधवशब्दः सद्गुरुरूपार्थबोधकः। अत्र पार्वत्यावर्णनं सतीरूपेण वर्तते। पार्वती पूर्वस्मिन् जन्मानि सतीति नाम्ना प्रसिद्धा आसीत्। पुनः हिमालयस्य खण्डे पार्वतीरूपेण जन्म लेभे। सा पार्वती दक्षिणामूर्तिरूपेण जन्म लब्ध्वा वेदं लक्षितवती महादेवास्यात्यन्तं प्रियतमा च संजाता। पार्वतीविशिष्टस्य महादेवस्याव्यक्तं स्वरूपं जटिलं तथा व्यक्तं तत् वास्तविकं शक्तिमत् सद्रूपं च वर्वतते। सद्रूपस्यैव प्रकाशो भवति। असद्रूपस्यावलोकनं कर्तुं शक्यते। एवं चास्मिन्नध्याये पार्वतीशंकरयोः सद्रूपं तद्भिन्नानां नैकेषां प्राणिनांमसद्रूपं च पर्णयित्वा दम्पत्योः सद्रूपस्यात्र समर्थनं कृतं ग्रन्थकारेण।

षष्ठोऽध्यायः

अज्ञानाधिकारे जीवप्रबोधकथनम्

नारायणं जडाधरमात्मदं पितृसंज्ञितम्।
कर्मज्ञानप्रदातारं तं वन्दे ध्यानगोचरम्।। 1
यत्प्रसादात्तुरीयोऽस्मि सर्वज्ञो यदनुग्रहात्।
तस्मै पित्रे नमस्तुभ्यमसतां च प्रियार्थिने।। 2
नामाश्रयं तु पितृतः प्राप्तो नाम पितामहात्।
प्रपितामहतः प्राप्तं साक्षित्वं त्वात्मतात्मना।। 3
अव्यक्तं पितृतः प्राप्तं अदृष्टं च पितामहात्।
तत्परश्च विराट्भूतः सोऽहमस्यात्मभावतः।। 4
विशेषेण प्रकाशत्वात् विराट्भावः प्रकाशितः।
व्यक्ते विराडिति प्रोक्तस्तस्मात् सोऽहं विराट् स्मृतः।। 5
अदृष्टं यो विजानाति अतर्क्यमनिरूपितम्।
अनर्थम् वाथवाप्यर्थं वैद्यत्वात्सोऽहमेव च।। 6
चित्ते सर्वम् स्फुरत्येव बाह्ये किमपि नो भवेत्।
ध्याने मनोरथे स्वप्ने सोप्यव्यक्तोऽहमेव च।। 7
यस्यांन्तः स्फुरति सर्वम् तं सर्वज्ञं प्रशंसति।
सन्देहो यस्य न भवेत्स वैद्योऽहं भवामि च।। 8
अत्मनात्मनि चात्मानमात्मा पश्यति नान्यदृक्।
स स्वरवश्च स्वदृक् द्रष्टा निर्विकारो निराश्रयः।। 9
नरलोके भयातीतो वेदवेद्यात्परोऽस्म्यहम्।
सर्वम् जानाम्यहं स्वस्थः सोऽपि जानाति मां नहि।। 10
अमर्त्यानां निवासं तु स्वर्ग इत्यभिधीयते।
मृत किं नु लभेत्स्वर्गम् मृतिरत्यन्तशून्यता।। 11

भूतं भव्यं सुखं दुःखं लयं चोदयमेव च।
अभावश्चैव भावश्च ममाष्टाङ्गमुदाहृतम्।। 12
वर्तमानोऽनुभूतिश्च पोषणं चित्तनिर्वृतिः।
ममैव हृदयं विद्याद्‌द्दयं रूपमध्यगम्।। 13
भावाभावोभयोर्योगात् भवो मध्ये प्रकाशते।
तदेव जीवं जानीयात् कार्यकारणमध्यगम्।। 14
जननं मरणं चाहमक्षरक्षररूपधृक् ।
मध्यं तु पोषको जीवो द्रष्टाद्रष्टभिधात्मकः।। 15
ममैव हृदयं मौढ्या परमित्यभिधीयते।
मिथ्यांविद्यां समालम्ब्य मुह्यते ह्यात्मकञ्चुकं।। 16
तेजस्त्वं तिमिरत्वं च सुखं दुःखं जनिर्मृतिः।
भूतं भव्यं च मद्रूपं हृदयं मध्यमेतयोः।। 17
मध्यं तु जीवो जानीयात् सन्तानः सैव मे प्रियः।
सायं प्रातर्निवृत्तिश्च जीवत्वं वर्तमानता।। 18
सन्ध्यानिष्ठा निवृत्तिश्च दया बुद्धेः प्रवर्तनम्।
जीवस्यैतत् चतुष्पादं येन जीवः स्थिरो भवेत्।। 19
1*गुणगुणिनोर्भिन्नत्वात् निष्फलतामेति शून्यभावत्वम्।
आत्मा हृदयाद्भिन्नो शिवतामुन्मुच्य शिष्यते शववत्।। 20
अदृष्टं तु गुणी विद्यात् यद्व्यक्तं गुणमुच्यते।
आत्मात्मीयतयान्योन्यमलेनादेकतां गतम्।। 21
द्विजातीनां तु सद्भावं कर्मयोगात् भविष्यति।
अन्यथा न प्रसिद्धिः स्यादप्रसिद्धिश्च शून्यता।। 22
असतामपि सद्योगात् प्रसिद्धिरिह जायते।
तस्मादहं तु सन्मार्गे वर्तयाम्यात्मसिद्धये।। 23
अद्वैतवादि बौद्धः स्यात् तेषां मार्गो यशस्करः।
ते जीवभावनिर्मुक्ताः प्राणिधर्मपरायणाः।। 24

*छन्दोभङ्गः दृस्यते

आहारादि चतुर्थोऽर्थः प्राणिजन्म तु केवलम्।
नित्यास्तु पुरुषार्थास्तेषां कर्माणि च नो भवेत्।। 25
असतां वेदबाह्यत्वात् न श्राव्यं वैदिकं तु वै।
श्रद्धावांश्चेत्प्रदातव्यं भक्तियोगं न कर्मणः।। 26
भक्त्या जीवावलोकेन द्विजत्वं प्राप्यते चिरात्।
ततः कर्मविशुद्धः सन् सत्यतामुपयास्यति।। 27
कर्मणा प्राप्तसद्भावमात्मज्ञानमिति स्मृतम्।
कर्मभिन्नं तुं यज्ज्ञानं ब्रह्मणोऽपि न सम्भवेत्।। 28
जन्मना जायते ज्ञानं आत्मज्ञानं तु केवलम्।
पशुपक्षिमृगादीनां स्वरक्षापरिपालने।। 29
आहारादिप्रवृत्तित्वादायुषः कालविप्लवम्।
धर्माद्यास्तत्र जायन्ते नैव नित्यात्मरक्षणे।। 30
अयोगाज्जीवनिर्याणं कायादुन्मुच्य वर्तते।
आत्मज्ञानेऽपि सत्ये च स्वात्मानं नावगम्यते।। 31
बोध्यं बोधेन निर्मुक्तं कदाचिन्नानुभूयते।
बोधेन सहितं बोध्यं नित्यबोधाय सम्भवेत्।। 32
अपूर्वम् बोधमित्युक्तं जन्मानन्तरसम्भवम्।।
पूर्वजन्मोद्भवं ज्ञानमज्ञानं केवलत्वतः।। 33
पौरुषेण प्रयत्नेन पूर्वज्ञानं प्रकाशयेत्।
कर्मणा शोधयेच्चित्तं विद्यया शोधयेत्तनुः।। 34
विद्यया विशदीकृत्य क्षेत्रं जीवेन शोधयेत्।
कर्मणा विशदीकृत्य तदा क्षेत्रेण जीवनम्।। 35
विद्यया शुद्धजीवस्तु स्वक्षेत्रं साधु रक्षयेत्।
स्वावलोकसमर्थत्वात् नानाकार्यम् करिष्यति।। 36
स्वावलोकसुखावाप्त्या लोकालोकावलोकनात्।
नानालोकं स्थिरीकृत्य स्वस्थतामधिगच्छति।। 37

एतत्स्वर्गम् स्थिरतरं सुखानां तु सुखात्मकम्।
एतत्तेजस्विनां तेजस्तत्वात्तत्वमिदं स्मृतम्।। 38
अमर्त्योमृत्युसंहारी स जीवोऽमृतमुच्यते।
अमृताखादनात्स्वर्गं स्वलोकं प्रतिपद्यते।। 39
स्वर्गम् जीवप्रियं देहं शाश्वतं शिवसंज्ञितम्।
तदमर्त्यम् विजानीयाच्छङ्करं लोकशङ्करम्।। 40
जीवेन सहितं तच्चेत् मृत्युपाशनियान्त्रितम्।
भयङ्करं लोकभयं शवं नरकसंज्ञितम्।। 41
मृतानां स्वर्गतिर्नास्ति अस्ति चेत्तत्फलश्रुतिः।
जीवसुखविधानार्थं सर्वोऽप्येव फलं वदेत्।। 42
शिवोऽपि शवतां याति वेदमार्गस्य निन्दनात्।
शवोऽदि शिवतां याति सन्मार्गस्यावलोकनात्।। 43
सन्मार्गम् सर्वभूतेषु नित्यसत्यावलोकनम्।
नित्यसत्यात्मके स्वस्थे सर्वभूतावलोकनम्।। 44
वर्तमानं च भूतं च भूतेष्वात्मनि भावयन्।
यो नित्यं चिन्त्यते सोऽपि सन्मार्गम् प्रतिपद्यते।। 45
एवं करोति यो नित्यं वैद्यस्तं प्रतिपेदिरे।
स्वान् परानपि चोद्धर्तुम् शक्तिस्तस्य भविष्यति।। 46
2*आकाशवन्मे प्रपितामहोस्ति पितामहो वायुवदेव भाति।
पिताग्निवद्भाति जडोऽहमस्मि पृथ्वीवदात्मा स्थिरतां प्रयाति।। 47
पञ्चभूतात्मकैरेभिः पञ्चीकृतमहात्मनाम्
पञ्चत्वं नैव भवति पञ्चाननिरीक्षणम्।। 48
प्रपितामहतो दृष्टम् अव्यक्तत्वं पितामहात्।
व्यक्तत्वं पितृतः प्राप्तं स्वतो जीवत्वमेयिवान्।। 49
स्थिरत्वमात्मना प्राप्तं मैवं पञ्चाक्षरोऽस्म्यहम्।
एवं पञ्चीकृतात्मत्वात् पञ्चत्वं मां न बाधते। 50

2* छन्दोभङ्गः

आकाशो रूपतो दृष्टं अव्यक्तो वायुरुच्यते।
तेजः प्रकाशो जीवस्तु जडो भूमिःस्थिरा स्मृता।। 51
असह्यतेजसा दृष्टः सूर्यो व्यक्ताम्बिका स्मृता।
विष्णुः सत्यं गणेशस्तु विराडात्मा महेश्वरः।। 52
अदृष्टरूपा देवाश्च मर्त्या वै दृष्टिगोचराः।
पितरः पितृतः प्राप्ताः भूरूपोऽतिथिर्हरः।। 53
शम्भुर्भिक्षाटनव्याजात् लोकानालोकितुं स्वयम्।
अतर्क्यरूपी चरति नानारूपधरोऽव्ययः।। 54
पञ्चब्रह्मात्मकमिदं चतुर्वेदस्तु त्र्यम्बकः।
द्रष्टृदृश्यतयोर्द्वैतः पञ्चवक्त्रस्तु केवलः।। 55
आत्मना सह पञ्चात्मा पञ्चब्रह्मस्वरूपधृक्।
पञ्चाक्षरात्मा भगवान् पञ्चत्वाच्च विमोचितः।। 56
यस्मात्पञ्चत्वतां यान्ति सदेवासुरमानवाः।
पञ्चपञ्चात्मकः साक्षादहमित्यक्षरात्मकः।। 57
सर्वेषामन्तरे बाह्ये स्पष्टमेव चरन्नपि।
अस्पष्टतामुपगतस्तदैश्वर्यम् महात्मनः।। 58
व्यकताव्यक्त रूपेण विद्याविद्यां प्रकाशयन्।
अन्तर्बहिश्च भूतानामात्मतत्वं प्रदास्यति।। 59
भगवान् सर्वभूतेषु स्वत्वं कथयन् सदा।
जाग्रत्स्वप्नसुषुप्त्यादौ प्रबोधयति बोधितः।। 60
एवं प्रबोधयन् बोधैरहं स्थावरजङ्गमान्।
तथापि नैव बोध्यन्ते जीवा जडधियोऽधिकाः।। 61
तस्माज्जीवात्मको भूत्वा जीवधर्ममनुष्ठितः।
जीवानुसारमार्गेण जीवान् प्रबोधयाम्यहम्।। 62

इति

अज्ञनाधिकारे जीवप्रबोधकथनं नाम

षष्ठोऽध्यायः

षष्ठाध्यायस्य टिप्पणी

1. साक्षित्वम्

साक्षिणः धर्मः साक्षित्वम्। साक्षी अस्यास्तीति साक्षि। साक्षाद्द्रष्टरि। परमेश्वरे, "साक्षी चेताः केवलो निर्गुणश्च" इति श्रुतिः। अयमेव साक्षिचैतन्येन वेदान्तपरिभाषादौ स्वीकृतः। विष्णवादेः सर्वसाक्षित्वं त्विन्द्रियादिव्यवधानाभावमात्रेण गौणम्।

"जाग्रत् स्वप्नसुषुप्तं गुणतो बुद्धिवृत्तयः।

तासां विलक्षणो जीवः साक्षित्वेन व्यवस्थित-।।" इति बुद्धिवृत्तीनां साक्षित्वेन तद्विलक्षणो जाग्रदाद्यवस्थारहितो बोध्यः। समग्रलयेषु बुद्धेर्वृत्तिसामान्याभावो मरणादाविव भवति। सा बुद्धिश्च समग्रसुषुप्तिक्तयभावरूपोऽपि पुरुषस्तत्साक्षी न भवति। पुरुषस्य वृत्तिमांत्रसाक्षित्वात्। सुषुप्त्यादिसाक्षित्वं तु तादृशबुद्धिवृत्तानां प्रकाशनम्।

2. अव्यक्तम्

। विष्णौ। कामे। शिवे। सांख्यमते सर्वकारणे। प्रधाने, रूपाद्यहीनतया चक्षुराद्यगोचरत्वात्तथात्वम्। वेदान्तमते नामरूपाभ्यामव्याकृते।

प्रकृते तु अव्यक्तपदेन शरीरं विवक्षितम्। स्थूलत्वात्स्पष्टतरमिदं शरीरं व्यक्तशब्दार्हम्। इति चेन्न "सूक्ष्मन्त्वहि" इति सूत्रानुसारेण कारणात्मना शरीरं सूक्ष्मस्याव्यक्तशब्दार्हत्वात्। यद्यपि स्थूलमिदं शरीरं नाव्यक्तशब्दमर्हति तथापि तस्य त्वारम्भकं भूतसूक्ष्ममव्यक्तशब्दमर्हति। प्रकृतिशब्दश्च विकारे दृष्टः। यथा "गोभीः श्रीणितमत्सरम्" इति । तथा च श्रुतिः "तद्वेदं तर्ह्यव्याहृतपरित्यक्तव्याकृतनामरूपं बीजशक्त्यवस्थानमव्यक्तशब्दयोग्यन्दर्शयति।" परमब्रह्मपरत्वे, "ये चाप्यक्षरमव्यक्तं ते योगिसत्तमाः" इति गीता।

3. अदृष्टम्

पुण्यरूपे। भग्ये। वेदान्तिभिस्तु कर्मणः सूक्ष्मावस्थापन्नसंस्कारविशेष एव अदृष्टस्थानीयतयाङ्गीक्रियते। तच्चादृष्टमात्मधर्म इति नैयायिका अभ्युपगच्छन्ति। "अनुष्ठानादूर्ध्वमुत्पाद्यमानस्य धर्मस्य पूर्वमविद्यमानत्वात् न प्रत्यक्षयोग्यताऽस्ति उत्तरकालेऽपि रूपादिराहित्याद् न इन्द्रियैरवगम्यता। अत एवादृष्टमिति सर्वेरभिधीयते।" इति ऋ भाष्यम्।

4. विराट्

स्थूलशरीरं समष्टि-व्यष्टिभेदेन द्विविधम्। पञ्चीकृतं पञ्चमहाभूतं तत्कार्यम् ब्रह्माण्डं तदन्तर्वर्ति कार्यम् सर्वम् समष्टिरित्युच्यते। अथवा व्यक्तिषु गोत्वदिवत् सर्वव्यष्टिष्वनुस्यूतं पञ्चीकृतकार्यम् ब्रह्माण्डात्मकं व्यापकं समष्टिः। वनवत्सकलस्थूलसमदुदायो वा समष्टिरित्युच्यते। एतदुपहितं चैतन्यं विराट् वैश्वानर इति चोच्यते। विविधं राजमानत्वात्सर्वनराभिगामित्वाच्च।

5. निर्विकारः

निर्गतः विकारः यस्य सः निर्विकारः। स्वरूपस्य विनाशे अविनाशे वा द्रव्यान्तरारम्भकत्वाम् विकारत्वम्। यथा दुग्धादेर्दध्यारम्भकत्वम् बीजादेर्वृक्षाद्या रम्भकत्वं च। सुवर्णादेरपि लोहाघाताजन्यावयवसंयोगनाशादवयविनो नाशे सति कुण्डलारम्भः।कपालादेश्च स्वरूपनाशेन घटाद्यारम्भकत्वम्। सांख्येश्च पञ्चविंशति तत्वमध्ये षोडशपदार्थः विकारशब्देनो क्ताः। तदुक्तम् - "षोडशकस्तु विकारः" इति। अस्यार्थः षोडशसंख्यावच्छिन्नो गणः षोटशको विकार एवेति (सर्वदर्शन संग्रहः पृ.318)। यदात्मकं द्रव्यं मृद्वा सुवर्णम् वा तस्यात्मनो न्वये पूर्वा व्यूहो निवर्तते। व्यूहान्तरं चोपजायते तं विकारमाचक्षते। अन्ये तु स्वरूपपरित्यागेन रूपान्तर प्राप्तिः इत्याहुः। यास्कोक्ताः भावविकाराः षट्। जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, निवश्यति इति ष्ड्भावविकाराः भवन्तीति वार्ष्यायणिः।

6. निराश्रयः

निर्गतः आशयः यस्य सः निराश्रयः। आश्रयत्वं नामाधिकरणत्वम्। अधिकरणत्वं च - "अधिकरणमिति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः। यथा घटवद्भूतलमित्यादौ भूतले घटाधिकरणता। यथार्थविशिष्वधीविशेष्यत्वमित्यपरोवक्ति। विषयताविशेष इति केचिद्वदन्ति। कर्तुद्वारा कर्मद्वारा वा क्रियाश्रयत्वमिति शाब्दिकाः वदन्ति।

7. स्वर्गः

(1) सुखविशेषः। यथा यागात्स्वर्गो भवति इत्यादौ स्वर्गशब्दस्यार्थः। यथा वा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते इत्यादौ स्वर्शब्दस्यार्थः। इदं न इच्छामात्रसाधनसाध्यं सुखमिति वदन्ति। अत्राम्नायते -

"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।

अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्।।" इति। अत्र दु-खसम्भिन्नत्वं च स्वावच्छेदक्शरीरानवच्छिन्नत्वम्। तेन दुःखासमानकालीने सुखे नातिव्यप्तिः। (2) अधर्मानारब्धदेहावच्छेद्यसुखत्वम्। पौराणिकास्तु देवानामावासस्थानं लोकविशेषः। तदुक्तं महाभारते -

"उपरिष्टाच्च स्वर्लोको योयं स्वरिति संज्ञितः।

उर्ध्वगः सत्पथः शश्वद्देवयानचरो मुनेः।।

अयं च लोकः भूर्लोकः, स्वर्लोकः महर्लोकः जनलोकः तपोलोकः सत्यलोकश्च इत्येतेषु भूरादिषु सप्तलु लोकेषु उर्ध्वस्थस्तृतीय इत्याहूः।

8. शून्यता

शून्यस्य भावः शून्यता। (1) शून्यं नाम अत्यन्ताभावः। यथा ज्ञानशून्यः पुरुषः इत्यादौ। (2) निर्जनस्थानम् (3) आकाशः (4) बिन्दुमात्रम् (5) असंपूर्णम् (6) ऊनम् (7) तुच्छं च।

9. अष्टाङ्गम्

(1) अष्टावङ्गानि यस्य।

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोष्टावङ्गानि इति पातञ्जलीसूत्रम्।

"यमो नियमश्चासनं च प्राणायामस्ततः परम्।

प्रत्याहारो धारणा च ध्यानं सार्द्धम् समाधिनः।।

अष्टाङ्गान्याहरेतानि योगिनं योग्रसिद्धये।" इति पुराणेषु।

(3) अष्टद्रव्यनामके सूर्याधे (4) शल्याद्यष्टाङ्गे आयुर्वेदे। यथा -

"तद्यथा शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगवतन्तं रसायनतन्त्रं वाजीकरएतन्त्रमिति।

10. भवः

भवत्यस्मात्। (1) महादेवे तस्य तन्नामानि शक्तिः (शतपथब्राह्मणम् 6/1/15) "तमब्रविद्भिभो सति"। तद्यदस्य पर्जन्यो वैभवः पर्जन्यादिदं सर्वम् भवति

सोऽब्रवीज्यायान् वाऽतोऽस्मि धेह्येवं मे नामेति" जलस्य पर्जन्यहेतुकत्वात् तस्य जलमूर्तित्वम्। अत एवास्यांष्टमूर्तिमध्ये जलरूपेण भवनाम्ना स्यार्धा। (2) जन्मनि (3) उत्पत्तौ (4) प्राप्तौ (5) संसारे (6) फले।

11. जीवः

क्षेत्रज्ञादिपदवेदनीयः जीवः। जीवलक्षणं च इच्छाद्वेषप्रयत्नसुखदुःखज्ञानाज्ञानान्यात्मनो लिङ्गम्। बादरायणाचार्यस्तु -

"एवं पञ्चविधं लिङ्गं त्रिवृत् षोडशविस्तृतम्।

एष चेतनया युक्तो जीव इत्यभिधीयते।।" इत्याहुः। मायावदिमते त्रयो हि जीवस्योपाधयः। तत्र सुषुप्तौ बुद्ध्यादिसंस्कारवासितमज्ञानमात्रं स्वप्ने जाग्रद्वासनामयं लिङ्गशरीरं जाग्रदवस्थाथां सूक्ष्मशरीरसंसृष्टस्थूलशरीरंमुपाधिरिति तत्तदुपाध्युपलक्षणतजाग्रद्स्वप्नसुषुप्तयोऽप्युपधिशब्देन व्यवह्रियन्ते। तथा च तेषां मायावादिनां मते अज्ञानस्य व्यष्टिशक्तिभेदो जीवः स च परमात्मनः अभिनश्चेति बोध्यम्। अनेकान्तिवादिनस्तु जीवास्तिकायसंज्ञया परिभषितः पदार्थविशेष इत्याहुः। न्यायवैशेषिकनये जजुवेन्द्रियार्थादिव्यतिरिक्तः। स च जीवः सुक्षदुःखवैचित्र्यात् नानाभूत एव। वैशेषिकसिद्धान्ते जीवात्मनि चतुर्दशगुणाः वर्तन्ते। ते च संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, बुद्धिः, सुम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, भावनाख्यसंस्कारश्चेति।

12. मिथ्या

यत्र मिथ्यात्वमस्ति सा मिथ्या। मिथ्यात्वं च कालसम्बन्धित्वम्। यथा शशविषाणकूर्मरोमवन्ध्यापुत्रादीनां मिथ्यात्वम्। (2) तुच्छत्वमिति माध्वाः प्राहुः। (3) निरूपाख्यत्वमिति बोद्धाः आहुः। (4) बाधज्ञाननिर्वर्तित्वम्। यथा "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इत्यादौ इति मायावादिवेदान्तिनः शंकरभारतीप्रभृतयः मन्यन्ते।

13. निवृत्तिः

जिहासाप्रयुक्तस्य दुःखसाष्टानपरिवर्जनम्। द्वेषजन्यो गुणः। द्वेषजनितः प्रयत्नविशेषः। लक्षणं च निवृत्तित्वमेव। तच्च द्वेषजन्यतावच्छेदकतया सिद्धो जातिविश

विशेषः। अत्रेदं बोद्ध्यं। निवृत्तिं प्रति फलगतद्वेषो द्विष्टसाधनताज्ञानं च कारणम्। इत्यन्ययव्यतिरेकाभ्यामवधार्यते। अत्रायं विवेकः। दुःखसाधविषयकनिवृत्तिं प्रति द्विष्टसाधनताज्ञानं कारणम्। दु-खनिवृत्तिं प्रति तु दुःखद्वेष एव कारणम् इति। उत्कटद्वेषजन्यो यत्नविशेषः। द्विष्टसाधनताज्ञानजन्यो यत्न-। यथा परोक्षीकृतश्रीशो विषयेभ्यो निवर्तते इत्योदौ। निवृत्तिश्च प्रवृत्यभाव एवेति नव्याः आहुः। सुषुप्त्यवस्थायांमयमितो निवृत्त इत्यादि व्यवहारेण। (2) सांख्यास्तु संयोगाभाव एव निवृत्ति-। यथा "औत्सुक्यनिवृत्यर्थम् यथा क्रियासु प्रवर्तते लोकः" इत्यादो इत्याहुः। अत्रायं नियमोऽनुसन्धेयः। इच्छाविषयसिद्धौ इष्टप्राप्तौ निवर्तते इति। कलञ्जाधिकरणे मीमांसकास्तु प्रकृत्युपाधिना विनाशं प्राप्तः प्रागभाव एव प्रवृत्तिनिराकरणस्य साध्यमानो निवृत्तिरित्युक्तः" इत्याहुः। (4) अभावः। यथा व्यापकनिवृत्तौ व्याप्यनिवृत्तेरावश्यकत्वात्।

14. गुणः

प्रमायाः असाधारणकारण्। प्रत्यक्षे विशेषविशेष्यसन्निकर्षो गुणः। सत्वं रजः तमश्चैते द्रव्यात्मकाः त्रयो गुणाः इति सांख्याः। ज्ञानानन्दादयोऽपि गुणाः इति वेदान्तिनः। रूपादयश्चतुर्विंशतिगुणाः इति वैशेषिकाः नैयायिकाश्चाहु-। द्रव्याश्रयगुणवान् संयोगविभागेष्वकारणमसदात्मा इति तर्कभाषा। गुणत्वरूपजातिमान् गुणः। न्यायनये गुणाश्चतुर्विंशतिः।

15. द्रष्टा

दृश् - तृच्। दर्शके (2) साक्षात्कारे (3) प्रकाशके च। नान्यतो स्तिद्रष्टा श्रुतिः। "द्रष्टारो व्यवहाराणां साक्षिणं च त एव हि" इति याज्ञवल्क्ये।" दृश्यद्रष्टुसंयोगे हेयहेतुः" इति न्यायसूत्रम्।

"चक्षुर्जन्यमनोवृत्तिर्विद्युक्ता रूपभासिकम्।
दृष्टिरित्युच्यते द्रष्टा दृष्टिकर्तेति चोच्यते।।" इति शब्दार्थचिन्तामणिः।

सांख्यमते यथा पुरुषस्य द्रष्टृत्वं तथा सांख्यसूत्रे निरणायि।

16. शिवता

शिवशब्देन शिवत्वयोगिनां मन्त्रमन्त्रेश्वरमहेश्वरमुक्तात्मशिवानां सवाचकानां शिवत्वप्राप्तिसाधनेन दीक्षादिनोपायकलापेन सह पतिपदार्थे संग्रहः। शिवत्वं च पाशजालापोहने नित्यनिरतिशायदृक्क्रियारूपचैतन्यात्मकत्वम्।

17. द्विजः

ब्राह्मणः। "मातर्युदग्रे जायन्ते द्वितीयं मौञ्चिबन्धनात्।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः।।" इति मिताक्षरा (अ.1/39)।

18. पुरुषार्थः

(क) बलवद्द्वेषविषयः तर्कप्रदीपः। (ख) यज्ज्ञातं सत्ववृत्तितयेष्यते सः (न्यायसिद्धान्तमुक्तावनी पृ. 221)। तल्लक्षणं चेतरेच्छानधीनेच्छाविषयत्वम् (मुक्तावली पृ. 221) पुरुषस्य अर्थः प्रयोजनं पुरुषार्थः। "धर्मार्थकाममोक्षाश्च पुरुषार्थः उदाहृतांः" इति अग्निपुराणे। (ग) पुरुषप्रीतये विधीयमानः पुरुषार्थः इति जैमिनी। (घ) यस्मिन् स्वर्गादिसुखविशेषे पश्वादिसुखसाधने च लब्धो प्रीतिः कृतार्थोऽस्मीति वृत्तिस्तत्साधनं पुरुषार्थः (जैमिनीयसूत्रम्, चतुर्थोऽध्यायः)। चार्वाकमते अङ्गनालिङ लिङ्गतादिजन्यं सुखमेव पुरुषार्थः। पुरुषैरर्थ्यते इति व्युत्पत्या निश्शेषदुःखोपशमलक्षित्वं परमानन्दैकारस्यं च पुरुषार्थशब्दस्यार्थः। माध्वमते भक्तिरपि पुरुषार्थः।

19. केवलम्

Alone, More, Sole, Entire, Whole

20. निर्याणम्

निर्याति निर्गच्छति मदो नेनेति। गजपाङ्गदेशः मोक्षः। अध्वनिर्गमः। "निर्याणं" च रथेनाशु सहसा यात्कृतं त्वया" - इति महाभारते। पशुपादबन्धनरज्जुः। "निर्याणहस्तस्य परो दुधुक्षत" इति माघे।

21. चित्तम्

प्रमाणमात्रव्यङ्ग्या विवेकप्रवृत्तिश्चित्तम् (सर्वदर्शनसंग्रहः पृ. 188)। आकाशादिभ्यो मिलितेभ्यः अन्तःकरणमुत्पद्यते। तत्सङ्कल्पविकल्पनिश्चयाभिमानरूपवृत्तिभेदाः चतुर्विधः - मनोबुद्धिरहंकारश्चित्तं चेति। "अनुसन्धानरूपं च चित्तिमित्यभिधीयते।" इति वार्तिकवचनम्।

22. अमृतम्

Immortality, heaven, nectar, leavings of Yajna, food obtained without begging.

23. मृत्युपाशः

मृत्युरूपपाशः। पाशश्चतुर्विधः- मलकर्मगायारोधशक्तिभेदात्। (सर्वदर्शनसंग्रहः पृ. 187)। प्रकृते तु "मृत्युपाशनियन्त्रितः" इति मृतस्यैव सूचनं कृतम्।

"आर्द्रत्वं च घनत्वं च तेजो गौरवचापलम्।

यस्यैतानि न दृश्यन्ते तं विद्यात् मृतसूचकम्।।" (सर्वदर्शनसंग्रहः पृ. 204) इति मृतस्य लक्षणमुक्तम्।

24. पञ्चीकृतात्मा

पञ्चीकृतभूतानि। पञ्चीकरणं तु आकाशादीनां तामसांशानेकैकं द्विधा विभज्य तत्रैकं चतुर्धा विभज्य स्वांशं परित्यज्य इतरांशेषु योजनम्। "तासां त्रिवृतं त्रिवृतं एकैकां करवाणीति" त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणत्वात् पञ्चीकरणं प्रमाणिकमेव।" वैशिष्यस्तु तद्वादस्तद्वाद" इति न्यायेन स्वांशस्य भूयस्त्वादाकाशादिविशेषव्यपदेशोऽपि सम्भवति। एवं च सति आकाशे शब्दोऽभिव्यज्यते, वायो शब्दस्पर्श, तेजसि शब्दस्पर्शरूपाणि, जले शब्दस्पर्शरूपरसाः, पृथिव्यां शब्दस्रप्शरूपरसगन्धः। तथापञ्चीकृतपृथिव्यादिभ्यो ब्रह्माण्डमुत्पन्नम्, तदन्तर्वर्तिलोकाः चतुर्दश। ब्रह्मण्डान्तर्वर्तिवृथिव्याः ओषधसः उत्पन्नाः, ओषधिभ्योऽन्नम्। पितृभ्यां भुक्तान्नपरिणामं रेतः शोणितद्वारा स्थूलशरीरमुत्पन्नम्। तच्चतुर्विधम् - जरायुजामण्डजं स्वेदजंमुद्भिजञ्चेति। मनुष्यादिशरीरं जरायुजं, पक्षिपन्नगादिशरीरमण्डजं, युरकादिशरीरं स्वेदजं, तृणगुल्मादिशरीरमुद्भिजम्।

षष्ठाध्यायस्य सारः

जीवप्रबोधनामकेऽस्मिन्नध्याये भूतं, भव्यं, सुखं, दुःखं, लयम्, उदयः, अभावः, भावः इत्येतेषां निरूपणं दृश्यते। भावा भावयोः द्वयोः संयोगात् मध्ये भावः प्रेकशते। स एव जीवरूपेण ज्ञातव्यः। क्षराक्षरप्रभृतीनि विविधानि रूपाणि जीव एव धारयति। जीवः कदाचित् द्रष्टा भवति कदांचिच्च दृश्यः। स एव हृदयः इत्युच्यते। "पर" शब्देनापि स अभिधीयते। मूर्खाः ध्यानशून्याः मिथ्याविद्यामवलम्ब्य व्यवरहति। तेजस्तिमिररूपो सर्वोऽपि स एव भवति। सुखदुःखजनिप्रभृतीनि तस्यैव रूपाणि

भवन्ति। भूतं भव्यं सर्वमस्यैव परस्य ब्रह्मणः व्यावहारिकं रूपं वर्तते। एतयोर्भूतभव्ययोर्मध्ये सन्तानभूतोऽस्मि जीवः। जीवानां सन्ध्यावन्दनाचाराः शुभे कर्मणि तेषां प्रवृत्तिः, सर्वेषु जीवेषु दया, कर्मणि प्रवृत्तिः इत्येवं प्रकारेण जीवानां सम्पूर्णमपि कर्म चतुर्षु पञ्चसु वितृतं वर्तते। सर्वम् मुक्तं, सर्वम् शून्यं, सर्वम् स्वलक्षणमिति वदतां शून्यवादिनां मतेऽपि सर्वस्य वस्तुमात्रस्य शून्यत्वात् गुणस्य गुणिनश्च शून्यस्वभावात् सर्वम् शून्यमिति सिद्ध्यति। आत्मपदार्थोऽपि हृदयाद्भिन्नः सन् शिवस्य कल्याणकारकमस्य स्वरूपं परित्यज्य यत् शिष्यते तत् शून्यरूपमेव भवति। अत्र यः अदृष्टरूपेणोपलभ्यते स गुणीति कथ्यते। तत्रैव यः व्यक्तरूपेण वर्तते स गुण इथि कथ्यते। यदा आत्मानात्मनोरेकरूपता जायते तदा द्विजादीनां कर्मयोगात् सद्भावो भविष्यति। अन्यथा आत्मनः आत्मीयानां च परागतानां प्रसिद्धिरेव न स्यात्। अप्रसिद्धिः स्वीक्रियते इति चेत् तदा शून्यवादिमते यथा परमात्माजीवात्माप्रभृतयः सर्वोऽपि पदार्थाः शून्यभूताः भवन्ति, तथैवाप्रसिद्धत्वात् शून्यत्वमापद्येत। परन्त्वत्र न तथा। असतामपि पदार्थानां संयोगः सत् पदार्थेन सह जायते तदा असत् पदार्थाः अपि सत्पदार्थरूपेण सिद्धयन्ति। अतः आत्मपदार्थस्य सिद्ध्यर्थम् सन्मार्गे अहं वर्तयामि। अद्वैतवादिनः मायावादिनो बोद्धाः इव भवन्ति। अतः ते अद्वैतवादिनः जीवभावविनिर्मुक्ताः आत्मानं मुक्तमिति मन्यन्ते। धर्मार्थकामाख्याः पुरुषार्थाः तेषां मते न स्वीकृताः न। इदं च मतं वेदबाह्यम्। तस्पादेतेषां वचनं श्रवणयोग्यं न भवति। यः पुरुषः श्रद्धावान् न भवति स भक्तियोगेन द्विजानां कर्मावलोकनेन त्वरितमेव द्विजत्वं प्राप्नोति। द्विजत्वप्राप्त्यनन्तरं तेन कर्मणा विशुद्धः सन् सत्यत्वं प्राप्नोति। कर्मणा सद्भावं प्राप्य तदैवात्मज्ञानं भवतीति शास्त्रेषु स्वीकृतम्। कर्मसहितं यज्ञानं भवति तदेव ज्ञानं समीचीनमिति स्वीक्रियेत। तज्ज्ञानं पशुपक्षिमृगादीनामपि जन्मकालादेव जायते। पशुपक्षिमृगादीनामाहारादिप्रवृत्तित्वाद्वश्यं कालेन समान्तमपि भवति। अत एव तेषां आत्मरक्षणे नित्यरूपेण धर्मादीनां प्रवृत्तिर्न भवति। जीवाः शरीरं परित्यज्य न गच्छन्ति। आत्मज्ञाने सत्यप्यत् स्वात्मनः अवगतिर्न भवति। बोधनिर्मुक्तं बोध्यं कदाचिदपि नानुभूयते। परन्तु बोधसहितं बोध्यं नित्यबोधाय भवति। जन्मग्रहणानन्तरं ज्ञायमानं ज्ञानं अपूर्वबोध इत्युच्यते। जन्मकालात्पूर्वम् यज्ज्ञानं भवति तत्त् अज्ञानं

भवति। तस्याज्ञातस्य प्रकाशनं पौरुषेण प्रयत्नेन विधीयते। अत्र कर्मणा शरीरस्य अन्तः करणस्य वा संशोधनं विधीयते। विद्यया ज्ञानेन शरीरं शोध्यते। विद्यया शरीरं पवित्रीकृत्य तस्य क्षेत्रेण सह जीवनं संजायते। विद्यया जीवः शुद्धः सन् स्वकीयं शरीरं सम्यक्तया रक्षयन् स्वस्यावलोकने समृद्धत्वात् नानाविधानि कार्याणि करिष्यन्ति। स्वावलोकनजन्ये यत्सुखं तादृशसुखप्राप्त्या लौकिकानां अलौकिकानां वा पदार्थनामवलोकनात् जीवः स्वस्थानं प्रतिगच्छति। तदीयं स्वकीयं स्वर्गरूपंमास्थानं स्थिरतरं तेजस्विनां तेजःस्वरूपं जीवः अधिगच्छति। स जीवः मृत्युसंहारित्वादमर्त्य इति अमृत इति चोच्यते। अमृतस्यास्वादनास्वर्ग इत्युच्यते। एतच्च स्वर्गम् सर्वेषां जीवानां प्रियं शाश्वतं शिवसंज्ञितंममर्त्यचेति ज्ञातव्यम्। तच्छरीरं यदा जीवेन विरहितं संजायते, मृत्युपाशेन नियन्त्रितं भवति तदा लोकभयं भयङ्करं नरकसंज्ञितं शवस्वरूपं संजायते। मृतानां स्वर्गम् नास्ति। अस्ति चेत् केवलं फलश्रवणमात्रं वर्तते। जीवानां रक्षणार्थम् वेदोऽपि एतादृशं फलं कथयति। वैद्कस्य मार्गस्य निन्दनेन शिवः शवस्वरूपः। सन्मार्गस्यावलोकनादथवा नित्यसत्यावलोकनात् शवोऽपि शिस्वरूपवान् च भवति। अर्थात् सर्वैः प्राणिभिः सह सत्यरूपेण व्यवहरणं सन्मार्ग उच्यते। वर्तमानं भूतेषु च आत्मस्वरूपं परिचिन्तयति। सोऽपि स्मार्गम् प्राप्नोति। एवं रूपेण वेदवचनानुसारेण यः आचरति सः स्वान् परान् च उद्धर्तुम् शक्नोति। मदीयः प्रपितामहः आकाशवत् पितामहो वायुवत् पिता चाग्निवद्भवति। पृथ्वीजलतेजोवाखाकाशमिति पञ्चमहाभूतैः पञ्चीकृतशरीरं पञ्चानननिरीक्षणादपि पञ्चत्वं नाधिगच्छति। प्रपितामहात्पञ्चीकरणम्। पितामहादव्यक्तत्वम्, पितृसकाशाद्व्यक्तत्वं आत्मनः स्थिरत्वं च मया प्राप्तानि। अहं पञ्चात्मकोऽस्मि परन्तु एतस्यात्मनः पञ्चीकृतत्वात् पञ्चत्वं मां न बाधते। आकराः रूपता अदृष्टः। वायुरव्यक्तः। तेजः असह्यरूपेण द्रष्टुः प्रकाशको भवति जीवस्य। इयं भूमिः स्थिरा नवति। विष्णु-गणेश-विराद् महेश्वरः इत्यादयो अदृष्टाः भवन्ति। त एव देवाः व्यक्तरूपेणापि चरन्ति। महादेवः भिक्षाटनव्याजेन सर्वानपि लोकान् द्रष्टुं स्वयमेव नानारुपधरः सन् अतर्क्यरूपेण चरति। इदं सम्पूर्णमपि जगत् पञ्चब्रह्मात्मकं चतुर्वेदस्य स्वरूपं द्रष्टृ-दृश्यरूपेण वर्तते। आत्मनो सह पञ्चात्मनो ब्रह्मणः ऐक्यमस्ति। पञ्चाक्षरात्मा भगवान् वर्तते। अत एव सर्वेऽपि देवाः असुराः

मानवाः पञ्चत्वतां ऋच्छन्ति। सर्वत्रापि आन्तरिके वाह्ये च स्पष्टरूपेण चरन् स्पष्टं स्वरूपं प्राप्नोति। अतं एव महात्मनः ऐश्वर्यम् वर्तते। अव्यक्तरूपेण व्यक्तरूपेण च विद्यामविद्यो च प्रकाशयन् अन्तर्बहिश्च प्राणिनामात्मतत्वंमन्ते प्रददाति। सर्वज्ञः भगवान् तदेव सर्वेषु प्राणिषु स्वकीयं तत्वं जाग्रत-स्वप्न-सुषुप्त्यदिरूपेण अभिव्यञ्जयति। वारं वारं प्रबोधिताः सन्तोऽपि जीवाः पुनः पुनः अविद्याग्रस्ताः जायन्ते। विद्यया यदा अविद्यया) आवरणस्यापनयनं भवति तदा जीवस्य बोधः संजायते। सैवावस्था जीवब्रह्मणोरैक्यं मित्युच्यते। मोक्षः कैवल्यमपवर्गः - एते सर्वेऽपि अस्या एवावस्थायाः अपराणि नामानि सन्ति।

सप्तमोऽध्यायः

अज्ञानप्रकरणे असत्प्रसङ्गः

ये च पृष्ठप्रधानाः स्युर्गोगजाश्वखरादयः।
अज्ञानिभ्यो नमस्तेभ्यस्तत् पृष्ठेश्वरसंश्रयात्।। 1
लभन्ते गुदमाघ्राय सौख्यमुष्ट्रगवादयः।
तेषां गुदमहं नौमि तद्गुदं कारणं मम।। 2
यत्र यत्र सुखं याति तत्र तत्रास्म्यहं भवम्।
असद्वाप्यथवासच्च सुखं चेत्तदहं स्फुटम्।। 3
असतां च दुराचारं सदाचारं सतामपि।
उभयंत्वहमेवास्मि सुखं तदुभयोरपि।। 4
नास्तिकानामसद्भावंमहमेव न संशयः।
आस्तिकानां च सद्भावं सुखभावप्रबोधनात्।। 5
परदुःखप्रियाणां तु अहं नरकमेव च।
ये च दुःखं समालोक्य परमं हर्षमाययुः।। 6
परोपकारशीलानामहं स्वर्गप्रदायकः।
ये च लोकसुखावाप्त्या परमां निर्वृतिं ययुः।। 7
सिकताब्रह्मपर्यन्तं नित्यसत्यं करोति यः।
सोऽपि लोकं शवाकारं शिवं कुर्वत्यनुग्रहै।। 8
ज्ञानाग्निपुटपाकेन सारकिट्टौ विभज्य च।
सर्वेषां सारमुद्धृत्य जीवयामि जनानहम्।। 9
अज्ञानमूढं मामेवं प्रबोधयति यः पुमान्।
जीवान् जीवयितुं सोऽपि दीयतां मङ्गलं तु मे।। 10
अथातः किंट्टकार्याणि सारवत् स्थापयाम्यहम्।
मत्स्वामिनः प्रसादेन नानाशक्तिर्भवेन्मयि।। 11

यो मां चोदयते नित्यं नानाकार्येष्वतन्द्रितः।
अश्नुते तत्फलं सोऽपि न मां लिम्पति तत्फलम्।। 12
येनाज्ञानं कृतं पूर्वम् पश्चात् ज्ञानं प्रकाशितम्।
तत्कर्ता तत्फलं भुङ्क्ते प्रेष्यस्य मम किं भवेत्।। 13
शुभं वाप्यशुभं वापि यदाज्ञापयति गुरुः।
तदेव कार्यम् शिष्यस्य अन्यथानर्थमाप्नुयात्।। 14
तस्मादुन्मार्गपदवीमाख्यास्येऽहमतन्द्रितः।
पृष्ठं त्वधर्ममीशस्य धर्ममन्तः प्रतिष्ठितम्।। 15
जीवं खादति जीवोऽयं जीवो जीवं वहत्यपि।
जीवो भीषयते जीवं महान् बालं हिनस्ति च।। 16
*1बहूनि सह संयोज्य छद्मनैकं वधिष्यति।
तथैवलोकबन्धेन स्वार्थो परं हानिष्यति।। 17
बलेन विश्वस्य च वचनेन स्वार्थम् परार्थं च परं हिनस्ति।।
*2सुतं प्रियं प्रियं वाथ गुरुं प्रियं वा स्वेच्छानुरूपं कुरुते त्वसज्जनः।। 18
असदन्तःस्थितः शम्भुर्जीवान् बाधयतेतराम्।
व्याघ्राविष्टः पशून् खादेत् गोसंस्थः खादयेत्तृणम्।। 19
यत्किञ्चित्सुखमुद्दिश्य बहून्हिसंन्त्यसज्जनाः।
एकस्यैव सुखार्थाय तापयन्त्यपरान् जनान्।। 20
एकोमिष्टान्नमश्नाति अपरश्चुपवासयेत्।
भोक्ष्यते परदाराणि स्वदारं परिमुञ्चति।। 21
असतां स्वसुखं नास्ति इच्छामार्गानुसारिणाम्।
स्वसुखं च सतां नास्ति परेषां सुखवाञ्छया।। 22
असतां मांसदृष्टित्वात् परोक्षं नैव दृश्यते।
सतां विवेकदृष्टित्वादुभयं चापि दृश्यते।। 23
ईश्वरं चैव जीवं च सन्तः पश्यन्ति सन्ततम्।
जीवमात्रमसत्पश्येत् स्वावलोकं न ते विदुः।। 24

---

*1बहूनि सह संयोज्य छद्मानैकं वधिष्यति।
तथैव लोकबन्धेन स्वार्थोपर हानिष्यति।। इति साधु प्रतीयत
*2अत्र छन्दोभङ्ग हश्यते।

प्रत्यक्षचारी जीवस्य चक्षुषाऽयं समीक्षते।
परोक्षचारी भगवान् स सतां हृदि वर्तते।। 25
ध्यानेनान्तः प्रविशति विराड्रूपो महेश्वरः।
अनावृतत्वात् ध्यातृणां वर्तते नावृतः परः।। 26
ध्यातृणामेकरूपेण निरावृत्या प्रकाशते।
स एव भिन्नरूपेण आवृत्या दृश्यते बहिः।। 27
प्रत्यक्षेण परोक्षेण चक्षुषैकाग्रबुद्धिना।
जीवं परं च पश्यन्ति सन्तः स्वं न विदन्ति ते।। 28
शृङ्गारयोनिं मां विद्यात् पापं काम इति श्रुतम्।
दम्पत्योर्मेलनाज्जातं प्रीतियोगसमुद्भवम्।। 29
दम्पत्योः सङ्गमं वन्दे यतोऽहमभवं सुखम्।
संसारवृक्षं जीवानां परस्य च सुखास्पदम्।। 30
*[3]जीवेश्वराणामवलम्बनं मे शरीरमत्यन्तसुखानुभावम्।
अतो वदन्त्येव च शङ्करं मां समस्तलोकस्य च कामपूरम्।। 31
पुण्यस्थः पुण्यमाच्छाद्यवर्तनाद्दुखमश्नुते।
स्वसुखं तेन विन्दति क्षुत्पिपासादि पीडितः।। 32
पापस्थः पापमाच्छाद्य वर्तनात्सुखमश्नुते।
तेषां दृष्ट्वा स्वर्गिकसुखं स्वसुखं प्राप्य मोदते।। 33
कामात्मानः कामरूपात् काममाच्छाद्य वर्तते।
इच्छामेवाभिलषति सुखं तस्य तु नो भवेत्।। 34
मनःप्रवृत्तिरिच्छा स्यात् तस्याः शान्तिर्न सम्भवेत्।
पुनःपुनः विवृद्धित्वात् तज्जिघृक्षुरसद्भवेत्।। 35
इच्छां जिघृक्षुर्भ्रमति भ्रमणाच्छर्म नो भवेत्।
अरूपारूपिणीवेच्छा या मां दुष्टमजीजनत्।। 36
सर्वेषां पृष्ठमाश्रित्य अरूपोऽहं व्रजामि च।
असन्तो मां समालोक्य मुह्यन्त्येव न संशय-।। 37

*[3]छन्दोभङ्ग

सर्वेषां पृष्ठतो यायी मां पुरस्कृत्य भाविकम्।
जनार्दन इति ख्यातो जनानर्दयतेतराम्।। 38
विघ्नेश्वरं पुरस्कृत्य त्रिपुरघ्नो महेश्वरः।
भव्यरूपेण चरति भाविमृत्युरिति स्मृतः।। 39
सुब्रह्मण्यंश्च शास्ता च विघ्नेशः काम एव च।
इति मामेव वदति पर्यायेण जनो भुवि।। 40
सुतरां ब्रह्मणि प्रीत्या सुब्रह्मण्योऽस्म्यहं भुवि।
जन्मनःकारणं ब्रह्म तद्धितं मरणं स्मृतम्।। 41
सुब्रह्मण्यपदार्थम् तु सुतरां मृतिरेव च।
अतो मां मर्तुकामस्तु पापात्मा न समीक्षते।। 42
विघ्नं करोति कामेन विघ्नेशोऽहं ततस्मृतः।
नानाकर्म विपाकेन शास्ता भूयः समुच्यते।। 43
रोगार्तस्य विषण्णस्य यत्नलभ्यः सुखायुषम्।
अवैद्यो निर्घृणः क्रूरो यः करोति भिषग्जितम्।। 44
पापस्य मृत्युदूतस्य दुर्मतेस्त्यक्तकर्मणः।
नरो नरकपाती स्यात् तस्य सम्भाषणादपि।। 45
अष्टाङ्गसंग्रहेप्युक्तमिदं त्वाचार्यवाग्भटः।
तदत्र लिखितं वैद्यःभावदोषमनुस्मरन्।। 46
तस्मात्पापीयसां पापी वैद्योऽयमिति बोध्यताम्।
ये तु वैद्याभिमानेन ध्नन्ति भूतान् सहस्रशः।। 47
अहं तेषामग्रयायी वैद्यभावं समाश्रितः।
असतां प्रीतिकर्ताऽस्मि अनर्थस्य प्रदानतः।। 48
असतां च सतां चैव अहमेवाग्रजः स्मृतः।
दुर्जनाः सज्जनाश्चैव आहुर्मामग्रजन्त्विति।। 49
दोषत्रयं तु मद्रूपं निर्गुणं बाह्यगोचरम्।
*गुणत्रयं मे हृदयमेव दोषगुणात्मकम्।। 50

*गुणत्रयं मे हृदय तच्च दोषगुणात्मकम्।

दोषः स्थूलं विजानीयाद् यदन्तःस्थो गुणः स्मृतः।
गुणः सूक्ष्मं विजानीयाद् अदृष्टं तु तदुच्यते।। 51
अव्यक्तं तद्गुणं विद्यात् इच्छाचित्तसमुद्भवम्।
स्थूलरूपावृताभासम् अरूपं तच्च गन्धवत्।। 52
गुणाह्यनुभवाः सन्ति नैवरूपेण भान्ति च।
अन्तःस्थमन्तस्फुरति बाह्ये तच्च न दृश्यते।। 53
बाह्यं ब्रह्म विजानीयात् तदेव च बृहन्महः।
यत्र सूक्ष्मं प्रसरति स्थूले सति महत्तरे।। 54
दोषाद्गुणः प्रभवति पश्चात् दोषे विलीयते।
आश्रयः पूर्वतो जातः पश्चादेवाश्रयी भवेत्।। 55
आश्रयस्य विनाशे तु निरालम्बा तदाश्रयी।
सीदत्येव निरालम्बादरूपान्न च पश्यति।। 56
अग्निर्यथेन्धनं प्राप्य आश्रयाद्वृद्धिमेष्यति।
तथैव चित्तं ववृधे रूपभावं समाश्रितम्।। 57
निरिन्धनादरूपोग्निर्यथा दृश्यं भविष्यति।
तथैव दोषहीनं तु गुणो न च भविष्यति।। 58
पौरुषं ब्रह्म विज्ञेयं दैविकं हृदयं स्मृतम्।
चतुर्विंशतितत्वाख्यं दैविकं त्वभिधीयते।। 59
तेषामाश्रयभूतं तु पौरुषं क्षेत्रमुच्यते।
तदेवासद्विजानीयाद् येन दोषो भविष्यति।। 60
दोषात्मकं तु तद्विविद्यात् गुणानामाश्रयं च तत्।
अनर्थम् तु यदाश्रित्य सर्वेषामिह वर्तते।। 61
पौरुषेण कृतं रूपं कर्म पौरुषमुच्यते।
व्यापाररूपं कर्म स्यात् व्यापारो वासनामयः।। 62
वासना पूर्वसंज्ञा स्यात् अपूर्वरस्त्वहमेव च।
अस्मात्पूर्वं न पूर्वं स्याद् अतो पूर्वोग्रजोऽस्म्यहम्।। 63

पूर्वव्यापारजन्यत्वादपूर्वमिति मां स्मृतम्।
पूर्वम् पुरुषाकारेण कृतमेतत् कलेबरम्।। 64
तस्मिन्नहमिति ज्ञानमात्मन्यनुभवात्मकम्।
आत्मा कलेबरं विद्यात्जीवोपाधिः पिता मम।। 65
पूर्वजन्म कृतं कर्म इदानीं पुरुषाकृतिः।
पौरुषं सुखमासाद्य स्वातन्त्रयं प्राप्य मोदते।। 66
इदानीं कर्मनिर्मुक्तः कर्मणः फलमश्नुते।
वैद्यत्वात् सर्वविद्भूत्वा ऐन्द्रियाच्च विमोक्ष्यति।। 67
चतुर्विंशतितत्वानां सम्बन्धस्त्वैन्द्रियः स्मृतः।
देवास्तु कर्मसचिवाः तेऽपि मे हृदयंगमाः।। 68
तेषां प्रीतिप्रदानेन निर्वृतं हृदयं मम।
इदानीं वर्तमानं मां अस्ति वा नास्ति वा भवेत्।। 69
भूतं भाव्यैकरूपत्वात् वर्तमानं तिरस्कृतम्।
मद्रूपं सर्वतः सिद्धं इदानीं निर्गुणोऽस्म्यहम्।। 70

इति

अज्ञानप्रकरणे असत्प्रसङ्गो नाम सप्तमोऽध्याय

सप्तमध्यायस्य टिप्पणी

1. असत्

न सत् असत्। (1) सद्भिन्नं, निस्वरूपं निषेधरूपेण प्रतीयमानं म्।(2) अभावत्वाश्रयबोधम्। "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्। असदित्युच्यते पार्थ" इति गीतायासक्तिः। (3) होमादौ य (4) इन्द्रे (5) दुष्टाचरणे असाधौ (6) नामस्याभ्यामव्याक कृते कारणात्मना स्थिते सूक्ष्मरूपे (7) अव्यक्ते च "असदेवाग्र आसीत्" "यथामसतः संजायेत" इति च छान्दोग्योपनिषदि। बोद्धागमसिद्धं सत्वमर्थक्रियाकारित्वात् तच्छून्ये अकिंचित्करे अभावादौ (9) अविद्यमाने "नागतो विद्यते भावः" इति यत्तत् सउसतोः परिमिति च गीता।

"विभेदजनकाज्ञाने नाशमात्यन्तिकं गते।
आत्मनो ब्रह्मणाभेदमसन्तं कः करिष्यति।।" इति।

2. सत्

सत्यं वस्तु। नैयायिकमते घटपटादि सर्वम् जगत्सत्। अन सत्ताविशिष्टं सत् इत्यर्थो बोध्यः। न्यायमते घटादीनांमुत्पत्तिनाशवत्वे पि मिथ्यात्वाभावेन कालसम्बन्धित्वरूपं सत्यत्वं सङ्गच्छते। मायावानिदनांगते तु परं ब्रह्मैव सत्। तन्मते तत्र सत्यत्वं च त्रिकालाबाध्यत्वमेव।

3. दुराचारः

आचर्यति इत्याचारः। दुस् दुष्टवाची, दुष्टः आचारः इति आदिसमासः। विरुद्धाचरणम्। यथा अध्यात्मरामायणे -

"दुराचारस्तः सर्वे सत्यवार्तापराङ्मुखाः।" इति। दुष्टः आचारो यस्य। निन्दिताचारवति। यथा-

"महापातकयुक्तस्त्वं दुराचारो विगर्हितः।" इति।

4. सदाचारः

मन्वाद्युक्तदेशप्रचलिताचारः। अत्र व्युत्पत्तिविग्रहौ साधवः साधवः क्षीणादोषश्च् सच्जब्दः साधुवाचकः। तेषामाचरणं यत्तु सदाचार स उच्यते।।" इति। मनुना चेत्थमुक्तम्-

"सरस्वतीदृषद्वायोर्देवनद्योर्यदन्तरम्।
तं देवनिर्मितं देशं ब्रह्मावर्तम् प्रचक्षते।।
तस्मिन् देशे य आचारः पारन्पर्यक्रमागतः।
वर्णानां सान्तरालानां स सदाचार सच्यते।।" इति। यथा
"वेदः स्मृतिसदाचारः स्यस्व व प्रियमात्मनः।

एतशकुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्।। इत्यादौ सदाचारशब्दस्यार्थः विवृणोति। "यः संत्यजेच्चापि निजं हि धर्मम् तस्यै प्रदुप्येत दिवाकरश्च।" शिष्टाचारः। तथा च तत्वचिन्तामणौ स्मृतिः यस्मिन्देशे य आचारः पारम्पर्य क्रमागतः। श्रुतिरमृत्यविरोधेन सदाचार स उच्यते।।"

5. नास्तिकः

(1) वेदमार्गमननुरुन्धानः किंचिदपि पारत्रिकमामुष्मिकं स्वर्गनरकापूर्वदिकं

नास्ति इति वादि। यथा चर्वको बृहस्पतिर्नास्तिकः। (2) परलोकतत्साधनाद्दभाववादी तस्माक्षिणः ईश्वरस्यासत्ववादी च। यथा - "नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम्" इति। नास्तिकः षड्विधः। चार्वाकः बोद्धश्चत्वारः दिगम्बरश्चेति। तत्र चार्वाकः प्रत्यक्षमात्रप्रमाणवादी। तस्मिन् मते ब्राह्मणोऽहं गौरोऽहं स्थूलोऽहं जानामीत्यादिसामानाधिकरण्यप्रतीतेः ब्राह्मणत्वादिधर्मवति शरीर एव ज्ञानसुखाद्याश्रयत्वं सिध्यतीति शरीरगेवात्मा। पृथिव्यप्तेजोवाय्वात्मकचतुर्विधभूतमपुदायमेलने किण्वादिभ्यो मदशक्तिवच्चैतन्यमुपजायते। पारत्रिकस्वर्गनरकपुण्यपापादिकं नास्त्येव। अङ्गनालिङ्गनादिजन्यं सुखमेव पुरुषार्थः। कण्टकादिजन्यं दुःखमेव परकम्। लोसिद्धो राजैव परमात्मा। देहाच्छेदो मोक्ष इतिं चार्वाकमतम्। चत्वारो बोद्वाश्च माध्यमिको योगाचारः सोत्रान्तिकः वैभीषिकश्चेति। दिगम्बरो जैवभेदः। तत्र शून्वादी माध्यमिक-। तन्मते सुषुप्तव्यवहितोत्तरक्षण उत्थितस्य सुप्तो हं नासम् इत्यनुभवाच्छून्यमेवात्मा। अत एव सर्वमिदं मिथ्यैवेति शून्यवानिदनः। अत्र श्रुतिरपि "असदवा इदमग्र आसीत्" इति। क्षणिकविज्ञानवादी योगाचारः। तन्मते क्षणिकविज्ञानमेकमेव। तदतिरिक्तं बाह्यं ग्रह्यवस्तु जातं नास्ति। तच्च विज्ञानं द्विविधम्। प्रवृत्तिविज्ञानं, आलयविज्ञानम् व। तत्रायं घट इति ज्ञानं प्रवृत्तिविज्ञनम्। अहमिति विज्ञानंमालयविज्ञनम्। अयमेवात्मा अत्र श्रुति-। अन्योत्तर आत्मा विज्ञानमय इति। सौत्रान्दिकस्तु ज्ञानाकारमतुमेयः क्षणिकः बाह्यार्थ इति इच्छति। वेभाषिकस्तु क्षणभङ्गुरवादी क्षीणकस्य बाह्यार्थस्य प्रत्यक्षमपीच्डति। दिगम्बरस्तु देहातिरिक्तः देहपरिमाण आत्मा। स च दीपप्रभावात् संकोचविकासशाली इत्याह।

6. आस्तिकः

(क) परलोकाद्यस्तित्ववादी। यथा सत्यवतीसुतो व्यासः। (ख) नरकभीरुरास्तिकशब्दवाच्यः। आस्तिकास्तु वेदान्तमीमांसादयो बहवः नास्तिकेभ्यो विभिन्नमतिकाश्चेति बोध्यम्। जरत्कारुमुनिपुत्रः ऋषिविशेषः।

7. गुरुः

निशेकादिक्रियाकर्तेति धर्मज्ञाः आहुः। सच्छात्रोपदेशकः आचार्यादिः गुरुरिति मुमुक्षवः। सुराचार्य इति पौराणिकाः। पित्रादिर्जनो गुरुरिति काव्यज्ञाः आहुः।

"सगुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति।"

"पञ्चकास्त्वष्टविज्ञेया गणश्चैकत्रिकात्मकः।

वेत्ता नवगणस्यास्य संस्कर्ता गुरुरुच्यते।।"

8. शिष्यः

शिक्षणीयः शिष्य। शिष्यलक्षणं च-

शान्तो विनीतः शुद्धात्मा श्रद्धावान् धारणे क्षमः।

समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो धनि।।

एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा।" इति। अत्रोच्यते "गुरुता शिष्यता वापि तयोर्वत्सरवासतः।" इति । तथाचोक्तम् सारसंग्रहे-

"सद्गुरुः स्वाश्रितं शिष्यं वर्षमात्रं प्रतीक्षयेत्।

वर्षैकेन भवेद्योग्यो विप्रो गुणसमन्वितः।।" इत्यादिः।

9. विराट्

विशेण राजते इति विराट्। क्षत्रियः इत्यमरः। "स्थूलशरीरसमष्ट्युपहितचैतन्यम्।" इति वेदान्तसारः। ब्रह्मणो विराट्मूर्तिवर्णनं यथा शङ्करविजये "व्यूहमूर्तिर्विराट् चतुर्दशलोकात्मकः। तस्य ब्रह्माण्डकर्परपर्यन्तमाकाशः शिरः चद्रसूयौ नेत्रे, प्रागादिदिशः श्रोत्रे, अन्तरीक्षलोको घ्राणम्, मेरुः ,षष्ठवंशः, शिखरत्रयं भुजकण्ठः, प्रत्यन्तर्वताः पृष्टपार्श्ववक्षोसि, उपपर्वताः शात्मलयादीनि समुद्राः रक्तं, लताः स्नायूनि, तृणवृक्षाः रोमाणि, भूमिः कृक्षिः, द्वीपाः वलयः, भूरेखा रोमराजीः, भूमध्यप्रदेशो वस्तिः, शेषः शिश्नं, दिग्दन्तिपङ्क्तिः नितम्बोरुभागः, अतलादिसप्तकं कटिपादान्तरालः, कूर्मः पादौ" इति।

10. महेश्वरः

(1) महान् चासौ ईश्वरश्च महेश्वरः। यद्वा महामायायाः ईश्वरः। शिवः इत्यमरः। अस्य व्युत्पत्तिर्यथा-

"विश्वस्थानाच्च सर्वेषां महतामीश्वरः स्वयम्।

महेश्वरश्च तेनेमं प्रवदन्दि मनीषिणः।।" इति। (2) महान् ईश्वरः प्रजानां प्रभुः। ऐश्वर्यशाली।

11. प्रवृत्तिः

(1) उत्कटरागजन्यः प्रवृत्तिविशेषः। लक्षणं तु प्रवृत्तित्वमेव। तच्च रागजन्यतावच्छेदकातया सिद्धो जातिविशेषः। प्रवृत्युत्पत्तावयं क्रमः। प्रथमतः फलज्ञानम्। ततः फलेच्छा। ततः इष्टसाधनताज्ञानम् उपाये। ततः उपायेच्छा। ततः प्रवृत्तिरुत्पद्यत इति। प्रवृत्तिर्हि इच्छामपेक्षते। इच्छा चेष्टसाधनताज्ञानम्। तच्चेष्टजातीयत्वे लिङ्गानुभवम्। सोऽपिन्दियार्थसन्निकर्षम्। प्रवृत्तिं प्रति चिकीर्षा कृतिसाधनताज्ञानं इष्टसाधनताज्ञानं च कारणम्। (2) चिकर्षाजन्यो यत्नः। यथा विद्यायां विद्यार्थी प्रवर्तते इति। (3) प्रवृत्तिर्वाग्बुद्धिशरीरामीः। शरीरेण मनसा वाचा च प्रवृत्तिरारभ्यते। सेयं प्रवृत्तिः द्विधा पुण्या पापा च। पुण्या दशविधा कायेन परित्राणम् परिचरणं दानमिति। वाचा सत्यं हितं प्रियं स्वाध्याय इति। मनसा दया स्पृहा श्रद्धा चेति। विपर्ययेण पापाद्धि दशविधैव। प्रवृत्तिफले प्रवृत्युपचारः। प्रवृत्तिफलं धर्माधर्मो। प्रवृत्तिश्च द्वयी। कारणरूपा कार्यरूपा च। द्वे अप्यात्मासमवेते। तत्राद्या जन्यत्वेनविशिष्टा विशिष्टा वा यत्नत्वजातिमती प्रत्यक्षसिद्धा। द्वितीया तु धर्माधर्मरूपा यागादेरगम्यगमनादेश्च चिरध्वस्तस्य व्यापारतया कर्मनाशजलस्पर्शादेः प्रायश्चित्रादेश्च नाश्यतया सिद्ध्यतीति। भट्टपादानुसारेण लोके प्रवृत्तिर्द्वेधा स्वेच्छाधीना प्रेरणाजन्या च। तत्राद्यायां प्रवर्तनायाः अनुपयोगेऽपि द्वितीयप्रवृतौ सा प्रयोजिका। आचार्यप्रेरणयेदं करोमीति व्यवहारात्। (2) शब्दानामर्थबोधनशक्तिविशेषः प्रवृत्ति। (3) स्वविषयेन्द्रियादीनां संचारः। (4) वार्ता इति काव्यज्ञाः आहुः।

12. इच्छा

इदं मे भूयादिति कामोऽभिलाषो वा इच्छा। सा च मनोग्राह्या आत्ममात्रवृत्तिश्चेति विज्ञेयम्। इच्छालक्षणं हि प्रवृत्तेः साज्ञादनुकूलत्वम्। नित्यामित्यभेदेन इच्छा द्विविधा। तत्र जीवेच्छा अनित्या। ईश्वरेच्छा तु नित्या सर्वम् जगद्भूयादिति समूहालम्बनात्मिका चेति। मायावादिनस्तु व्योमादिवत्सा अनित्येत्याहुः। (2) स्वार्थं परार्थं वा अप्राप्तप्रार्थना। सा चात्ममनसोः संयोगात्सुखाद्यपेक्षात्स्मृत्यपेक्षाद्वा उत्पद्यते। कामः, अभिलाषः, रागः, संकल्पः, कारुण्यं, वैराग्यं, उपधाभावः इत्येवमादयः इच्छाभेदाः।

13. जनार्दनः

(1) जनैः अर्दयते याच्यते पुरुषार्थलाभाय। (2) विष्णौ परमेश्वरे - "सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः" इति

14. त्रिपुरघ्नः

त्रिपुरं हन्तीति त्रुपुरघ्नः। महादेवः।

15. सुब्रह्मण्यः

सष्ठु ब्रह्मणि स्थितः सुब्रह्मण्यः। कार्तिकेय इत्यर्थः।

16. शास्ता

(1) शासनकर्ता। (2) शास्तिता इति त्रिकाण्डशेषः। यथा -

"द्वौ धाता च विधाता च पौराणौ जगतः पतौ।

द्वौ शास्तारौ त्रिलोकेऽस्मिन् धर्माधर्मौ, पकीर्तितौ।।" इति। पुल्लिङ्गप्रयोगे बुद्ध इत्यमरः।

17. वाग्भटः

A sanskrit scholar who lived in the 12th centuary A.D. He is the author of the two Medical books "Ashtangahridaya" and "Neminatha".

18. दोषत्रयम्

वात-पित्त-कफरूपं दोषत्रयम्।

19. गुणत्रयम्

सात्विक-राजस-तामसरूपंगुणत्रयम्।

20. निरालम्बा

निर्नास्ति आलम्बो यस्याः सा। आकाशवासीति राजनिघण्टुः। शुक्लयजुर्वेदान्तोपनिषद्विशेष इति मुक्तिकोपनिषद्। अवलम्बनशून्ये। यथा हठयोगप्रदीपिकायाम् - "एको देवो निरालम्बः एकावस्था मनोन्मनी।" इति।

21. वासना

(1) स्मृतिहेतुः संस्कारविशेषः। (2) शक्तिविशिष्टचित्तोत्पादः। (3) मिथ्याज्ञान्जजन्यो गोरहमित्यादिज्ञानजनको दोषविशेषः। यथा आत्मा देहाद्यभिन्न इति।

एकसन्तानवर्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिजनकशक्तिः इति विज्ञानवादिनो बौद्धाः आहुः। (4) भगवदिच्छा। "प्रकृतिर्वासनेत्येव तवेच्छानन्त कथ्यते"। प्रकृतिः प्रकृष्टकणाद्वासना वासयेद्यतः।"

22. स्वातन्त्र्यम्

स्वतन्त्रस्य भावः स्वातन्त्र्यम्। यथा -

"पिता रक्षति कौमारे भर्ता रक्षति यौवने।
पुत्रो रक्षति वार्धक्ये न स्त्री स्वातन्त्र्यमर्हति।।" इति मनुस्मृतिः।

सप्तमाध्यायस्य सारः

मङ्गलाचरणेन सप्तमोऽध्यायः प्रारभ्यते। सदसदोः सदाचारदुराचारयोः नास्तिकानामसद्भावस्यास्तिकानां च सद्भावस्य च कारणभूतः अहम्। सोऽहं परदुःखकर्तृणां नरकं परोपकारशालिनां स्वर्गं च प्रददामि। यश्च पारमार्थिकतत्वज्ञः सोऽपि शवाकारं लोकं मङ्गलं करोति। ज्ञानाग्निना सारं किट्टं च विभज्य सर्वान् जीवानुद्धरति। अज्ञानमूढं मां जीवं यः पुमान् प्रबोधयति सोऽपि मङ्गलमाचरति। आत्मा पुष्करपलाशवन्निर्लेपः। तस्मिन् भोक्तृत्वं प्रकृतिसामीप्येनारोपित इति कपिलः अनुशास्ति। प्रकृतिश्च भोग्या। एतयोः संयोगेन कार्यजातं भवति। तस्माद्यः मां नानारूपेषु व्यापारेषु चोद्यति स एव तत्फलं भुङ्क्ते। अहं केवलं द्रष्टा। शुभं वा अशुभं वा गुरुणा यदाज्ञाप्यते तदेव क्रियते।

"सुखार्थाः सर्वभूतानां मतास्सर्वाः प्रवृत्तयः।
सुखं च न विना धर्मात् तस्माद्धर्मपरो भवेत्।।" इति वाक्यं धर्माधर्मविवेचनमवश्यं कर्तव्यम् इति अस्मान् बोधयति। ईशस्य पृष्ठमधर्मः, धर्मः अन्तः प्रतिष्ठित। यः अनात्मरूपः जीवः जीवं खादति, यश्च जीवं भीषयते, त्रैगुण्यसमुद्भूतः स बलशालि बालं हिनस्ति। यथा अनेके संयोज्य छद्मनैकं हनिष्यति तथेव स्वार्थः परार्थम् हिनस्ति। असज्जनः अन्यान् स्वेच्छानुरूपं कुरुते। अन्तःस्थितः महेश्वरः जीवान् बोधयतेतराम्। व्याघ्रस्वभावः हिंस्रः पशून् खादयेत्, मन्दबुद्धिस्तु तृणं खादेत्। असज्जनाः आत्मसुखाय अन्यान् पीडयन्ति। अन्येषु बुभुक्षापीडितेषु एकः मिष्टान्नं भुङ्क्ते।

स्वेच्छामार्गानुसारित्वादसुखं सुखं नास्ति। परोपकारदीक्षितानां सतामपि सुखं नास्ति। असज्जनाः चक्षुषा बाह्यं पश्यन्ति, परोक्षं न पश्यन्ति। सतां तु विवेकनयनेन प्रत्यक्षस्यैव परोक्षस्यापि दर्शनं भवति। सन्तः बाह्यचक्षुषा एव जीवस्य भावं सम्यक् जानन्तीति भावः। ध्यानेनान्तः प्रविष्टः विराट्रूपः महेश्वरः सतां हृदि वर्तते। स च आवरणभङ्गेन ध्यातृणां हृदि एकरूपेण प्रकाशते। भिन्नरूपेण ब्रह्मणः बहि प्रकाशते आवरणहेतुः। एवं च सन्तः जीवं प्रत्यक्षेण यथा पश्यन्ति तथैव परमात्मानमपि परोक्षतया प्रत्यक्षतया च ते जानन्तीत्याशयः। इच्छासंवृतचेतसो दुर्ज्जनाः जीवस्य बाह्यरूपमेव समीक्षन्ते। इच्छाकामयोः संयोगः सुखहेतुः। यत्र सुखमस्ति तत्राहंमानन्दरूपेण भवामि। कामाद्यरिषड्वर्गः पापहेतुः। अथापि कामस्य पुरुषार्थत्वात् गार्हस्थ्ये तस्य परमं स्थानम्। एवं दाम्पत्येन सन्ततिलाभः। "आत्मा वै पुत्र नामोसि" इति श्रुतेः। इत्थं जीवानां संसारवृक्षः परस्य सुखास्पदम्। जीवेश्वरयोर्योगेन इदं भोगायतनं शरीरं लब्धमिति भावः।

इच्छावान् पुरुषः तत्तद्विषयेषु विपरिवर्तमानः अशान्तो भूत्वा भ्रमति। अतस्तस्य न सुखलाभः। असन्तस्तु मां प्रत्यक्षं दृष्ट्वा विस्मयेन मोहमुपगच्छन्ति। सृष्टि-स्थिति-संहारकारणभूतं मां सुब्रह्मण्यः, शास्ता, विघ्नेशः, काम इति बहुभिः नामभिः व्यवहरन्ति जनाः। शास्त्रे अकुशलः सन्नपि यः वैद्यबिरुदधारी सः पातकी जन एवेति ग्रन्थकर्तुः आशयः। यश्च वैद्याभिमानी सहस्रशः भूतानि हन्ति इति लोकानुभवः। कुवैद्यः अविदग्धचिकित्सया दुर्जनानां शत्रुतां सम्पादयति।

असतां सतां चाग्रयायी अहम्। वैद्यविषये मम परिमितं ज्ञानमित्याशयः। वात-कफ-पित्तरूपदोषत्रयमेव मम रूपम्। अतः निर्गुणः बाह्यगोचरश्च भवति जीवः। सात्विक-राजस-तामसगुणयुक्तं हृदयम्। गुणः सूक्ष्मः न दृष्टिगोचरः। दोषस्तु स्थूलः। स्थूलव्यापृतः सूक्ष्मरूपः गुणः। अन्तःस्थो गुणः अनुभवेनेवावधीर्यते।

अत्र दोषगुणयोराधाराधेयभावः निर्दिष्टः। निरालम्बत्वादरूपत्वाद् च आश्रयाभावे आश्रयिभूतपदार्थज्ञानं न जायते। यथा अरूपोऽग्निः इन्धनयोगेन दृश्यो भवति तथैवारूपो गुणः दोषत्रयं प्राप्यः दृष्टिगोचरो भवति।

एवं च पौरुषें ब्रह्म इति ज्ञेयम्। दैविकं तु हृदयं स्मृतम्। तच्च प्रकृति-

महत्तत्व-अहंकार-एकादशेन्द्रिय-पंचतन्मात्र-पंचभूतैः चतुर्विंशतितत्त्वैः घटितम्। तस्याश्रयभूतं पौरुषं क्षेत्रमित्युत्यते। क्षेत्राद्दोषस्य समुद्भवः। तस्मात्तदेवासद्विजानीयात्। यमाश्रित्य सर्वेषामनर्थापत्तिः दोषात्मकः सः गुणानामाश्रयत्वेन वर्तते।

पौरुषेण कृतं रूपं कर्मपौरुषमित्युच्यते। पूर्वम् पुरुषाकारेणैतत्कलेबरं प्राप्तम्। तस्मिन्नहमिति ज्ञानमात्मनि अनुभवात्मकम्। अत्र आत्मा कलेबरम्, उपाधिः मम पिता। पूर्वजन्मकृतं पुरुषाकृतिः भजते। अधुनाहं कर्मविमुक्तः सन् कर्मफलमनुभवामि। कर्मसचिवानां देवानां प्रसादेन मम हृदयं निर्वृतम्। भूतभव्यैकरूपत्वाद्वर्तमानस्य तिरस्कृतत्वात् च मम रूपं सर्वतः सिद्धं भाति। एवं निर्गुणः सन् विराजते अहं पदार्थः।

अष्टमोऽध्यायः

अभावनिरूपणम्

नारीणां च नराणां च दोषधातुमलात्मकम्।
यदीरयति मे सौख्यं तच्छरीरं नमाम्यहम्।। 1
श्रुत्यादिपञ्चवेदेन शङ्करेण प्रहर्षितः।
वर्तमानप्रकर्षेण नवात्मा मोदयाम्यहम्।। 2
भव्यं भवं समासाद्य भूतरूपो पुरःस्थितः।
नर्तनं कुरुते नित्यं सदा मत्प्रीतयेऽधुना।। 3
कालकर्मस्वभावाश्च प्रीतिं कुर्वन्ति मेऽनिशम्।
नृत्यन्ति भूतरूपेण शाश्वताः पुरतः स्थिताः।। 4
निर्गुणं मां समालोक्य विन्दन्त्येतेगुणात्मकाः।
भ्रान्तोऽयं मूढपुरुषः सिद्धान्तीति च मायिनः।। 5
शयितोऽशुचिपर्यङ्के दोषधातुमलात्मके।
अत्यन्ताशुचिभिर्ग्रस्तः क्लिश्यति लोकनायकः।। 6
अहं समुद्धरिष्यामि अस्वस्थं मत्परं प्रभुम्।
स्वस्थः स्वेनैव महसा जीवो जीवं समुद्धरेत्।। 7
स्वस्थो जीव इति ज्ञेयः अस्वस्थस्तु परः स्मृतः।
अस्वस्थजीवस्तु परः स्वमात्मरूप एव च।। 8
आत्मा शरीरं जानीयात् देवानां तु तदाश्रयः।
*आधेय देवता वृन्दशरीरे तद्विलीयते।। 9
कर्तुम् तदन्यथाकर्तुम् शरीरंः प्रभुरेव च।
देवास्तत्कर्मसचिवातस्मात् ते वै न मे प्रभुः।। 10
शरीरं शं करोत्येव कर्मणा स्वेन तेजसा।
स्वस्थः स शङ्करो ज्ञेयो यत्र देवाः समाश्रिताः।। 11

---

*आधेय देवतानां च शरीरे तद्विलीयते। इतिसाधु भवेत्।

जानन्ति यं सुराः सर्वे सैव यज्ञ इति श्रुतः।
यज्ञं कर्मात्मकं तच्च शरीरेणैव संभृतम्।। 12
निरावृतं शरीरं स्यात् आवृतो देवतागणः।
नामान्यर्थात्मकान्यत्र सत्यानि च चकाशिरे।। 13
शरीरकृत धर्मेऽस्मिन् यज्ञो दक्षिणयान्वितः।
रूपनामप्रसिद्धः सन् प्रकाशेन प्रपद्यते।। 14
आत्मात्मीयतया यस्य लोकालोकमिदं स्थिरम्।
स्याच्चेत् स स्वर्गतः स्वस्थः सुखमात्रं स्वसंज्ञितम्।। 15
निस्वो स्वस्थो धने जात्यां चञ्चले स्थितिवाञ्चया।
अनर्थनरकं याति स्वाभिलाषस्वविच्युतिः।। 16
स्वविच्युत्या स्वाभिलाषः सर्वेषामेव सम्भवेत्।
स्वस्थः स्वं नैव काङ्क्षी स्यात् स्वसंस्थः स स्वरात् भवेत्।। 17
देवस्य कारणं मर्त्यो मर्त्यकार्यमकार्यता।
अमर्त्यो मर्त्यहेतुः स्यात् अमर्त्यो मर्त्यकार्यकृत्।। 18
एवं त्वमर्त्यो मर्त्यश्च योगादन्योन्यकार्यकृत्।
अयोगादसदेव स्यान्मर्त्यश्चामर्त्य एव च।। 19
मर्त्यस्त्वयं शवो लोकः जीवो मर्त्यो मृतः स्मृतः।
तयोर्योगाच्छिवः प्रोक्तः शिवो हरिहरात्मकः।। 20
तदेव मम रूपं स्यात् योगादेकत्वतां गतम्।
बिन्दुना सह संयुक्तं ह्रीङ्कारं साक्षितां गतम्।। 21
जीवलोकानुभूतिं मां स्वसाक्षिणमिति स्थिरम्।
सकलं क्लीं विजानीयाद् ह्रीङ्कारं शक्तिसूचकम्।। 22
कलया सृज्यते लोको हरेण ह्रियते जगत्।
ईङ्कारः स्वस्थतां याति साक्षित्वेनावलोकितः।। 23
ईकारः शक्तिबीजं स्याद् अनुस्वारस्यसिद्धये।
अनुस्वारोऽनुभूतिर्मे मद्भावोऽत्र तिरस्कृत।। 24

शक्तिरेव च मत्क्षेत्रं त्रिकोणं काममन्दिरम्।
दक्षिणाग्निस्त्रिकोणस्याप्यहमेवाभिचारकः।। 25
नित्यहोमाग्निना श्रेष्ठो नित्याग्न्योः साक्षितां गतम्।
अग्न्याहार्यम् द्विजाः सर्वे कामार्थम् प्रीणयन्ति माम्।। 26
अजीवं मां विजानीयाज्जीवं साक्षितया स्थितम्।
त्रिकोणत्वमनङ्गत्वात् अनित्योऽनङ्गसंज्ञितः।। 27
पापी परानर्थकरः परमार्थविघातकः।
उभयप्रीतिरेवाहं मैथुनस्यावलम्बकः।। 28
कामदेव इति ख्यातः संसाराटविनायकः।
वामस्वभावः पृष्ठाक्षः सर्वानर्थकरोऽस्म्यहम्।। 29
दुर्मार्गदेशिकोऽप्यस्मि सन्मार्गस्य विघातकः।
कर्माणि मां न लिम्पन्ति वेदो मां न विजानाति।। 30
ईकारान्तःस्थ बीजं मां जानन्ति भुवि मानवाः
ईकारो मम योनिः स्यात् तस्मादहमयोनिजः।। 31
ई मायामिति जानीयाच्चित्तं मायेति कथ्यते।
अतो मनसिजं मां तु वक्ष्यन्ति भुवि मानवाः।। 32
अरूपाभासकं चित्तमभावाद्व्यञ्जनात्मकम्।
सर्वेषां व्यञ्जनात्मत्वाद्योनिरित्यभिधीयते।। 33
तदयोनिरिति ज्ञेयं सर्वेषामपि भावतः।
तस्मादयोनिजं मां तु प्रवदन्ति मानीषिणः।। 34
सर्वयोनिसमुद्भूतमनादिनिधनात्मकम्।
अज्ञानाख्यमसत्कल्पं सद्भावं तु ज्ञानं वदेत्।। 35
अनाद्यनन्तं तु मामाह आद्यनन्तं सदुच्यते।
सद्भावस्तु मदन्ते स्यादपूर्वं तच्च सद्भवेत्।। 36
योनिजत्वाच्च यवनो म्लेच्छो म्लेच्छात्मसंश्रयात्।
बौद्धो बुद्धिप्रबोधत्वात् सर्वज्ञः सर्वबोधनात्।। 37

पञ्चेन्द्रियमनः प्रीत्या षडभिन्नोऽस्मि साम्प्रतम्।
अहमेवाशुचिः सर्वो योनिस्थो रेतसः कणः।। 38

सुष्ठु यत्र भगं तत्र भगवानिति कथ्यते।
सुभगमाश्रयेद्यश्च सोऽप्येव भगवान् स्मृतः।। 39

दशेन्द्रियबलोत्साहादहं दशबलः स्मृतः।
अद्वैतवादी सर्वेषामद्वयप्रतिबोधनात्।। 40

सुक्षेत्रे पतितं बीजं बहु लाभाय जायते।
माता वापि सुता वापि सुक्षेत्रं चेद्गमिष्यतिः।। 41

यत्र बीजं प्ररूढं स्यात् तत्र गच्छेत्सुखं सुखी।
शृङ्गारयोनेः शृङ्गारं कारणं परमं भवेत्।। 42

श्रीरेव कारणं मे स्यात् तस्मात्तां लालयेतराम्।
श्रियः कामः प्रववृधे कामः श्रीपतिरेव च।। 43

श्रीरेव भूर्विजानीयात्संज्ञामात्रविशेषितः।
सर्वेषां क्षेत्रभूतत्वद्योनिभूरिति कीर्तिता।। 44

यस्माद्भवन्ति भूतानि रेतसा च निषेवितः।
रेतस्त्वमृतमेव स्याद् यस्माज्जीवः प्रजायते।। 45

बीजाख्यः स तु कामः स्याद् बीजस्यादिर्न सिध्यति।
संसारवृक्षबीजं मां काममित्यवधार्यताम्।। 46

कामस्य नाशात्संसारो नश्यत्येव न संशयः।
कामस्य नाशात्सन्मार्गमसत्स्मृत्या भविष्यति।। 47

सद्भावाभावसंसिद्धोऽसद्भावो सद्विपर्यः।
भावे सिद्धेऽप्यभावस्तु कदाचिन्नैव सम्भवेत्।। 48

भावानालोकतः सिद्धो यदभाव तदनर्थः।
अनर्थादसुखाद्भावं प्रपेदे तपसात्मनः।। 49

क्षुदार्दितोऽन्नं स्मरति पिपासुर्जलमिच्छति।
पौरुषेण प्रयत्नेन अन्नपानं तदा भवेत्।। 50

एवं त्वभावतः सिध्येत् भावः पौरुषप्रयत्नतः।
अनर्थस्य विघातं यत्पौरुषं तत्प्रचक्षते।। 51
अरूपत्वादभावस्य रूपं नैव प्रपद्यते।
अस्तीवाभात्यनर्थत्वात्तेजोभावविपर्ययात्।। 52
चक्षुर्निमीलने यद्वत्सत्यमावृत्य दर्शनम्।
असत्तिमिरविक्षेपं तथा भावविलोकनम्।। 53
अभावो नैव कार्यं स्यान्नानाकार्यविघातकः।
कार्याभावादनर्थं तदनर्थाद्यज्ञको भवेत्।। 54
कार्याणामविचारत्वात्कार्याभावं प्रपद्यते।
तदनर्थं विजानीयादभावं रूपमीदृशम्।। 55
यथारूपं तिरस्कृत्य अयथारूपभासनम्।
रज्जुसर्पवदाभाति अप्रमा तदनर्थकम्।। 56
वेदेन निषेधरूपेणाभावत्वं प्रकाशितम्।
विधिनैव तदुक्तं चेदधर्मस्तु भविष्यति।। 57
वेदवाक्यस्य सत्यत्वादभावस्य विपर्ययात्।
वेदस्तं न विजानाति तमः सुर्ये यथा तथा।। 58
अवाच्यवाच्याभिरतं वाच्यवाक्यविशारदाः।
अनुगृह्णन्तु मां नित्यं वासुदेवपरायणाः।। 59
असद्भावं यतो भाति नानादोषैकनिग्रहम्।
वन्देऽहं तं महादेवं लोकालोकैकविग्रहम्।। 60

इति

अभावनिरूपणं नाम

अष्टमोऽध्यायः

अष्टमाध्यायस्य टिप्पणी

1. शरीरम्

(1) चेष्टेन्द्रियार्थाश्रयः शरीरम्। अत्र व्युत्पत्तिः शीर्यते इति। प्रतिक्षणं क्षीयमाणं देहं शरीरम्। शरीरत्वं तु न जातिः। पृथिवीत्वादिना संस्कारात्। शरीरत्वं च प्रयत्नवदात्मसंयोगासमवायिकारणवत् क्रियावदन्त्यावयवित्वम्। अथवा अन्त्यावयविमात्रवृत्तिचेष्टावत् वृत्तिजातिमत्वम्। (2) आत्मनो भोगायतनम्। यदवच्छिन्नात्मनि भोगो जायते तदभोगायतनमित्यर्थः। हस्ताद्यवयवानां शरीरत्वाद्यनङ्गीकारे त्वन्त्यावयवित्वं देयम्। तथा चोक्तं "भोगायतनमन्त्यावयवि शरीरम्" इति। "शरीरमन्त्यावयवि चेष्टा भोगेन्द्रियाश्रयः" इति च। यथा अस्मदादीनां पार्थिवशरीरम्। तच्च शरीरं न पाञ्चभोतिकम्। पृथिवीत्वजलत्वादिजातीनां परस्परसांकर्यप्रसङ्गात्। किन्तु पार्थिवमेव । स्वाभाविकगन्धवत्वात्। श्रुतिरपि "सूर्यम् ते चक्षुर्गच्छतात्" इत्यत्र मन्त्रे पृथिवीं ते शरीरमिति श्रूयते। एवं जलीयतेजसावयवीयशरीरेष्वपि विज्ञेयम्। शरीरं द्विविधम् - योनिजम् अयोनिजम् च। शुक्रशोमितसन्निपातजन्यं योनिजम्। अयोनिजं तु शुक्रशोषितसन्निपातानपेक्षम्। योनिजमयोनिजं च पार्थिवशरीरम्। तदुक्तं योगार्णवे-

"देहश्चतुर्विधो जन्तोर्ज्ञेय उत्पत्तिभेदतः।
उद्भिजः स्वेदजोऽजोत्थश्चतुर्थश्च जरायुजः।।
उद्भिद्य भूमिं निर्गच्छन्नुद्भिजः स्थावरश्च यः।
उद्भिजाः स्थावराः ज्ञेयस्तृणगुल्मादिरूपिणः।।" इति। आप्यं तेजसं वायवीयं चायोनिजमेव वरुणादित्यवायुलाकेषु प्रसिद्धं च। योनिजं पार्थिव शरीरं च द्विविधम् - जरायुजमण्डतम् च। जरायुजं मानुषपशुमृगाणाम्। अण्डजं पक्षिसरीसृपाणाम्। अयोनिजं पार्थिवशरीरं च त्रिविधम् - स्वेदजम्, उद्भिजम्, अदृष्टविशेषजन्यं च। तत्र स्वेदजं सूकालिक्षादीनाम्। उद्भिजं वृक्षतृणगुल्मादीनाम्। अदृष्टविशेषजन्यं मन्वादीनां देवर्षिनारदादीनां च। केचित्तु देवादीनां शरीरं तेजसमाहुः। अत्रेदं बोध्यम् - क्षुद्रजतूनामूष्मजानां मशकादीनां तु यातनाशरीरमप्ययोनिजमेव इति। एतच्छरीरं तु अधर्मविशेषमहितेभ्योणुभ्यः एव जायते इहित ज्ञेयम्।

2. कालः

विभुत्वें सति दिगसमवेतंपत्वासमवयिकारणाधिकरणम्। तदर्थ च दिश्यसमवेतं यत् परत्वस्यासमवासिकारणं सालपिण्डसंयोगः तस्याधिकरणमिति।

"परापरव्यतिकरभैगायद्यायोगपद्याचिरक्षिप्रत्ययकारणं द्रव्यम्" इति वैशेषिकाः आहुः। अतीतादिव्यवहारहेतः इति तार्किकाः। तदर्थश्च अतीतः भविष्यद् वर्तमानः इति प्रतीतिप्रयोजकः व्यवहारस्तस्यापाधारणनिमित्तहेतुः। शब्दिकास्तु शब्दतन्मात्र परिणामः कालः इत्याहुः। येन मूर्तिनामुपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमित्याहुः। तस्यैव कयाचित्क्रियया युक्तस्यहरिति रात्रिरिति च भवति। कया क्रियया आदित्यगत्या। तयैवासकृदावृत्या मास इति संवत्सर इति च भवति। काललक्षणं तु कलिकसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितमधिकरणविधया निमित्तत्वम्। अथवा विभुत्वे सति कालिपरत्वापरत्वामसवायिकारणसंयोगाश्रयत्वाद्युपाधिरूपं कालत्वम्। कालसत्वे प्रमाणं चानुमानम्। तच्च परत्वापरत्वे च सामवायिकारणके भावकार्यतवात् घटवत् इति। ज्येष्ठे परत्वप्रत्ययः कनिष्ठे अपरत्वप्रत्ययः। स च परत्वापरत्वगुणविशेषाधीनः। एवं ज्येष्ठकनिष्ठत्वज्ञानाधीनपरत्वापरत्वानुमेयः कालः सिद्धः। सांख्याश्च कालः आकाशेन्तर्भवतीति कालमतिरिक्तं न स्वीकुर्वन्ति। दिक्कालौ नेश्वरादतिरिच्यतेति ईश्वरात्मक एव कालः इति रधुनाथप्रभृतयः तार्किकाः आहुः। एतन्मते काल ईश्वरान्नातिरिक्तः। किन्तु क्षणा एवेश्ररादतिरिक्ता इदानीमित्यादि व्यवहारविषयाश्चेति ज्ञेयम्। स च काल एकः विभुः नित्यश्च। काल एकोपि उपाधिभेदास्त्रिविधः। अतीतः अनागतः वर्तमानश्चेति। "कलनात्सर्वभूतानां स कालः परिकीर्तितः। "कालः सर्वकार्याणां चोत्पत्तिविनाशहेतुः। काललिङ्गाविशेषादेकत्वं सिद्धम्। कारणे काल इति वचनात् परममहत्परिमाणम्। कारणपरत्वादिति वचनात् संयोगः। तद्विनाशाद्विभागः। कालो तीन्द्रिय इति नैयायिकसिद्धान्त-। तथा च दिग्विपरीतपरत्वापरत्वानुमेयः काल इति। प्राभाकराश्च कालः षडिन्द्रियवेद्यः इति अमन्यन्त। मायावादिनस्तु कालः साक्षिप्रत्ययबास्यः इत्यङ्गीचक्रुः विवेकसाक्षात्कारान्तरायो मेघाख्यस्तुष्टिविशेषः काल इति सांख्याः आहुः।

3. कर्म

एकद्रव्यगुणं संयोगविभागेष्वनपेक्षाकारणमिति कर्मलक्षणम्। अत्रैकद्रव्यत्वं च एकमात्रमूर्तसमवायिकारणत्वम्। "चलनात्मकं कर्म" इति तर्कदीपिकायामुक्तम्। न्यायवेशेषिकनये तक्संग्रहे उक्तम्। संयोगविभागानुकूलमित्यर्थः। संयोगभिन्नत्वे सति संयोगासमवायिकारणमिति तर्कदीपिकायामुक्तम्। न्यायवेशेषिकनये कर्म पञ्चविधम् उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनम्, प्रसारणं गमनं चेति। क्रियते फलार्थिभिरिति कर्म धर्माधर्मात्मकं बीजाङ्कुरवत्प्रवाहरूपेणानादि। यथा कर्मणेव हि संसिद्धिमास्थिताः जनकादयः इत्यादौ। क्मणि षट् - शान्तिकरणम्, वशीकरणम्, स्तम्भनम्, विद्वेषः, उच्चाटनं, मारणं चेति। एते षट्प्रयोगाः तन्त्राद्युक्ताः। यजनं, याजनम्, अध्ययनम्, अध्यापनम्, दानम्, प्रतिग्रहश्चेति एतानि ब्राह्मणस्य षट् कर्माणि। केचित्तु कर्म त्रिविधम् - नित्यं, काम्यं, नित्यकाम्यं चेति। तत्र केवलं नित्यम् सन्ध्यवन्दनादि। केवलं काम्यें यागादि। नित्यकाम्यं तु एकादशीव्रतादित्याहूः। मीमांसकमते नित्यं नैमित्तिकं का मेमित्तिकं काम्यं चेति त्रिविधं कर्म। सात्विकराजसतामसभेदेन त्रिविधं कर्मेति वेदान्तिनः। वेदान्तिनां मते कर्म पुण्यपापजनकम्। तच्च द्विविधम् - संचितं, प्रारब्धं चेति। तत्रानारब्धविभागः कर्माशयः संचितम्। तच्च ज्ञानाग्निना दह्यते। आरब्धविपाकश्च कर्माशयः प्ररब्धम्।

4. स्वभावः

हेत्वन्तरानपेक्षो वस्तुधर्मविशेषः। यथा "स्वभावो दुरतिक्रम-।"

"अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथानिलः।

केनेदं चित्रितं तस्मात्स्वभावस्तद्व्यवस्थिति-।।" इत्यादौ स्वभावशब्दस्य अर्थः उक्तः। तत्र प्राणिस्वभावस्तु द्विविधाः निसर्गः, स्वरूपं चेति। तदुक्तम् -

"बहिर्हेत्वनपेक्षी तु स्वभावोथ प्रकीर्तितः।
निसर्गश्च स्वभावश्च इत्येष भवति द्विधा।।
निसर्गः सुदृढाभ्यासजन्यः संस्कार उच्यते।
अजन्यस्तु स्वतः सिद्धः स्वरूपो भाव उच्यते।।" इति

5. शाश्वतम्

शश् + बाहुलकात् वत्। पुनः पुनः, सततं, सन्ततं, अनिशं, नित्यम्, अजस्रं, अश्रान्तम्, अविरतम्, अनवरतम्, अनारतम्, असक्तम्।

"क्षिप्रं भवति शान्तात्मा शश्वच्छान्तिं निगच्छति।" इति।

6. पर्यङ्कः

परितो ङ्यते इति। श या, म च, म चकः, पर्यस्तिका, परिकरः, अवसक्थिका,

"अथोपविष्टं राजानां पर्यङ्के ज्वलनप्रभे।

उपप्लुतं यथा सोमं राहुणा रात्रिसंक्षये।।"

उपगम्यब्रवीत्कर्णो दुर्योधनमिदं तदा।" इति। योगपट्टः, योगासनम्,

7. महः स्

मह्यते पूज्यते अस्मिन्निति। उत्सवः तेजः,

"अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम्।

तं नरं वपुषि कु जरं मुखे मन्महे किमपि तुन्दिलं महः।।" इति रधुटीकारम्भेमल्लिनाथः। मह्यन्ते पूज्यन्ते देवादयो स्मिन्निति। यज्ञः, उदकं, पूज्यमाने। "जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वरात् भामः।" इति यजुः संहितायाम्। "वाक् वागिन्द्रियं महः पूज्यमानस्तु" - इति तद्भाष्ये महीधरः। महत् - महोराये तमुत्वा समिधीमहि" इति ऋग्वेदे।

8. देवः

दिव्यति आनन्देन क्रीडति इति। इन्द्रः, पारदः, ब्राह्मणानामुपाधिभेदः, "दैवपूर्वं नराख्यं स्यात् धर्मवर्मादिसंयुतम्" इति स्मृतिः। ऋत्विक्, "ब्रह्मा देवानां पदवीः कवीनां ऋषिर्विप्राणां महिषो मृगाणाम्" - इति ऋग्वेदे। महादेवः, "परश्वधायुधो देवः अनुकारी सुंबान्धवः" - इति महाभारते। दाता, द्योतयिता, दीपयिता, "अग्निमीले पुरहितम् यज्ञस्य देवमृत्विजम्" इति। "देवशब्दो दानदीपनद्योतानामन्यतममर्थमाचष्टे, यज्ञस्य दाता दीपयिता द्योतयिता यमग्निरित्युक्तं भवति" - इति तद्भाष्ये सायणः। विष्णुः, "उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः" इति महाभारते।

9. सचिवः

सच् समवाये + इन्। तथा सचिं वातिति। मन्त्री, सहायः अमात्यः

10. तेजः

तेजो रूपस्पर्शवत्। तदर्थश्च रूपं भास्वरं स्पर्शश्च उष्णः तद्वत्तैजः। भास्वरशुक्लरूपवत्वमुष्णर्शवत्वं च तेजोलक्षण् इति। "उष्णस्पर्शवत्तेजः" इति तर्कसंग्रहे। तेजोलक्षणं च तेजस्त्वमेव। सांख्यास्तु शब्दस्पर्शरूपगुणं तृतीयं महाभूतं तेजः इत्याहुः। चैतन्यात्मकं ज्योतिरिति वेदान्तिनः आहुः। न्यायमतसिद्धं तेजो द्विविधम्। नित्यंमनित्यं च। तत्र नित्यं परमाणुलक्षणम्। अनित्यं कार्यलक्षणम्। अनित्यं त्रिविधम्। शरीरमिन्द्रियं विषयश्च। तत्र शरीरमयोनिजमेव। तच्चादित्यलोके, प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षु कृष्णतारग्रवर्ती। विषयरूपं चतुर्विधम्। भौमं पार्थिवमात्रेन्धनम् वह्न्यादिकं खद्योततेज आदि च। दिव्यं अबिन्धनं सोरचन्द्राविद्युद्रबडवानलादि। औदयं पार्थिवजलोभेयेन्धनं तेजः तस्य भुक्तस्य परिणामहेतुः। आकरजमनुभयेन्धनं तेजः। तेजस्येकदशगुणाः वर्तन्ते। भास्वरशुक्लरूपम् उष्णस्पर्शः संख्या परिमाणं पृथक्त्वं संयोगः विभागः परत्वमपरत्वं नौमित्तिकद्रवत्वं वेगाख्यसंस्कारश्च।

11. यज्ञः

यागः। स च यागः सात्विकराजसतामसभेदेन त्रिविधः। तदुक्तं गीतायाम् -

"अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्विकः।।
अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्।।
विधिहीनममृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते।।" इति।

गृहस्थकर्तव्याः पञ्चमहायज्ञाः यथा -

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोतिथिपूजनम्।।
दैवयज्ञो भूतयज्ञः पितृयज्ञस्तथैव च।

ब्रह्मयज्ञो नृयज्ञश्च पञ्च यज्ञाः प्रकीर्तिताः।।"

तत्र च "होमो देवो बलिर्भूतः पित्र्यः पिण्डक्रिया स्मृत्।

स्वाध्यायो ब्रह्मयज्ञश्च नृयज्ञोऽतिथिपूजनम्।।" इति

12. आवृतः

कृतावरणे अप्रकाशीकृते आच्छादिते,

"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" - इति गीता। एतच्चानावृतक्षेत्रविषयम्। आवृते तु पुनर्मागक्षेत्रेऽपि दोष एवेति। "ब्रह्मणदुपकन्यायामावृतो नाम जायते" इति मनुक्तेः। संकीर्णवर्णभेदे।

13. दक्षिणा

यज्ञान्ते दानम्। अत्राम्नायते "तस्मान्नादक्षिणं हविः स्यात्" इति। शतपथश्रुतिः। पुराणमपि

"अदत्तदक्षिणं दानं व्रतं चैव नृपोत्तम।

विफलं तद्विजानीयाद्भास्मनीव हुतं हविः।।" इति। अनात्यर्थदान एव दक्षिणशब्दो रूढः।

14. प्रसिद्धः

ज्ञानम् 2 ख्यातिः 3 भूषणम् ठङ्कारः इति केचिदाहुः।

15. नरकः

दुःखविशेषः। यथा नरके पतनं केन नरके पतनं केन नरके लिखितम् इत्यत्र। अत्र केनेत्यस्य ब्रह्मणेत्यर्थः। तथेकस्य नरकपदस्य नरस्य मनुष्यस्य के मस्तके इत्यर्थः। यथा-

"नरकेसरिणः स्मर्तुः नरके पतनं कुतः" इत्यादोच च। पापभोगस्थानविशेषो नरकः। स चासिवनक्षरादिः। यथा

"वेददूषयिता यश्च वेदविक्रायकश्च यः।

अगम्यागामि यश्च स्यात् ते यान्त्यसिवनं द्विजः।।" इति पद्मपुराणे।

16. अभिलाषः

विषयतासम्बन्धावच्छिन्नप्रीत्यनुकूलः प्रीतिव्यधिकरणो व्यापारः। यथा "हरिर्भक्तिमभिलषति" इत्यादौ अभिलषतेरर्थः। अभ्यवहारेच्छा भोजनेच्छा।

17. अमर्त्यः

मृतिमर्हति यत् न तत्। मरणशून्ये, "उत्क्रान्तवाय्वोः समकालमेव अमर्त्य भावेऽपि कयोश्तिदासीत्" इति रघुः।

18. योगः

सम्बन्धः। समुदायशब्दस्यावयवशक्तिः। यथा पाचकादिपदेषु योगः। अत्र च पाचकादिपदात् पचतीति व्युत्पत्या पाककर्ता बुध्यतेति बोध्यम्। अत्र योगबलं समाख्या इति मीमांसकाः वदन्ति। चित्तवृत्तिनिरोध इति योगिनः आहुः। क्लेशक्रमविपाकाश्रयपरिस्पन्दिचित्तवृत्तिनिरोधो योगः। अत्रेदं बोध्यम्। विषयेष्वलंप्रत्यवतः उदासीनस्य वहिरिन्द्रियेभ्यो व्यावृतुं मनो यदा आत्ममात्रमनिष्टं भवति तदा तत्कर्मानुगुणप्रयत्नाभावात् क्रम मनसि नोत्पद्यते। स्थिरतरं मनो भवति स एव योगः। (5) जीवात्मपरमात्मनोः सम्बन्ध इति केचिद्वेदान्तिनः आहुः। तदुक्तम् - "योगश्च संयोगमित्याहूः जीवात्मपरमात्मनोः" इति। (6) देवतानुसन्धानं योग इति रामानुजीयाः नारदपञ्चरात्रविदः आहुः। (7) अप्राप्तस्यार्थस्य प्राप्तये पर्यनुयोगो योगः। यथा योगाचार इत्यादौ इति बौद्धाः आहुः। (8) शब्दादीनां प्रयोग इथि वैयाकरणाः आहुः। (9) भेषजमिति भिषजः आहुः। (10) "चित्तद्वारेण आत्मेश्वरसम्बन्धो योगः" इति सर्वदर्शनं संग्रहे उक्तम्।

19. शवः

शवति दर्शनेन चित्तं विकरोतिति। शव् गतौ विकारे। मृतशरीरं, कुणपः, क्षितिवर्धनः, मृतकः "शवे स्पृष्टे पराधस्य एष ते कथितो विधिः" इति वराहे। शवति गच्छतीति जलम्।

20. अनुभूतिः

अनुभववदस्यार्थोऽनुसन्धेयः। अनुभूति प्रत्यक्षात्मिकेवेति चार्वाकाः आहुः। अनुमितिरपीति काणादसौगतौ। उपमितिरपीति केचिन्नैयायिकदेशिनः। अर्थापत्तिरपीति प्रभाकराः। अनुपलब्धिरपीति भट्टवेदान्तिनः। चेष्टापीतितान्त्रिकाः अनुभूतिर्हि स्वसद्भावेनैव कस्य चिद्वस्तुनो व्यवहारानुगणत्वापादनस्वभावो ज्ञानावगतिसंविदाद्यपर सकर्मकोनाम नुभवितुमात्मनो धर्मविशेषः।

21. क्षेत्रम्

शरीरम्।

"इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।

एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः।।" इति।

22. अभिचारकः

यः अभिचारं करोति स एवाभिचारकः। अभिचारो नाम + मारणम्, शत्रुवधमित्यर्थः। यथा श्येनेनाभिचरन् यचेदेत्यादावभिचार-। (2) वैरवधाद्युत्कटकामना।

23. पापी

पापामस्यास्तीति पापी। वेदप्रतिपाद्यनिष्टसाधनमदृष्टविशेषः गुणः पापम्। "सत्कर्मपुद्गला पुण्यं पापं तस्य विपर्ययः"।

24. ईकारः

ई - अव्ययम्, दुःखभावन्, क्रोधः, प्रत्यक्षं, सन्निधिः, सम्बोधनम्। ईः इति पुल्लिङ्गे कंदर्पः, ई इति स्त्रीलिङ्गे लक्ष्मीः दीर्घेकारः चतुर्थस्वरवर्णः,

"ई स्त्री मूर्तिर्महामाया लोलाक्षी वामलोचनम्।

गोविन्दः शेखरः पुष्टिः सुभद्रा रत्नसंज्ञकः।।

विष्णुर्लक्ष्मी प्रहासश्च वाग्विशुद्धः परापरः।

कालोत्तरीयो भेकण्डा रतिश्च पौण्ड्वर्धनः।।

शिवोत्तमः शिवा तुष्टिश्चतुर्थी बिन्दुमालिनी।" इति तन्त्रोक्तवर्णाभिधानम्।

25. भगः

भज्यते अनेनास्मिन् वा इति, भावः। भज् सेवायाम्। स्त्रीचिह्नम्, योनिः, वराङ्गम्, उपस्थः, सारमन्दिरम्, रतिमन्दिरम्, रतिगृहम्, जन्मवर्त्म, अधरं, अवाय्यदेशः, प्रकृतिः, अपथं, स्मरकूपः, अप्रदेशः, कलत्रं, अधः।

ब्रह्मा बृहस्पतिर्विष्णुः सोमसूर्यस्तथाश्विनौ।

भगोथ मित्रावरुणौ वीरं ददतु मे सुतम्।।" इति वाग्भटः। श्रीः, वीर्यम्, इच्छा, ज्ञानम्, वैराग्यम्, कीर्तिः, महात्म्यम्, ऐश्वर्यम्। निष्प्लुर्ष दग्धं पौरुषं भगमैश्वर्यम् च यस्येति टीकायाम्। यत्नः धर्मः, मोक्षः, पुंसां गुदमुष्कमध्यभागः, सौभाग्यं,

"यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यन्तो साध्वसाध्वभिः।

तस्य मत्तस्य नश्यन्ति कीर्तिरायुभगो गतिः।।" इति। भगो भाग्यम् इति तट्टीकायं स्वामि।

26. रेतः

पुंसो रक्तादिपरिपावडजन्यो देहस्थो मज्जाहेतुश्चरमधातुः। यथा - रेतोधाः पुत्रं नयति नरदेव यमक्षयम्" इत्यादौ। रेंतसः उत्पत्तिस्थानं तु मस्तकादि इति भारतीयभिषजां मतम्। रेतसोत्पत्तिस्थानमण्डमेवेति पाश्चात्यभिषजो वदन्ति। रसेश्वरदर्शनज्ञास्तु शिववीर्यस्वरूपः परदरसः इत्याहुः। तदुक्तं रसार्णवे

"मम देहरसोस्तस्मात् रसस्तेनायमुच्यते।" इति।

27. संसारः

दुःखादीनां कारणकार्यभावः। स चानादिः। पूर्वापरकालनियमात्। दुःखादयोहि मिथ्याज्ञानपर्यवसाना अविच्छेदेन वर्तमानः संसार इति। मिथ्याज्ञानादयो दुःखान्ता अविच्छेदेन वर्तमानाः संसारशब्दार्थः। अयं भावः। "धाता यथापूर्वकल्पयत्" इति वेदे खण्डप्रलयस्य प्रसिद्धत्वेन संसारस्य प्रवाहानादित्वं प्रकल्पनीयम्। जन्ममरणप्रबन्धः प्रेत्यभावापरनाम। यथा संसारसागरनिमग्नमनन्तदीनमुद्धर्तुमर्हसि हरे पुरुषोत्तमोऽसि इत्यादौ संसारशब्दस्यार्थः। जन्ममरणप्रवाहः प्रेत्यभावः, स एव पुंसां बन्धलक्षण-। तस्य चाजरंजरीभावः नामान्तरमागमे। संसारित्वं च क्रमेण दुःखोत्पादः। यथा शरीराभिमानिनो जीवस्य संसारित्वम्। (2) मध्वचार्यस्तु भूतबन्धः संसार इत्याहुः। तदुक्तं वाराहे - "भूतबन्धस्तु संसारो मुक्तिस्तेभ्यो विमोचनम्" इति। (3) सांख्यास्तु सूक्ष्म लिङ्गशरीरं पूर्वपूर्वस्थूलशरीरत्यागपूर्वकमभिनवस्थूलशरीरं यदुपादत्ते स संसार इत्याहुः। तदुक्तं - "संसरति निरुपभोगं भावेरधिवासितं लिङ्गम्।" इति। (5) आत्मानं देहेनैकीकृत्य स्वर्गनरकमार्गयोः सरति येन पुरुषः स संसारः। समीत्येकीकरणे। (6) संसारो नामाज्ञानम्। विश्वम्। संगतिः।

28. पौरुषम्

पुरुषस्य तेजः, पुरुषकारः,

"क्लीवा हि दैवमेकं प्रशंसन्ति न पौरुषम्।

दैवं पुरुषकारेण घ्नन्ति शूराः सदोद्यमाः।।" इत्यग्निपुराणम्।

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः देवेन देयमिति कापुरुषा वदन्ति।

दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोष इति हितोपदेशः। पुरुषस्य कर्म। पुरुषस्य भावः।

29. प्रयत्नः

प्रयत्नः संरम्भः उत्साह पर्यायः। स च मनोग्राह्यः निराकारः सविषयकिः आत्मामात्रधर्मश्चेति विज्ञेयम्। प्रयत्नलक्षणं च कृतित्वजातिमत्वम्। (2) प्रयत्नत्वसामान्यवान् उत्साहरूपः। तथा चोक्तम्-

"प्रयत्नस्त्वात्मधर्मः स्यादुत्साहो भावना स च।" इति। स च कृतिरित्युच्यते प्रयत्नव्यवहारासाधारणं कारणम्। यथा पचतीत्यादौ तिबर्थः प्रयत्नव्यवहारश्च अहं यते स यतते इत्यादि व्यवहारः। स त्रिविधाः . प्रवत्तिः, निवृत्ति, जीवनयोनियत्नश्चेति। प्रकारान्तरेण सः प्रयत्नः त्रिविधः जीवनपूर्वकः इच्छाद्वेषपूर्वकश्च। तत्र जीवनपूर्वकः सुप्तस्य प्राणपानसन्तानप्रेरिकः प्रबोधकाले चान्तःकरणस्येन्द्रियान्तरप्राप्तिहेतुः। अस्य जीवनसंज्ञकस्यात्ममनसोः संयोगात् धर्माधर्मापेक्षादुत्पत्तिः। इच्छाद्वेषपूर्वकस्तु हिताहितप्राप्तिपरिहारसमर्थस्य व्यापारस्य हेतुः शरीरविधारकस्च आत्ममनसोः संयोगादिच्छापेक्षाद्वेषापेक्षाद्वा उत्पद्यते। (2)

30. विक्षेपः

निग्रहस्थानम्। कार्यव्यासङ्गात्कथाविच्छेदो विक्षेप। यत्र कर्तव्यं व्यसज्य कथां व्यवच्छिनत्ति इदं मे करणीयं विद्यते तस्मिन्नवसति कथयिष्यामीति। विक्षेपो नाम निग्रहस्थानम्। एकनिग्रहावसानायां कथायां स्वयमेव कथान्तरं प्रतिपद्यते। कार्यव्यासङ्गात् कार्यव्यासङ्गमुद्भाव्य इत्यर्थः। कार्यव्यासङ्गश्च असंभवत्कालान्तरत्वेनारोपितः। तेन तादृशकथाविच्छेदो विक्षेप-। (2) असम्भवत्कालान्तरत्वेनारोपितं कार्यव्यासङ्गमुद्भाब्य कथाविच्छेदः।

"कथामभ्युपगम्यैव तद्विच्छेदाय कस्यचित्।
व्यासज्य वचने प्रहुर्विक्षेपं निग्रहग्रहम्।।"

तदर्थश्च कथामपक्रम्य परिषदि श्रोतुं एकाग्रमनसि प्रतियोगिनि च दत्तावधाने सम्प्रति

मे महत्प्रप्रयोजनमस्ति श्वः परश्व वा कथयिष्यामीति कस्यचिद्व्याजस्य वचने तस्य विक्षेपलक्षणं नाम निग्रहस्थानमाहुराचार्याः। (2) चित्तस्य नवविधोभ्रंशो विक्षेप इति पातञ्जलयोगशास्त्रज्ञः आहुः। (3) मायावादिनस्तु अविद्याशक्तिविशेषः। यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्रभावयति इत्यादावाहुः।

31. अधर्मः

शरीरादिजनकात्मविशेषगुणः। अधर्मो न पत्यक्षः किन्तु अनुमानगंम्यः। तच्चानुमानं देवदत्तस्य शरीरादिकं देवदत्तविंशेषगुणजन्यं कार्यत्वे सति देवदत्तस्य भोगहेतुत्वात् देवदत्तप्रयत्न जन्यवस्तुवत् इति ज्ञेयम्। नरकदुःखादिदुखानां साधनम्। (3) निषिद्धकर्मजन्यः। निषिद्धकर्म चात्रानिष्टसाधनत्वेन वेदबोधितं कर्म। तच्च सुरापानादि। (4) दुःखासाधारणं कारणम्। अधर्म आत्मगुणः कर्तृरहितप्रत्यवायहेतुः आतीन्द्रियः सम्यग्ज्ञानविरोधी।

तस्य तु साधनानि शास्त्रप्रतिषिद्धानि धर्मसाधनविपरीतानि हिंसानृतस्तेयादीनि विहिताकरणं प्रमादश्च। अविदुषो रागद्वेषवतः प्रवर्तकाद्धर्मात्प्रकृष्टात्स्वल्पाधर्मसहितात् ब्रह्मेन्द्रप्रजापतिपितृमनुष्यलोकेषु आशयानुरूपैः इष्टशरीरेन्द्रियविषयसुखादिभिर्योगो भवति। तथा प्रकृष्टादधर्मात् स्वल्पधर्मसहितात्प्रेततिर्यग्योनिस्थानेषु अनिष्टशरीरेन्द्रियविषय दुःखादिभिर्योगो भवति। एवं प्रवृत्तिलक्षणात् धर्मात् अधर्मसहितात् देवमानुषतिर्यङ्नरकेषु पुनः पुनः संसारप्रारब्धो भवति। ज्ञानपूर्वकात्तु कर्मणः कृतादसंकल्पितफलाद्विशुद्धकुले जातस्य दुःखवियोगोपायजिज्ञासामुपगम्योत्पन्नषट्पदार्थतत्वज्ञाननिवृतौ विरक्तस्य रागद्वोषाभावात्तज्जयाः धर्माधर्मयोरनुत्पत्तौ संचितयोपभोगान्निरोधे सन्तोषसुखं शरीरपरिखेदं चोत्पाद्य रागादिनिवृतौ निवृत्तिलक्षणः केवलो धर्मः परमार्थदर्शनजं सुखं कृत्वा निवर्तते। तदा नित्यस्यात्मन शरीरदिनिवृत्तौ बीजभावेन पुनः शरीराद्यनुंत्पत्तौ दग्धेन्धनानलवदुपशमो मोक्ष इति।

32. वेदवाक्यम्

प्रमाणान्तरागोचरार्थप्रतिपादकं वाक्यम्।

अष्टमाध्यायस्य सारः

मायावादिनो दोषधातुमलात्मके देहे वर्तमानं मां "अयं मूढः पुरुषः भ्रान्तः" इति जगतः मिथ्यात्वं स्वीकृतवन्त-। जगत्यस्मिन् दोषधातुमलात्मकं शरीरं मम सौख्यमित्युच्यते। कालकर्मस्वभावान्मे प्रीतिं कुर्वन्तः भूतरूपेण परतःस्थिताः गुणात्मकाः निर्गुणं मां निन्दन्ति। अशुचिभिर्ग्रस्तमस्वस्थं लोकनायकमहं उद्धरिष्यामि। स्वस्थजीवः देवानामाश्रयभूतं शरीरमिति ज्ञेयम्। कर्तुं तदन्यथाकर्तुं शरीरमेव प्रभुः। तत्कर्मसचिवाः देवाः। कर्मणा स्वेन तेजसा च शरीरं शङ्कर इति अवगन्तव्यम्। एवं च देवैराश्रितः स्वस्थः एव शङ्करः। यं सुराः जानन्ति स यज्ञः इत्युच्यते। शरीरेण कृते यज्ञे शरीरं निरावृतम्। देवगणं चावृतम्। तत्र चार्थात्मकेन नामानि सत्यानि च प्रकाशन्ते। आत्मात्मीयभावेन यस्येदं लोकालोकं स्थिरं भवति तस्य स्वसंज्ञितं सुखमात्रं भविष्यति। निःस्वः स्वस्थः धने अभिलाषादनर्थनरकं याति। यदि स्वस्थेन स्वं न कांक्ष्यते तर्हि स्वसंस्थः स स्वराट् भवेत्। मर्त्यामर्त्ययोः परस्परं कार्यकारणत्वसद्भावात्, मर्त्यामर्त्यरूपेण कल्पितयोः लोकजीवयोः योगात् हरिहरात्मकशिवसंज्ञितं मम रूपं प्रकाशितम्।

जीवलोकानुभूतिं मां स्वसाक्षीति कथ्यते। सकलं क्लीं इति ज्ञेयम्। कलया लोकः सृज्यते। ईकारः साक्षित्वेनावलोकितः। तत्र विद्यमानः अनुस्वारः ममानुभूतिः। मद्भावश्चात्र तिरस्कृतः। त्रिकोणं काम मन्दिरं शाक्तिरेव।

सर्वोद्विजाः कामार्थम् मां प्रीणयन्ति। जीवसाक्षितया अजीवोऽहमनित्योऽनङ्गसंज्ञितः। संसाराटविनायकः कामदेवः कर्मणि मां न बाधते। ईकारन्तःश्थं मामेव विजानाति। ई नाम माया, माया च चित्तं, सर्वेषां व्यञ्जनात्मकत्वात् योनित्यभिधीयते। एवं च सर्वयोनिसमुद्भूतंअनादिनिधनात्मकं अज्ञानाख्यमसङ्कल्पं असद्भावमिति मां वदेत्। अहमनादिः। आद्यन्तं तु अपूर्वम् सदित्युच्यते। तच्च मम अन्ते प्रकाशते।

बोद्धः अतीन्द्रिय इति मां मन्यते। अद्वैतवादिनां मते सर्वेषां अद्वयप्रतिबोधनात् सुक्षेत्रे पतितं बीजमेव नानारूपेण विवर्तते। शृङ्गारयोनेः कारणं शृङ्गारं। मम कारणं श्रीरिति जानीयात्। श्रियः कामः प्रवर्तते। श्रीः भूमिरेव। सर्वेषां क्षेत्रत्वात् योनिः भूरिति कीर्तिता। संसारवृक्षबीजं मां काममित्यवधार्यताम्। कामस्य नाशात् सन्मार्गमसद्भविष्यति।

"अभावः" इति तार्किकानां पदार्थमायुर्वेदविशारदैः न स्वीकृतम्। तेषां मते भावे सिद्धे सति अभावः कदाचिन्न संभवति। भावावलोकेन सिद्धमभावस्तु अनर्थपदम्। अनर्थस्य विघातं यत् तत् पौरुषमुच्यते। अरूपत्वादभावस्य रूपं न सम्भवेत्। कार्याणामविचार्यत्वात्कार्याभाव भवति। यथा स्वरूपं रज्जुं तिरस्कृत्यायथारूपं सर्पवदाभाति तदनर्थपदम्।

वेदोऽपि निषेधरूपेणाभाववत्वं प्रकाशयति, न विधिरूपेण वेदवाक्यस्य सत्यत्वात् अभावस्य विपर्ययमेव स्वीकर्तव्यम्।

नवमोऽध्यायः

अज्ञानप्रकरणे नित्यसत्यप्रतिपादनम्

सन्तोऽन्तः प्रविशन्ति स्म सतां संस्मरणाच्च ये।
सन्तापांस्तु न पश्यामि शिवं पश्यामि सर्वतः।। 1
कामं मृत्युं च जितवान् अहंभावाद्विमोचितः।
अर्यशर्मा शिवालोकात् शिवोऽभून्नैव संशयः।। 2
येषां स्मरणमात्रेण आर्यो द्वैताद्विमोचितः।
अनाद्यनन्तं वेदान्तं हृदि धारयति शिवः।। 3
काम एवादि सर्वेषां अन्तो मृत्युश्च भीषणः।
तौ जघान महादेवो वेदो यस्य हृदि स्थितः।। 4
मृत्युकामावुभे यत्र तत्र द्वैतं भविष्यति।
शिवे तु तौ न भवतः तस्मादार्यः शिवः स्मृतः।। 5
सन्मार्गमनसा स्मृत्वा सत्यं मनसि वर्तते।
मनःसत्याद्वचःसत्यं मनोद्भवः वचः स्मृतम्।। 6
मनोवागात्मकं कायं सत्यं सत्यावलम्बनात्।
देहवाङ्मनसां तापो मा भूत् शिवविलोकने।। 7
अस्मद्भावं गता जीवाः युष्मत्वं भवते ददौ।
आयुष्मानिह भूयास्त्वमहंकाराद्विमोचितः।। 8
ये तवायुः प्रदातारः तेषां त्वं परिचारकः।
आयुरन्नं विजानीयाद्यद्भुङ्क्त्वाऽयुः प्रवधते।। 9
जीवप्रसादादायुष्मान् भवानिह विराजते।
आयुर्वेदो च भवति जीवैर्न्यस्तं महात्मभिः।। 10
परमात्मा भवानासीज्जीवभावविमोचितः।
जीवात्मभिः प्रियात् प्राप्तमायुः प्रीत्यै सदास्तु ते।। 11

जीवात्मानं वासुदेवं श्रीभूमिभ्यां समाश्रितम्।
कामदेवं कामजनकं कामारिस्त्वं प्रसादय।। 12

नारायणप्रसादेन आयुष्मानिह भूतले।
भवांश्चरति निर्वेदो निर्गुणो गुणवानिव।। 13

जीवो नारायणो लोको अलोकस्तु भावानभूत्।
लोकालोको यदालम्ब्य वर्तते स परात्परः।। 14

जीवात्मा परमात्मा च यदासाते सुनिर्वृतौ।
तद्वृक्षफलमादत्ते जीवो नैव परो भवान्।। 15

जीवो दाता भवान् भोक्ता स्वामिभृत्य इवोभये।
ऊर्ध्वमूलमधःशाखी संसारतरुरुच्यते।। 16

तस्मादूर्ध्वावलोकेन तन्मूलं स्थिरतां व्रजेत्।
अन्यथाधःपतेन्नूनं संसारो मूलघातकः।। 17

मनोवर्त्मनि वर्तेते खगौ जीवपरात्मनौ।
संसाराख्ये महावृक्षे मुमुदाते समाश्रितौ।। 18

तीक्ष्णविद्याकुठारेण छित्वा संसारपादपम्।
पत्रिणौ तौ निरालम्बौ भिद्येते बोध्यबोधकौ।। 19

गृह्यत्वं युष्मदस्मत्वं मनोवर्त्मनि गृह्यताम्।
गच्छतां च यथासौख्यं तेषां दास्यं न विद्यते।। 20

असौख्यं तदनालम्बान्निश्रेयसमनावृतम्।
संसारं बहुभावत्वाज्जीभावमनावृतम्।। 21

निःश्रेयसमकार्यं स्यात् संसारो नैककार्यकृत्।
उभयं न च सौख्यं स्यात् मध्यमं परमं सुखम्।। 22

निश्रेयसं च संसारमुभयं दृश्यते नरैः।
तस्यानाश्रयता नास्ति नैव भारः प्रपद्यते।। 23

न बन्धो न च मुक्तिस्तत् सर्वदुःखनिवर्तकम्।
महाभारावतरणात् यद्दुःखं तत्सुखं परम्।। 24

वरं शरीरं जानीयात् स्वाभासाभासितं तु तत्।
स्व स्यात्मधर्म इत्युक्तो धर्मो देहमुदाहृतम्।। 25

तस्माद् शरीरमेवाद्यं धर्मसाधनमेव तत्।
साध्यधर्माच्छरीरं तु सत्यं निष्फलमन्यथा।। 26

आत्मीयं तु शरीरं स्यादात्मा धर्म उदाहृतः।
धर्मे संस्थापिते सत्यं शरीरमिति बोध्यताम्।। 27

कार्येण कारणं सिद्धं असिद्धं तदकार्यतः।
अपुत्रो न पिता भूयादकार्यात्कारणं न च।। 28

शरीरं प्रणवं विद्यात् क्षणं प्रतिनवत्वतः।
प्रणवस्यास्पदो यश्च सोप्यदृष्टः परात्परः।। 29

स एव धर्मो भगवान् साध्यो देहेन देहिभिः।
धर्मे सिद्धे तु जीवात्मा जीवन्मुक्तो भवेत्किल।। 30

असत्यकारणं सत्यमसत्यं सत्यकारणम्।
सत्यादसत्यं भवति असत्यं सत्यतो भवेत्।। 31

सत्यं संसारमेवात्र असत्यं मोक्षसंज्ञितम्।
संसारो धर्मसहितो विधर्मो मोक्षसंज्ञितः।। 32

गुणवानेव संसारी मोक्षो निर्गुणसंज्ञितः।
संसारी रूपवान् दृश्यो मोक्षो रूपो विरूपतः।। 33

जननं मरणं चैव संसारो मोक्ष एव च।
अदृष्टः प्रणवार्थत्वात्प्रणवो जीवमोचितः।। 34

आत्मविस्मृतिरेवात्र जननं मरणंत्विति।
चक्षुरेकेन्द्रिये नष्टे अदृश्यं तिमिरं यथा।। 35

आत्मरूपस्य विज्ञानं परमो धर्म उच्यते।
तदेव परमं सौख्यं वासुदेवे शिवेक्षणम्।। 36

नानारूपाण्यनुभवन् प्रणवार्थो जनार्दनः।
स्वविभ्रंशादस्वभावं जीवत्वं प्राप्य मुञ्चति।। 37

मोक्षो स्वरूपविभ्रंशात्पुनर्जन्म प्रपद्यते।
पूर्वज्ञानं तदाभाति जन्मनि ज्ञानरूपिणि।। 38
अज्ञानात्पूर्वसंस्मृत्या जिज्ञासा जायते सदा।
तदा जीवत्वमायाति अन्यथा भगवानसौ।। 39
भगवान् सुखमश्नाति सुभगायाः समाश्रयात्।
अनिषिद्धभगप्राप्त्या भगवान् सुभगाश्रयः।। 40
सौभाग्यं तेन भवति प्रणवार्थस्ततो भवेत्।
स्त्रीणां प्रीतिर्नवे विद्यात् स्त्रीप्रियः प्रणवः स्मृतः।। 41
प्रणवार्था नवात्मत्वात् नानारूपेण भासते।
चञ्चलत्वाच्चसदसन्निमेषवदवस्थितः।। 42
रूपं नवं नवं येषां बुद्धिश्चैव नवं नवम्।
ते सर्वे प्रणवार्थाः स्युः जीवाः नारायणात्मका-।। 43
एते लोकात्मकाः जीवाः सतां प्रीतिकराः सदा।
सन्तो लोकान् समालोक्य प्रीतिं कुर्वन्ति सन्ततम्।। 44
सत्यं लोकं परं असत् अस्मत्वं सत्यमुच्यते।
युष्मत्वं तु परं विद्यादस्मच्छब्दस्य वाहकः।। 45
नास्ति भावं समालम्ब्य अस्मद्भावे तु वर्तते।
अतः प्रवर्तते मृत्युर्नास्ति भावावलम्बनात्।। 46
सत्यस्य सत्यसाक्षी स्यात् स एव च परात्परः।
सत्यं परं च यत्सत्यात् स्वामी भृत्यवदीर्यते।। 47
भृत्यो युष्मदसद्विद्या अस्मत्स्वामी च सत्स्मृतः।
जन्मैव तद्विजानीयादसन्मरण उच्यते।। 48
अस्मत्वं सत् पुरो याति युष्मत्वं पृष्ठतो व्रजेत्।
उत्तमोऽस्मद्विजानीयादधमो युष्मदुच्यते।। 49
अस्मद्भावं सुखं विद्यात् युष्मद्भावमनर्थदम्।
अस्मत्वं विधिरेव स्यात् निषेधो युष्मदेव च।। 50

एवं द्वैतं विजानीयात्परात्परनिरीक्षणात्।
उन्मेषं तु सद्विद्यात् निमेषंचासदुच्यते।। 51
नास्ति भावं समाच्छाद्य नास्तित्वे तिष्ठतां नृणाम्।
सदास्तित्वं समायाति नास्ति भावस्य निह्नवात्।। 52
युष्मत्वे तिष्ठतां नृणां युष्मद्भावं न सम्भवेत्।
अस्मदालोकनान्नित्यमस्मत्ता तत्र जायते।। 53
अस्मदिस्थीयमानानामस्मद्भावे तिरस्कृते।
युष्मदालोकनात्तेषां युष्मत्वं सम्भविष्यति।। 54
आत्मानां तु परं कृत्वा वसतां स्वत्वमेष्यति।
अस्मस्थिताश्च निस्वाः स्युरात्मनोऽतीव निह्नवात्।। 55
एवं च युष्मदस्मत्वं परोक्षं वेददर्शितम्।
सुदुर्गममिदं मार्गं न गच्छेत्कर्मनिन्दकः।। 56
कर्मैवेक्षते सर्वत्र कर्मरूपप्रकाशकम्।
सत्कर्मणा सद्भवति दुष्कर्मणा भवेदसत्।। 57
वेदो यदीक्षते सदा सर्वं सत्यं समीक्षते।
यदा नेक्षते कर्मात्मा तदा सर्वमसद्भवेत्।। 58

इति

अज्ञानप्रकरणे नित्यसत्यप्रतिपादनं नाम नवमोऽध्यायः

नवमध्यायस्य टिप्पणी

1. द्वैतम्

द्विधा इतम् - द्वीतम्। तस्य भावः द्वैतम्। स्वार्थे वा अण्. द्वैतमधिकृत्य यः वादः अस्ति स द्वैतवाद इत्युच्यते। द्वैतमतानि च सांख्य-योग-न्याय-तर्क-पूर्वमीमांसोत्तरमीमांसादर्शनानि ज्ञेयानि। द्वैतमतेषु जगतः सत्यत्वं जीवेश्वरादिभेदपञ्चकं परमात्मनः सर्वोत्तमत्वं स्वातन्त्र्यं च जीवानां तु बहुविधात्वं सायुज्यादिमोक्षश्च प्रतिपाद्यते।

2. वेदान्तः

वेदशिरोभागे ब्रह्मप्रतिपादक उपनिषपो ग्रन्थविशेष-। यथा ऐतरेयब्रह्मवल्लीनारायणईशप्रभृतयः उपनिषदः। वेदान्तः उत्तरमीमांसेद्र व्यवह्रियते। वेदानां त्रयादीनां अन्तश्चरमभाग इति वेदानामन्तो निर्णयो यत्र सः इति वा वेदान्तः अत्रोपनिषदर्थनिर्णायकत्वेन ब्रह्मसूत्राणामपि वेदान्तत्वमुपचर्यते।

3. अस्मद्भावम्

तत्कालीनस्वातन्त्रयोच्चारयितृच्चैत्रादिविशिष्टत्वम्। अत्र स्वातन्त्रयोक्त्या "मद्ववचनात्स राजा" इत्यादौ न मत्पदात्कवेर्बोधः। अत्र स्वातन्त्र्योच्चारणं च वाक्यान्तरस्थक्रियाकर्मतया स्वघटितवाक्यार्थप्रत्यायनेच्छानधनीस्वोच्चारणम्। स्वोच्चारणकर्तृतावच्छेदकधर्मावच्छिन्नः। यथा "अहं गच्छमि" इत्यादौ अस्मदर्थः।

4. युष्मत्वम्

(1)युष्मन्नाम संबोध्यः चेतनः। तत्कालीनसंबोध्यचैत्रत्वमैत्रत्वादिविशिष्टत्वम्। (2) युष्मत्पदस्थले संकेतश्च स्वजन्यबोधवत्वेनाभिप्रायविषयतावच्छेदकावच्छिन्नविषयकत्वस्वजन्यत्वेतदुभयसंबन्धेन युष्मत्पदप्रकारकबोधविषयकोऽभ्युपेयते। तत्र बोधः तादृशोभयसम्बन्धेन युष्मत्पदवान् भवतु इत्याकारकः संकेतो ज्ञेयः। संबोध्यश्चेतनस्त्वं पदार्थ इति शाब्दिकादयः आहुः।

5. आयुर्वेदः

आयुरनेन विन्दति वेत्ति वा आयुर्वेदः।
अष्टादशविद्यान्तर्गतधन्वन्तरिप्रणीतविद्याविशेषः। वैद्यकशास्त्रम्।
तत्वथर्ववेदान्तर्गतम्। तल्लक्षणम् -

"आयुर्हिताहितं व्याधिनिदानं शमनं तथा।
विद्यते यत्र विद्वद्भिः स आयुर्वेद उच्यते।।" इति

6. कामारिः

(1) कामस्यारिः शत्रुः कामारिः। (2) शिवार्थे, प्रसिद्ध-। पुरा तपोनुष्ठानावसरे कामबाणेन लुप्तधैर्यः शिवः तृतीयाक्षिजातेनाग्निना तुं दाहयामास (3) तदाप्रभृति

शिवस्य कामारिः इति संज्ञा अपि लेभे।

7. परः

श्रेष्ठः। न्यायमते द्रव्यगुणकर्मवृत्तिसत्ता। इयं व्यापकजातिः। यथा- "सामान्यं द्विविधं प्रोक्तं पर चापरमेव च।" इति। श्रेष्ठवाचकपरशब्दप्रयागः।

यथा -

"अन्नदातुः शतगुणोऽभीष्टदेवः परः स्मृतः।" इति

"अज्ञानतिमिराच्छन्नं ज्ञानदीपेन चक्षुषा।

यः सेवार्थं दर्शयति तत्परः कोऽपि बान्धवः।।" इति।

8. भोक्ता

(1) भोजनकर्ता। यथा -

"योयज्ञेश्वरो हव्यसमस्तकव्य-

भोक्तव्ययात्मा हरिरीश्वरोऽत्र।" इति। भोक्तुर्लक्षणं च यथा -

"स्नातः सुधैतमृदुसुन्दरशुक्लवासास्तत्कालधौतचरणः सह पुत्रमित्रः।

स्रग्वी प्रसन्नहृदयो रसपाकवेद्यां भोक्ता विशेच्च सततं हि महात्मवेद्यैः।।" इति। (2) सांख्यमते भोक्ता भोगकर्ता पुरुषः। सति भोगज्ञाने भोक्तृज्ञानं भवतीति।

9. स्वामी

स्वमस्यास्ति इति स्वामि। अधिपतिः, ईश्वरः, पतिः, ईशिता, अधिभूः, नायक, नेता, प्रभुः, परिवृढः, अधिपः, अवमतिः, ईशः, आर्यः पालकः। इति" हालयुधे। भर्तरि पत्यौ इति धरणिः। कार्तिकेये इति मेदिनी। राजनि इति अमरः। परिव्राजकोपाधिभेदे इति वाचस्पत्यम्।

10. भृत्यः

दासे। भृत्यपरीक्षा शुक्रनीतिसारे उक्तम्

"भृत्यं परीक्ष्येन्नित्यं विश्वास्यं विश्वसेत्सदा।" इति। भ्रियते इति भृत्यः। अस्य पर्यायान्तरं तु -

"परिकर्मा परिचारः सहायः परिचारकः।

प्रेष्यो भृत्य उपस्थाता सेवकोऽभिधवोऽनुगः।।" इति वैद्यरत्नाकरमालायाम्।

तस्य लक्षणं च यथा-

"भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः।
नियोक्त्व्याः यथार्थेषु त्रिविधेष्वेव कर्मसु।।
भृत्यपरिरक्षणं वक्ष्ये यस्य यस्य हि यो गुणः।
तमिमं सम्प्रवक्ष्यामि यद् यद् कथितानि च।।" इति।

11. निश्रेयः

जन्ममरणप्रबन्धोच्छेदः सर्वदुःखाप्रहाणाम्। निश्रेयसं च शास्त्रश्रवणानन्तरं पदार्थतत्वज्ञानेनात्मसाक्षात्कारानन्तरमप्रारब्दकर्मणां ज्ञानात्प्रारब्धकर्मणां भोगच्च क्षये उत्पद्यत इति बोध्यम्। सूत्रकारेणाप्येतदेव प्रदर्शितम्। तद्यथा - दुःखजप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः। इति अयमाशयः - यदा तु तत्वज्ञानामिथ्याज्ञानपैति तदा मिथ्यज्ञानापाये दुःखमपैति। दुःखापाये च आत्यन्तिकाऽपवर्गो निश्रेयसमिति। केचिदाहुः। द्रव्यादिषण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्वज्ञानं निश्रेयसहेतुः। आत्यन्तिकी दुःखनिवृत्तिः। निश्रेयसमिति केषांचिन्मतम्। एकविंशतिभेदभिन्नस्य दुःखस्य आत्यन्तिकी निवृत्तिः इति।

12. जीवन्मुक्तः

यागजादृष्टजन्यतत्वसाक्षात्कार। इयं चापरिनिश्रेयसमित्युच्यते। जीवन्मुक्तेरूपायास्तु श्रवणमनननिधिध्यासनतत्वज्ञानानि योगाभ्यासादयश्च। तन्त्रोक्तकुलाचारा अपि तदुपायाः। यदुक्तम् - "जीवन्मुक्तावुपायस्तु कुलमार्गो हि नापरः।" इति। यथा शुकजनकादीनां जीवन्मुक्तिः। मायावादिनां मते " जीवन्मुक्तो नाम स्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वरूपाखण्डब्रह्मणि साक्षात्कृते अज्ञानकार्यसंचितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः" इति। अवधारितात्मतत्वस्य नैरन्तर्याभ्यासापहतमिथ्याज्ञानस्य प्रारब्धं कर्मोपभुञ्जानस्य जीवतः सत एव जायमानश्चरमदुःखध्वंसः।

13. संसृतिः

संसार इति शब्दरत्नावली।

प्रवाह इति त्रिकाण्डशेषः।

14. जिज्ञासा

ज्ञातुं इच्छा जिज्ञासा। (1) प्रश्नः। यथा लोके किं बह्निमत् इति प्रश्ने तद्गृहं वह्निमदित्युत्तरिते कुत इति जिज्ञासायां धूमत्वादित्युत्तरं च इत्यादौ। (2) अवान्तरधर्मप्रकारकज्ञानेच्छा। इयं च विशेषजिज्ञासेत्युच्यते। यथा घटे द्रव्यत्वेन ज्ञातेऽपि कोसाविति विशेषतो जिज्ञासा उदेति। (3) विशेषज्ञानगोचरेच्छा। तच्च ज्ञानं स्वनिष्ठं परनिष्ठं वा। तेन जल्पकथायां परं प्रति न प्रश्नानुपपत्तिः। (4) विचारः। यथा "अथातो धर्मजिज्ञासा"। यथा वा "दुःखत्रयाभिघाताज्जिज्ञासा तदवघातके हेतो" इत्यादो जिज्ञासापदार्थः।

15. प्रणवः

अवतीति उ। उक्तं च रामगीतायाम्- "तथापि प्रणवाख्यो यो मन्त्रः सर्वोत्तमोत्तमः। उकाररूपः सर्वेषु वेदेषु प्रतिष्ठितः" इति च। षोडशमात्रायुक्तः प्रणवः।

"अकारं प्रथमप्रोक्तं उकारस्तदनन्तरम्।
मकारश्चार्धमात्रा च नादबिन्दुस्ततः परम्।।
कला ततः कलातीता शान्ति शान्ते परा ततः।
उन्मन्येंकादशी प्रोक्ता द्वादशी तु मनोन्मनी।।
पुरी च मध्यमा पश्चात् पश्यन्ती च परा ततः।
एवं षोडशरूपो यं प्रणवः सूक्ष्ममात्रकः।।" इति रामगीता।

16. निमेषः

लब्धाक्षरसमामात्रा निमेषः परिकीर्तितः। अत्र
सूक्ष्मतरः कालो नोपलभ्यो भृगूत्तम।।
नोपलभ्यो यथा द्रव्यं सुसूक्ष्मं परमाणुतः।
द्वौ निमेषौ त्रुटिः ज्ञेया प्राणौ दशत्रुटिः स्मृतः।।" इति पुरुषार्थचिन्तामणौ उक्तम्।

नवमोऽध्यायस्य सारः

शिवनमस्कारं कृत्वा नवमोऽध्यायः आरभ्यते। नित्यसत्यप्रतिपादनं नामास्मिन्नध्याये द्वैतवादः प्रतिपादितः। तेषां मते पूर्णः नित्यसत्यः पदार्थः परमात्मेति व्यवह्रीयते। ईश्वरस्यानुग्रहेण विना जीवः किमपि कर्म कर्तुं न प्रभवति। अनाद्यनन्ताः वेदाः शिवेन धार्यते। सर्वेषामादिहेतुः कामः अन्तश्च मृत्युर्भवति। शुद्धस्य रागद्वेषादिना योगेन जीवत्वमिति भावः। कामस्य मृत्योश्च सद्भावः एकस्मिन्नेव शिवहृदये वर्तते। तस्मादत्रैकवर्तित्वेनाद्वैतं भविष्यति। मृत्युकामादयः मायावच्छिन्नस्य जीवात्मनः भावविशेषाः, ते च नित्यसत्यात्मके शिवे नैव सम्भवति। तेषां च साङ्गत्यं जीवात्मन्येव सम्भविष्यति। एवं सन्मार्गनुसारिणां मनसि सत्यं प्रकाशते। तथा च मनः सत्यं ज्ञेयम्। निर्मलं चेन्मनः सत्येऽधिष्ठितं भवति। अस्मत्वं नाम अहङ्कारः जीवात्मनि वर्तते। युष्मच्छदः परमात्मवाची च वर्तते। अहङ्कारादि भावनिर्मुक्तः जीवः अस्मद्युष्मद्भावयोः सम्मेलनेनायुष्मान् भविष्यति। अन्नप्रसादेन जीवो आयुष्मान् भवति। जीवभावाद्विमुक्तः "आत्मा" एव परमात्मापदेन व्यवह्रियते। यस्य प्रीत्या अहं भूतलेऽस्मिन् आयुष्मान् भवामि तं श्रीभूमिभ्यां समाश्रितं कामदं कामजनकं कामारिः वासुदेवः प्रार्थ्यते। निर्वेदः निर्गुणोऽपि सगुण इव जीवात्मा विराजते। जीवनारायणरूपौ लोकालोकामवलम्ब्य यः वर्तते सः परात्परः। तत्र च सुनिर्वृतौ जीवात्मपरमात्मनौ आसाते। जीवः दाता परश्च भोक्ता। उर्ध्वमूलमधःशाखमिति संसारतरुरेवोच्यते। तस्मादूर्ध्वावलोकेन संसारवृक्षमूलं स्थिरतरं प्राप्नोति। मनोवर्त्मनि वर्तमानो जीवपररूपौ खगौ संसारवृक्षं समाश्रितौ सन्तो मुमुदाते। विद्याकुठारेण संसारवृक्षस्य छेदनेन च बोध्यबोधकरूपौ जीवात्मपरमात्मरूपौ पत्रिणो निरालम्बौ स्याताम्। तस्मात् अस्मत्वं युष्मत्वं चेति द्वैतभावं विमुच्य गच्छतां सौख्यं स्यात्। तस्यानाश्रयादसौख्यं भविष्यति, आश्रये तु बहुकार्यत्वात्संसारः निश्रेयससाधको न भवति। परात्परमुभयमपि संसारं निश्रेयसं पश्यति। एवं च तस्यानाश्रयता नास्ति। तस्यऽभारो पि न प्रतीयते। तत्र बन्धो नास्ति, न च मुक्तिः। तच्च सर्वदुःखनिवर्तकम्। स्वात्मप्रकाशेन भासितः शरीरं वरं जानीयात्। अत्र तु स्वः आत्मधर्म इत्युक्तः। धर्मी तु देहम्। तस्माद् शरीरमेव धर्मसाधनम्, साध्यं च धर्मः। साध्यधर्मात्साधनभूतः शरीरं सत्यं स्यात्। आत्माधर्मः। आत्मीयं तु शरीरम्। धर्मे स्थापितं यत्सत्यं तच्छरीरमिति ज्ञेयम्। कार्येण कारणं सिद्धम्। अकार्यतः कारणमसिद्धम्।

पुत्ररूपकार्यस्याभावात्पितृरूपकारणस्याप्यभावः। एवमत्र

कार्यकारणयोरन्वयव्यतिरेकव्यत्पिप्रर्दृश्यते।

शरीरस्य पतिक्षणं नवत्वेन तत् प्रणवमित्युच्यते। तस्यास्पदभूतः अदृष्ट परात्परः धर्मः देहेन साध्यः। तादृशधर्मे प्राप्ते सति जीवात्मा जीवन्मुक्तः भविष्यति। सत्यासत्ययो परस्परकार्यकारणवत्वात् सत्यरूपस्य संसारस्यासत्यरूपस्य मोक्षस्य च परस्पराश्रयत्वं वर्तते। किन्तु सगुणनिर्गुणरूपः दृश्यादृश्यरूँपः जननमरणरूपभेदश्च संसारमोक्षयोः प्रतीयदान्ते। जीवन्मुक्तस्य प्रणवार्थः अदृष्टः। जननमरणाद्यवस्थाविशेषाः आत्मविस्मृत्या जायते। प्रत्यक्षज्ञानकरणं चक्षुः। तस्य नष्टे सति अदृश्यं तिमिरं जायते। तथा आत्मविस्मृत्या जननमरणादीनां सम्भवः। आत्मरूपस्य विज्ञानं परमो धर्मः। वासुदेवे शिवे क्षणमेव परमं सौख्यम्। जनार्दनः प्रणवार्थः नानारूपाण्यनुभवन् स्वविभ्रंशज्जीवत्वं प्राप्नोति। पुनर्जन्मेऽपि पूर्वज्ञानं प्रकाशते।

प्रणवार्थः नवात्मत्वान्नानारूपेण भासते। नारायणात्मकाः प्रणवार्थाः जीवाः नवं रूपं नवीना बुद्धिश्च स्वीकृत्यास्मिन् लोके प्रकाशन्ते। एते जीवाः सतां प्रीतिं कुर्वन्ति। सत्यं लोकं, परं च असदित्युच्यते। तथा चास्मत्वं सत्यमित्युच्यते। नास्तिकभावं समालब्यास्मद्भावे वर्तत्वात् मृत्युर्न भवति। एवं च युष्मद्भावः असत्, समानच्चास्मद्भावः। सत् जन्म, असत् मरणं च। अस्मत्वं सत्पुरो याति, युष्मत्वं असत्पृष्ठतो याति। अस्मदुत्तमम्, युष्मत्वं चाधमम्। अस्मद्भावः सुखं विद्यात्। युष्मद्भावमनर्थदम्। अस्मत्वं विधिः, युष्मत्वं निषेधः। एवं परापरनिरीक्षणात् द्वैतम्। सदसद्भावेनोन्मेषणनिमेषणयोः स्थिति-। नास्तिभावस्य निह्नवात् सदा अस्तित्वं स्यात्। युष्मत्वे स्थितं नृणामप्यस्मद्भावावलोकनान्निप्यमस्मत्वं जायते। अस्मदि स्थीयमानास्यास्मद्भावस्य तिरस्करात् युष्मत्वं भविष्यति। एवं च युष्मदस्मत्वं परोक्षवेदं दर्शितम्। सत्कर्मणा सद्भवति, दुष्कर्मणा असद्भवति। वेदः यदेक्षति तदा सर्वं सत्यं समीक्षते। यदा कर्मात्मा न ईक्षति तदा सर्वमसद्भवेत्। अस्मत्वं लोके सत्यमित्युच्यते। युष्मत्वं परं तु असत्। एवं चास्मद्-युष्मद्भावयोः सत्यासत्यरूपेण स्वमि-भृत्यभावेन सदसद्रूपेण च विधिनिषेधरूपेण जननमरणरूपेण उत्तमाधमरूपेण च भेदाः दृश्यन्ते। सत्यनिरीक्षणात् सत्यस्यापि सत्यसाक्षी परात्परः स्यात्।

दशमोध्यायः

अष्टाङ्गहृदयनामनिर्वचनम्

अव्यक्तं त्रिगुणातीतं विकारं यत्र बिम्बितम्।
शुद्धं स्फटिकसङ्काशं परः पश्यति चाव्ययम्।। 1
सन्मात्रं केवलं नित्यमदृष्टं वेददर्पणम्।
परोक्षवादो वेदश्च यमाश्रित्य प्रकाशते।। 2
अव्यक्तं तु यदाश्रित्य इच्छया भासते बहिः।
तमदृष्टं परो वेत्ति इच्छामपि च पश्यति।। 3
ईकारः कामबीजं स्यात्तच्छायेच्छेति कथ्यते।
तदाद्यन्तं विजानाति जीवदासः परोऽव्ययः।। 4
वेदच्छाया महामाया अव्यक्तापि महेश्वरे।
बिम्बिता लोकरूपेण प्रतिलोमप्रकाशिनी।। 5
बाह्यप्रसारितामिच्छां छायारूपां मनोरमाम्।
सुखात्मिकां न लभते बहिरन्वेषणात्पुमान्।। 6
सर्वतः परिपूर्णत्वादनन्तत्वान्महेश्वरः।
स्वाङ्गेषु बिम्बितां वाणींस्वविभ्रंशाद्विचिन्वते।। 7
आयुष्मन्तः परात्मानो वन्दिनः परमेशितुः।
बोधयन्ति महादेवं निर्मलं प्रणवस्थितम्।। 8
जीवो महेश्वरः साक्षान्निर्मलो भक्तवत्सलः।
मलात्मास्पृष्टवर्त्मा च तद्भृत्यो रूपवान् भवेत्।। 9
अहङ्कारविमूढात्मा साक्षी सदसत्परः।
युष्मद्भावेन पूर्णात्मा परमात्मा च तत्परः।। 10
अनादित्वान्निर्गुणत्वात् प्रमा यस्य न विद्यते।
अनाधारः स्वमाधारं कल्पितुं हृदयं कृतम्।। 11
भूमिरापोऽनिलो वायुः खं मनोबुद्धिरेव च।
अहङ्कारेण चैवाष्टभूतरूपी बभूव सः।। 12

एतच्छ्री भगवद्रूपमष्टमूर्तेः सदात्मनः
तदेव वेदं कर्माख्यं ब्राहमबीजं स्वदर्शनम्।। 13
तदेव पौरुषं प्राहुः तां तनुं प्रकृतिं विदुः।
संसाररूपं तच्चैव नारायण इति श्रुतः।। 14
नानारूपस्य बीजत्वात्कवयः तत्वदर्शिनः।
स्वेच्छारूपानुरूपेणानन्तं कल्पयन्ति च।। 15
यदेच्छा हृदयाज्जातं अनादेः स्वादिकल्पितुम्।
तदा संसारमभवदनादित्वं तिरस्कृतम्।। 16
अष्टाङ्गं मम हृद्भूतमिति निश्चित्य वाहटः।
अष्टाङ्गहृदयं नाम स्वसन्तानं समेधते।। 17
वाहो गोवृषभः प्रोक्तस्तस्मिन्नटति यः पुमान्।
वेदान्तः स महादेवो वेदार्थो वाहटः स्मृतः।। 18
यावत्स्वरूपं जानाति कर्तव्यं कर्म तावता।
ईशस्वरूपसिध्यर्थं कर्मज्ञानात्मकं कृतम्।। 19
तदेव ब्रह्म जानीयात् बोध्यबोधं यतो भवेत्।
तदाद्यं द्वैतमित्युक्तं स्वबोधादन्तमेष्यति।। 20
अनाद्यनन्तं स्वं रूपं वेदान्तेन प्रपद्यते।
ज्ञातृज्ञेयोभये नष्टे सम्पूर्णः स्यात्स्वबोधतः।। 21
स्वशब्दः परमार्थे स्यात् सर्वनाम्ना तदुच्यते।
स्वत्वं नो सर्वनाम्नि स्यात् परमार्थविपर्यये।। 22
अहङ्कारः शून्यवाची सर्वार्थानां विघातकः।
अतोऽनर्थमिति प्राह अस्मत्ता सर्वदेहिनाम्।। 23
अस्मद्भावं त्वासुरं स्याद्युष्मद्भावं तु दैविकम्।
तस्माद्युष्मत्वमालम्ब्य वर्तनं वः सुखं भवेत्।। 24
अस्मद्भावप्रवृत्तानामनर्थाप्तिर्भवेद्ध्रुवम्।
अवृत्तिर्व्याधिशोकानामास्पदं स्यादहङ्कृतिः।। 25
युष्मत्वं परमात्मत्वं अस्मत्वं जीवसंज्ञितम्।

जीवो दुःखैकरूपः स्यात्परमात्मा सुखीः स्मृतः।। 26
परार्थं ये च जीवन्ति ते विन्दन्ति सुखं सदा।
परानुवृत्तिधर्म स्यादिति शास्त्रैः सुनिश्चितः।। 27
सर्ववर्णाश्रमाणां तु या विद्या वृत्तिकारिणी।
परेषां प्रीतिकृत् सा स्यात् पुरुषार्थस्तया भवेत्।। 28
पारम्पर्यक्रमप्राप्ता परमार्थप्रकाशिनी।
जन्मना सह सम्प्राप्ता कुलविद्या सती प्रिया।। 29
यया कुलस्य पुष्टिः स्यात् सैव कान्ता पतिव्रता।
तदा सार्द्ध निवसतां पुष्टिस्तुष्टिश्च सम्भवेत्।। 30
परकार्यरतानां तु परमार्थावलोकनात्।
क्षणं प्रति नवा प्रीतिः प्रणवास्पदतो भवेत्।। 31
अस्मद्भावप्रसक्तानां परमार्थस्य निह्नवात्।
दुःखं प्रतिदिनं याति प्रणवास्पदतः ध्रुवम्।। 32

इति
अष्टाङ्गहृदयनामनिर्वचनं नाम
दशमोऽध्यायः

दशमाध्यायस्य टिप्पणी

1. शुद्धः

शुद्धत्वधर्मविशिष्टः शुद्धः (1) शुद्धत्वं चेतरधर्मानाक्रान्तत्वम्। यथा शुद्धपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितशुद्धसंयोगसम्बन्धावच्छिन्नशुद्धवह्नित्वावच्छिन्नविधेयतानुमिति प्रति इत्यादौ पर्वत्वादेः शुद्धत्वम्। अयमाशयः, पर्वतो बह्मिमान् धूमादित्यादौ समानाधिकरण्यसम्बन्धेन सौन्दर्यविशिष्टपर्वततत्वमपेक्ष्य केवलपर्वततत्वस्य शुद्धत्वम्। सौन्दर्यविशिष्टपर्वततत्वं तु न शुद्धम्। (2) शुद्धियुतम्।

2. स्फटिकम्

सूर्यकान्तमणिरिति हलायुधः। स्वनामख्यातिमणिः इति हलायुधः। फटिक् इति भाषा। तत्पर्यायः स्फटिकम्, स्फाटिकम् इति शब्दरत्नावलिः। भासुरः स्फाटिकोपलः,

शालिपिष्टम्, धोतशीलमिति त्रिकाण्डशेषः। अस्य गुणादि यथा -

"स्फटिकः समवीर्यश्च पित्तदाहार्तिदोषनुत्।
तस्याक्षमालां जपतां द-ते कोटिगुणं फलम्।।" इति।

3. अव्ययम्

यस्य व्ययं नास्ति तदेवाव्ययम् (1) संकेतसम्बन्धेन अव्ययपदवत् यथा स्वः इत्याद्यव्ययम्। (2)

"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु समासेषु यन्न व्येति तदव्ययम्।।" इति शाब्दिकाः आहुः इति न्यायकोषः। शब्दवत्तिधर्मविशेषो, यया स्वरादयो व्यया सर्वत्रैकरूपाः। शिवे, विष्णौ च। आद्यन्तरहिते, विकारशून्ये, परब्रह्मणि। सर्वदा स्थिते च, "अश्वत्थं प्राहुरव्ययम्" इति गीता। "मनसावयवैः सूक्ष्मं संभूतकृदव्ययम्। सूक्ष्माभ्यो मूर्तिमात्राभ्यो संभवत्यव्ययादव्ययम्" इति मनुः। अव्ययफलदे च "भूराद्यास्तिस्र एवैताः महाव्याहृतयोऽव्यया-।" "अव्ययः पुरुषः साक्षी" इति विष्णुसहस्रनामे।

4. दर्पणम्

दर्पयति सन्दीपयतीति। रूपदर्शनाधार, मुकुरः, आदर्शः, आत्मदर्शः, प्रतिबिम्बतम्,

"यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति।।" इति चाणक्ये।

5. अहिः

समभिव्याहृतपदार्थावच्छेदकानधिकरणतत्सन्निहितदेयाः तत्स्थं वस्तु च। यथा ग्रामाद्बहिरित्यादौ। अत्र वहिर्योगे पञ्चमीसमासविधानसामर्थ्यात् तद्योगे पञ्चमी। बहिष्टवं च नियतमवध्याकाङ्क्षम् इति स पञ्चम्यर्थः।

6. छाया

छ्यति डिनत्ति सूर्यादेः प्रकाशं नाशयतीत्यर्थः। रौद्रशून्यम्। तत्पर्यायःभावानुगा, श्यामा, अतेजः, भीरु, अनातपः, आभीतिः, आतपाभावः, भावालीना चेति। मधुरत्वम्, शीतलत्वम्, दाहश्रमहरत्वं चास्याः गुणाः। प्रतिबिम्बितम्। सूर्यपत्नि, कान्तिः। सच्छोभा, पङ्क्तिः इति मेदिनी। कात्यायनी इति शब्दरत्नावली। तम इति हेमचन्द्रः। सादृश्यम्

यथा "पुत्रच्छाया पुत्रसादृश्यम्" इति दत्तकचन्द्रिका।

7. दासः

दीयते स्मै स्वामिना सर्वं यथाभिलषितमिति दासः। दासप्रभेदाः मिताक्षरायामुक्तम् यथा-

"गृहजातस्तथा क्रीतो लब्धो दायादुपागतः।
अनाकालभृतस्त्वद्वदाहितः स्वामिना च यः।।
मोक्षितो महतश्चर्णाद्युद्धप्राप्तः पणे जितः।
तवाहमित्युपगत प्रव्रज्यावासितः कृतः।।
भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदशाः स्मृताः।।" इति।

8. प्रतिलोमः

प्रतिगतं लोम आनुकूल्यं यस्मादिति। वाम इति हेमचन्द्रः। यथा हरिवंशे -

"तावुभावप्यसंस्कार्याविति धर्मो व्यवसितिः।
वैगुण्यमात्मनः पूर्व उत्तरः प्रतिलोमतः" इति मानवे।

9. मनोरमा

गोरोचना इति राजनिघण्टुः। बुद्धिशालिविशेषः। तत्पर्यायःतारा, महाश्रीः, स्वाहा, श्रीः, तारिणी, जया, अनन्ता, सिवा इति त्रिकाण्डशेषः। इन्दीवराख्यविद्याधरस्य कन्या। छन्दोविशेषः। सप्तसरस्वतीनामैकतमा च। यथा महाभारते -

"सुप्रभा काञ्चनाक्षी च विशाला च मनोरमा।
सरस्वती बोधवती सुरेणुर्विमलोदका।।" इति।

10. निर्मलम्

निर्गतं मलमस्मादिति निर्मलम्। अभ्रकम्। मलहीने इति मेदिनी। यथा महाभारते - "निर्मलस्वादुसलिल मनोहारि सुशीतलम्" इति। निष्पापे। यथा मनुः-

राजनिर्दूतदण्डस्तु कृत्वा पापनि मानवाः।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा।।" इति।

11. भक्तः

यस्य भक्तिरस्ति स भक्तः। भक्तिर्नामाराध्यत्वप्रकारकं ज्ञानम्। यथा भक्त्या हरिमुपासते इत्यादौ। यथा वा भक्तिर्ज्ञानाय कल्पते इत्यादौ।

निरतिशयानन्दप्रियान्यप्रयोजनसकलेतरवैतृष्ण्यवज्ज्ञाविशेषो भक्तिः इति रामानुजीयाः आहुः। परे तु सा परानुरक्तिरीश्वरे। यथा रस ह्येवायं लब्धवानन्दी भवति इत्यादौ रसो भक्तिः। यथा वा ब्रह्मसंस्थो मृतत्वमेति इत्यादौ संस्थापदवाच्या भक्तिरित्याहुः। अत्र रसशब्दवाच्यं संस्थाशब्दवाच्यं च भगवदपरोक्षज्ञानमेव। भक्तिश्च द्विविधा साधनीभूता फलीभूता चेति। अत्र साधनीभूता भक्तिर्ज्ञानाय कल्पते-

"वासुदेवे भगवति भक्तियोगः प्रयोजितः।

जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकम्।।" इत्यादौ। फलभूता तु

"स वै पुंसां परो धर्मो यतो भक्तिरधोक्षणे।

अहेतुक्यव्यवहिता ययात्मा संप्रसीदति।।" इत्यादौ। सुखानुशायी रागः भक्तिरिति शण्डिल्यसूत्रटिकाकृताः आहुः। माहात्म्यज्ञानपूर्वः सुदृढः स्नेहो भक्तिरिति पञ्चारात्रागमकुशलाः आहुः। सेयं भक्तिस्त्रिधा। सा च उत्तमा भक्तिः साधना भावः प्रेमा चेति त्रिधोदिता इति।

"अनन्यसमता विष्णौ ममता प्रसंगता।

भक्तिरित्युच्यते भीष्मप्रह्लादोद्दवनारदैः।।" इति नारदपञ्जरात्रे उक्तम्। भक्तिरपि ब्रह्मविद्यायामधिकारे उपयुज्यते। यमैवेष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्।" भक्तिपदस्य रचना इत्यर्थोऽपि विद्यते। यथा भवति विरलभक्तिर्म्लानपुष्पोपहारः इति। भाग इति काव्यज्ञाः आहुः।

12. अनादित्वम्

उत्पत्तिशून्यम्। स्वथा प्रागभावस्यनादित्वम्। सजातीयप्रयोगपूर्वकत्वम्। यथा शब्दस्यानादित्वमिति शब्दिकाः आहुः।

13. प्रमा

(1) यथार्थविज्ञानं प्रमा। सा च द्रव्यादिविषयं ज्ञानम्। तद्वति तत्प्रकारकं ज्ञानं प्रमाज्ञानं प्रमा। (2) तत्वानुभवः। (3) यत्र यदस्ति तत्र सत्यानुभवः। तद्वति तत्प्रकारकोऽनुभवो वा। फलितार्थस्तु तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकताशाल्यनुभवः इति। निर्विकल्पकज्ञानं तु प्रमा अप्रमा एतदूबहिर्भूतमेव। व्यवहारानङ्गत्वात्। (4) यथार्थानुभवः। (5) विषयताश्रयवृत्यप्रकारकानुभवः। (6) यत्प्रकारिका या विषयता

तत्प्रकारसमानाधिकरणविषयताकः स्वप्रकारसमानाधिकरणविषयताको वा अनुभवः। अत्र प्रकारपदं धर्मपरम्। वृत्तीद्धो बोधः प्रमा मायावादिनो वदन्ति। अनधिगतस्य वस्तुनो वधारणमिति सांख्याः आहुः। पुरुषनिष्ठबोधः प्रमा इति पातञ्जलाः आहुः। न्यायनये प्रमा द्विविधा नित्या अनित्या चेति। तत्र नित्या भगवतः। अनित्या जीवस्य।

14. प्रकृतिः

स्वेतरशब्दार्थविशेषितस्य यादृशस्वार्थस्यान्वयबोधं प्रति स्वाव्यवहितोत्तरत्वसंसर्गेण यादृशशब्दवत्तया निश्चय एव हेतुः तादृशस्तथाविधार्थे प्रकृतिः। (2) पाणिनिप्रभृतयः प्रातिपदिकं प्रकृतिरित्याहुः। (3) मीमांसकास्तु यत्र समग्राङ्गोपदेशः सा प्रकृतिः। यथा दर्शपूर्णमासादिरूपप्रधानयागः प्रकृतिः इत्याहुः। अयमर्थः - यत्र कर्तव्यं सर्वं प्रकर्षेण कर्मान्तरनैरपेक्ष्येणोपदिश्यते सा प्रकृतिरिति। मूलप्रकृतिः अवान्तरप्रकृतिश्चेति प्रकृतेर्द्वैविध्यमस्ति। (4) सत्वरजस्तमसां साम्यावस्था प्रकृतिः। अयं भावः - प्रकृतेः कार्यं महत्तत्वम्। महतश्च कार्योऽहङ्कारः। अहङ्कारस्य कार्यद्वयं - तन्मात्राणां कार्याणि च पञ्चस्थूलभूतानि। पुरुषस्तु कार्यकारणविलक्षणः इति। एतन्मते प्रकृतित्वं च तत्वान्तरोपादनत्वम्। (5) माया अविद्या चेति द्विविधभेदभिन्ना प्रकृतिः इति शांकराः अद्वैतवेदान्तिनो मन्यन्ते। (6) जडात्मको भगवदंशविशेषः इति वल्लभाः आहुः। (7) लक्ष्मीरपीति श्रीमध्वाचार्यमतानुयायिनः प्राहुः। एतन्मते च प्रकृतिर्द्विधा चित्प्रकृति जडप्रकृतिश्च। तत्र आद्या लक्ष्मीः द्वितीया तु मृत्पाषाणादिस्थावरात्मकं सर्वं जगदिति विज्ञेयम्। लक्ष्मीपदेन भगवदिच्छा संगृह्यते। (8) शरीरावस्था इति भिषजो वदन्ति। (9) शाक्तास्तु प्रकृत्यंशदेवीपंचकरूपशक्तिविशेषः इत्याहुः। अत्र ब्रह्मसूत्रं उ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधात् उ इति। प्रकृतिः प्रकृष्टकरणात्। अत्र प्रकृतिशब्देन समवायिकारणं ग्राह्यं इत्यद्वैतिनो मायावादिनो मन्यन्ते। (10) नव्यशाब्दिकाः नागोजिभट्टादयस्तु अर्थावबोधहेतुः प्रत्ययविधानावधिभूतः शब्दविशेष इत्याहुः। अत्र च प्रकरोति प्रत्ययं बोधं चेति प्रकृतिशब्दो योगरूढः इति वाचस्पत्यम्।

15. कवयः

कविशब्दस्य प्रथमाबहुवचनम्। कवते सर्वं जानाति, सर्वं वर्णयति, सर्वं सर्वतो गच्छति वा। कवते श्लोकान् ग्रथते वर्णयति वा, पण्डितः। सूर्यः, काव्यकरः,

"मन्दः कवियशःप्रार्थि गमिष्याम्युपहास्यताम्" इति कालिदासः। कवति शब्दायते इति वा कवि-। "वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः" इति महाभारते।

16. अनन्तम्

नास्ति अन्तः सीमा विनाशो वा यस्य तत् अनन्तम्। अन्तरहितः, अनवधि, अशेषः। असीमः इत्यमरे मेदिनी च। यथा कुमारसम्भवे -

"अनन्तरत्नप्रभस्य यस्य" - इत्यादौ।

17. परमार्थः

परमः श्रेष्ठः अर्थः। उत्कृष्टवस्तु। यथार्थः। यथा-

"प्रपंचो यदि वर्तेत निवर्तेत न संशयः।

मायामात्रमिदं द्वैतमद्वैतं परमार्थतः।।" इति माण्डूक्यवार्तिकम्। परमः सुखः अर्थः प्रयोजनमिति विग्रहे। मोक्षः। सुखम्। सुखभोगः दुःखाभावः" इति न्यायदर्शनम्।

18. विपर्ययः

अप्रमा। मिथ्याज्ञानापरपर्यायः (1) अयथार्थनिश्चयः अत्र अयथार्थज्ञानमेव नास्तीति प्रभाकरादयः आहुः। (2) वेदान्तिनस्तु विपरीतनिश्चयः। "विपरीतत्वं च पुरोवर्तिन्यविद्याविद्यमानप्रकारत्वम्। विपरीतनिश्चयश्च प्रत्यक्षानुमानागमाभासेभ्यो जायते। तत्र प्रत्यक्षाभासजो यथा शुक्तिकायामिदं रजतमित्यादि। अनुमानाभासजो यथा धूलीपटले धूमभ्रमाद्वहन्यभाववति वह्न्यानुमिति। आगामाभासजो यथा नदीतीरे पंचफलानि सन्ति इति प्रतारकवाक्यजन्यज्ञानं इत्याहुः। प्रतीतं रजतं देशान्तरे सदेवेति वैशेषिकाः आहुः। ज्ञानस्वरूपमेवेति विज्ञानवादिनः आहुः। (3) तत्रैव तात्कालिकमुत्पन्नं सदिति भास्कराः आहूः। (4) न सत् नासत् न सदसत् किन्तु अनिर्वचनीयमेवेति मायावादिनो मन्यन्ते। श्रीमदानन्दतीर्थाचार्यस्तु असदेव रजतं प्रत्यभादित्युत्तरकालीनानुभवात् शुक्तिरेवात्यन्तासद्रजतात्मना द्रष्टुर्दोषवशात् प्रतिभातीत्याहुः। (5) संशयः (6) विपरीतम्। यथा "विपर्ययोऽभूत्सकलं जलौकसः"।

19. आसुरम्

असुरस्य भावः। यथा गीतायाम् -

"न मां दुष्कृतिनो मूढाः प्रपद्यनते नराधमाः।

मायायापहृतज्ञाना आसुरं भावमाश्रिताः।।"

20. दैविकम्

देवानुद्दिश्य क्रियते यत् तत् दैविकमित्युच्यते।

21. व्याधिः

दोषजन्यवैषम्यनिमित्तो ज्वरादिः।

22. कान्ता

काम्यते असौ इति कान्ता। नारी। यथा शृङ्गारतिलके -

"झटिति प्रविश गेहं मावहिस्तिष्ठ कान्ते।

ग्रहणसमयवेला वर्तते शीतरश्मेः" इति। प्रियङ्गुवृक्षः। इति मेदिनी। सर्वाङ्गसुन्दरी इत्यमरः। गङ्गा यथा, काशिखण्डे -

"कूटस्था करुणा कान्ता कूर्मयाना कलावती।" इति। बृहदेला, रेणुका, नागरमुस्ता इति राजनिघण्टुः।

23. पतिव्रता

पतिव्रतमिव धर्मर्थकामेषु कायवाक्मनोभिः सदोपास्यो स्याः। स्वाम्यनुरक्ता। तत्पर्यायः - सुचरित्रा, साध्वी, सती इत्यमरः। एकपत्नीति शब्दरत्नावली। तस्याः लक्षणं यथा -

"आर्तार्तेमुदिता हृष्टे प्रेषिते मलिना कृशा।

मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता।।" इति शुद्धितत्वम्।

24. पुष्टिः

पोषणम्। वृद्धिरिति मेदिनि। यथा मार्कण्डेये -

"वैदिकैर्वारणैर्मन्त्रैः प्रजानां पुष्टिहेतुकैः।" इति। अश्वगन्धा इति राजनिघण्टु। षोडशमातृकान्तर्गतदेवताविशेषः इति श्राद्धतत्वम्। गणपतेः पत्नी। खट्टाविशेषः।

25. तुष्टिः

तोषा। यथा मनुस्मृतौ -

"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्धि।

आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।" इति। अधिगतार्थादन्यत्र तुच्छत्वबुद्धिः

इति चण्डीटीकायां नागोजिभट्टः। सा च नवविधेति सांख्याचार्याः। इयमेव पुराणमते दक्षस्य प्रजापतेः कन्या। धर्मस्य पत्नी च। मातृकाविशेषः इति भवदेवभट्ट्। शक्तिविशेष इति देवीभागवते।

दशमध्यायस्य सारः

सत्वरजस्तमोगुणातीतं शुद्धस्फटिकसङ्काशंमव्ययं सर्वोपाधिमुक्तं निर्विशेषचिन्मात्रं सदद्वैतानन्दमयं तं परब्रह्मं सत्यज्ञानमनन्तसर्वज्ञताद्युपेतं मायोपाधिकं परमात्मा पश्यति। यामाश्रित्य अव्यक्तः ब्रह्म इच्छया बहिः भासते तामपि सः अवलोक्ता यति। एवं परमात्माप्रकाशेन प्रकाशितं शरीरं श्रेष्ठं भवति। आत्मा धर्मः, धर्मी तु देहम्। एवमात्मविशिष्टं शरीरं आद्यं धर्मसाधनमित्युच्यते। साध्यभूतस्य धर्मस्याभावे शरीरं निष्फलं स्यात्। यथा पुत्ररूपकार्यस्याभावे पितृरूपकारणस्याज्ञानं न जायते।

क्षणं प्रति नवत्वेन शरीरं "प्रणव" इति उच्यते। तस्यास्पदभूतः अदृष्टः परात्परः धर्मः भगवानेव देहिभिः देहेन साध्य-। तादृशधर्मे भागवते प्राप्ते सति जीवात्मा जीवन्मुक्तः भाविष्यति। सत्यासत्ययोः परस्परकारणकार्यभावत्वात् सत्यरूपसंसारस्यासत्यरूपमोक्षस्य च परस्पराश्रयत्वं वर्तते। किन्तु सगुणनिर्गुण, रूपारूप, दृश्यादृश्य-जननमरणरूपः भेदः संसारमोक्षयोः प्रतीयते। यथा प्रत्यक्ष ज्ञानकरणे चक्षुरिन्द्रिये नष्टे सत्यदृश्यं तिमिरं भवति तथा जननमरणादीनं सम्भव। आत्मज्ञानं परमो धर्मः। वासुदेवे शिवेक्षणें परमं सौख्यं च। प्रणवार्थः जनार्दनः स्वभावं परित्यज्य जीवत्वं प्राप्य नानारूपाणि स्वीकरोति। एवं नारायणात्मकाः जीवाः नवं नवं रूपं नवं नवं बुद्धिश्च स्वीकृत्य अस्मिन् लोके प्रकाशन्ते। एते लोकात्मकाः जीवाः सर्वदा सतां प्रीतिं कुर्वन्ति।

एकादशोऽध्यायः

अज्ञानप्रकरणे सत्स्तोत्रम्

कुलविद्या च यद्भार्या वोधो यस्य सुतः स्मृतः
सोऽप्यार्यशर्मा जयति विवेको यत्सखा स्मृतः। 1

विद्वांसं च जलं चैव प्रकृतिं विकृतिं सदा।
आयुष्मान् हृदये स्थाप्य जीवन्मुक्तो विराजते।। 2

अदृष्टं यं जनः प्राह सर्वसम्पद्प्रदायकम्।
सोऽपि भिक्षार्थमटते अतिथीरूपमास्थितः।। 3

यश्च मूढतमो लोके यश्च बुद्धेः परं गतः।
तावुभो सुखमेधेते क्लिश्यत्यन्तरितो जनः।। 4

इदमाह महायोगी व्यासः सत्यवतीसुतः।
तस्मात्सुखं भगवतो रूपमित्यवधार्यताम्।। 5

लोके ये ये च दीव्यन्ते ते ते देवा इति श्रुताः।
यद्यत्पश्यति तान् सर्वान् चक्षुर्वेद इति श्रुतः।। 6

अतो वेदेषु गोशब्दः देवाः ब्राह्मण एव च।
वेदान् देवान् च यो रक्षेत् सैव साक्षीति विश्रुतः।। 7

देवाश्चापि च दृश्यानि चक्षुरेव स गोर्भवेत्।
यत्रैते राजते स्पष्टं सोऽपि राजा विराजते।। 8

राजा द्रष्टा च तच्चक्षुः वेदो दृश्याश्च देवता।
द्रष्टा च दर्शनं दृश्यं त्रिसर्गज्ञानमीदृशम्।। 9

अग्निर्वेदत्रयावासः प्रकाशस्यावलम्बनात्।
एवं चतुर्विधो वेदस्तज्ज्ञानं यज्ञमुच्यते।। 10

ज्ञानानुभवमङ्गं स्यादिति बुद्धः प्रबोधितः।
पञ्चवेदात्परं प्राप्तः स एव च परात्परः।। 11

परस्त्वनुभवो विद्यात् चतुर्वेदोपरि स्थितः।
सच्चिदानन्दनित्यं तत्सतां सेव्यं हरेः पदम्।। 12
तत्परोऽनुभवातीतः षष्ठमाधारमाश्रितः।
आद्यन्तकाममृत्युभ्यां वियुक्तो वेदमूर्द्धगः।। 13
वेदोपरि स्थितोऽप्येवं मर्त्यानां सोऽश्नुते फलम्।
अस्तित्वाद्वास्तवं विद्यात् तापाभावाच्च मङ्गलम्।। 14
अहंभावविनिर्मुक्ताः केवलानुभवात्मक।
आत्मरक्षाविनिर्मुक्ताः प्राणिनस्तु शिवात्मकाः।। 15
ये च स्थावरतां प्राप्ताः जीवानामुपकारकाः।
नानागुल्मलतौषध्यः ताः सर्वाः शिवमूर्तयः।। 16
योग्यानि यानि लोकेऽस्मिन् मङ्गलान्येव सन्तु वः।
यानि जीवानुभूत्यर्थं भूतानि भुवनानि च।। 17
भोक्तारस्त्वात्मभावस्थाः आत्मरक्षासमुत्सुकाः।
नानाजीवात्मकाः वेदाः युष्मत्वारोपिता शिवे।। 18
अतोन्नाद्याभिलाषेणअसम्पूर्णजगत्रये।
चरन्ति लोलुपा नित्यं शिवाख्यं स्वं विलोकितम्।। 19
भवन्तो यं समासाद्य लभन्ते निर्वृतिं पराम्।
पुनर्दुःखं न जानन्ति तदेव शिवमुच्यते।। 20
वेदः शिवार्थं चरति तत्संचारं तु संसृतिः।
नित्यं तु शिवमासाद्य मुमुदे कृतकेतरः।। 21
यत्र यत्राटते वेदः तत्र तत्र शिवेक्षणम्।
सर्वत्र शिवमालोक्य वेदः संसारमत्यगात्।। 22
तदा वेदान्तमभवत् वेदे संसारमुझिते।
निर्वेदत्वाच्छिवः शिष्टो नानावेदस्तिरोदधे।। 23
शिवान्तं स व्रजेद्वैद्यो स वेदान्तं प्रपद्यते।
अनन्तेऽपि च वेदान्ते आयुष्मानवशिष्यते।। 24

[1]अनन्तवेदाः विचरन्ति दिक्षु शिवान्तमालोकयितुं कदाचित्।
तदा शिवान्तो न बभूव तत्र वेदान्तमेव प्रकटीचकार।। 25
वेदान्तस्तु शिवो भूयात् शिवान्तो वेदमुच्यते।
अनन्तत्वाच्छिवो वेदे लीयते न विनश्यति।। 26
वेदस्त्वादिरनन्तः स्यात् तस्माद्वेदो द्विजे बभौ।
अनाद्यनन्तस्तु शिवो संस्कारस्तत् नो भवेत्।। 27
जन्मनैव द्विजो भूयात्क्षीरभुक्तिस्तदा भवेत्।
द्विजत्वं कर्मणा भूयात् ततो वेदसमुद्भवः।। 28
आहाराद्यैर्यथा प्राणी पुष्टिं समधिगच्छति।
तदा धर्मादिभिः पुष्टिं द्विजो याति न संशयः।। 29
आहारादिविनाशेन यथा प्राणी प्रणश्यति।
तथा धर्मादिनाशेन द्विजो नाशं प्रपद्यते।। 30
अन्नपानं यथा जीवे सन्ध्यानिष्ठं यथा द्विजे।
अन्नाद्यैर्वर्धते प्राणि धर्माद्यैर्वधते द्विजः।। 31
वेदानुष्ठाननिरतः शिवभावं प्रपद्यते।
तस्माद्वेदः शिवान्तः स्यात् शिवभावप्रबोधनात्।। 32
शिवधर्मरतो नित्यं वेदभावं प्रपद्यते।
तस्माच्छिवस्तु वेदान्तो वेदभावप्रबोधनात्।। 33
वेदान्तस्तु शिवः प्रोक्तः शिवो वेदशिरः स्मृतः
शिवान्तो वद एव स्यात् वेदः शिवशिरः स्मृतः।। 34
शिवो वेदं वहत्येव वेदो वहति च शिवम्।
शिवो गोवृषमारूढः द्विजराजकलाधरः।। 35
वेदान्ते च शिवान्ते च प्रायो मुह्यन्ति सूरयः।
नै व मुह्यति चायुष्मान् युष्मास्वस्मत्प्रयोजनात्।। 36
येषां युष्मदि चात्मत्वं युष्मत्वं चात्मनीक्षितुम्।
शक्तिः प्रवर्तते तेषामायुष्मत्ता भविष्यति।। 37

---

[1]छन्दो भङ्गः

नारायणस्य भोग्यं तु आत्मानमिति कथ्यताम्।
भोक्ता नारायणादन्यः कदाचिन्न भविष्यति।। 38
शिवं तु भोग्यं जानीयात् भोक्ता वेदो जनार्दनः।
नारायणस्तु वेदाख्यो शिवं भुंजीथ सर्वथा।। 39
आत्मा भोक्तारमाकम्बेत् भोग्यत्वात् परमात्मनः।
भोक्ता परमालम्बेत् भोक्तुकामो जनार्दनः।। 40
ईश्वरो मर्त्यरूपेण षड्वर्गमिह भुनक्ति।
सन्तो वेदं समालम्ब्य भुंजन्ति परमीश्वरम्।। 41
सन्तो वेदं समाश्रित्य चतुराश्रमवासिनः।
धर्मार्थकाममोक्षांश्च भक्षयन्त्यमितौजसः।। 42
भुंजन्ति पुरुषर्थान् वेदारूढाः महाजनाः।
परोक्षं भगवद्रूपं प्रकाशेन प्रतिष्ठितम्।। 43
सजनेश्वरयोर्भेदः सुव्यक्त इह बोध्यते।
द्वैतमीश्वरसम्भूतमनाद्यन्तं तु चंचलम्।। 44
कैवल्यं सज्जनात्प्राप्यमाद्यनन्तं सदा स्थिरम्।
भोगभोग्यस्वरूपेण ईश्वरस्तूभयात्मकः।। 45
तद्भोक्ता सज्जनस्त्वेव भोगः भोग्यसमुद्भवः।
श्रिया च कर्म भगवान् तत्कर्ता सज्जनः स्मृतः।। 46
बोध्यो बोधश्च भगवान् बोद्धा सज्जन एव च।
भगवान् दर्शनं दृश्यं द्रष्टा तत्र तु सज्जनः।। 47
ज्ञानं ज्ञेयं च भगवान् तज्ज्ञाता सज्जनः स्मृतः।
छन्दांसि देवताः एव सज्जनस्त्वृषिरुच्यते।। 48
असुराश्चैव देवाश्च भगवान् सज्जनो मुनिः।
भूतं भव्यं च भगवान् वर्तमानं तु सज्जनः।। 49
जीवात्मा परमात्मा च भगवान् सज्जनो वपुः।
आद्यन्तं भगवानेव मध्यं सज्जन एव च।। 50

अनादिनिधनं देव आद्यनन्तस्तु सज्जनः।
अत्युत्कृष्टोतिनीचश्च भगवान् सज्जनोन्तरम्।। 51
सुखं दुःखं च भगवान् स्वधर्मः सज्जनः स्मृतः।
बन्धो मुक्तश्च भगवान् स्थितिः सज्जन एव च।। 52
भावाभावो च भगवान् सज्जनो भाव एव च।
सन्मार्गालोकनादद्य दुर्मार्गाच्च विमोचितः।। 53
वर्णाश्रमेभ्यो निर्मुक्तः आर्यो नीचोच्चतां जहौ।
न जन्म न मुक्तिश्चैव न वाग्मित्वं न मूढता।। 54
न जीवो न शवश्चैव स्त्रीभावो न च षण्डता।
न रागो न च वैराग्यो न बन्धो मुक्तिरेव च।। 55
एते बाधां न कुर्वन्ति जीवन्मुक्तस्य देहिनः।
जन्मादिद्वैतमरप्येवं जीवन्मुक्तं न बाधते।। 56
सोऽपीक्षते सदाद्वैतं तेन लोपो न सम्भवेत्।
अयथार्थस्तु जीवात्मा परमात्मा निरर्थकः।। 57
अवेद्यो भगवान् तस्मात् वेद्योऽर्थः सज्जनः स्मृतः।
अनर्थत्वान्निरर्थत्वादवाच्यो भगवान् परः।। 58
सतां प्रभावाद्भगवान् शिवदः शिवसज्ञितः।
तस्मादभेदेन यज्येत भवता भगवान् शिव।। 59
अन्यथाविपरीतं स्यादनर्थप्रतिपादकम्।
भगवन्तं शिवं कर्तुं वर्तते सज्जनः सदा।। 60
सज्जनो वेद एव स्यात् सद्भावो येन सिद्ध्यतिं।
वेदविद्भ्यश्च वेदेभ्यो वेदाङ्गेभ्यो नमोऽस्तु वः।। 61
वेदोक्ताचारचारिभ्यो सद्भ्यो नित्यं नमो नमः।।

इति
अज्ञानप्रकरणे सत्स्तोत्रं नाम
एकादशोऽध्यायः

एकादशाश्यास्य टिप्पणी

1. कुलविद्या

"आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम्।

निष्ठावृत्तियो दानं नवधा कुललक्षणम्।।" इति शिष्टोक्तिः। कुलागता विद्या कुलविद्या। यथा वेद्यकुटुम्बजातानां वैद्यवृत्तिः।

2. भार्या

भरणीया इति। वेदविधानेनोढा, विधिपूर्पकविवाहिता, पत्नी, पाणिगृहीति, द्वितीया, सहधर्मिणी, जाया, दाराः, धर्मचारिणी, दारः, कलत्रं, कलत्रकम् इति हलायुधकोशः।

"सा भार्या या गृहे दक्षा सा भार्या या प्रियंवदा।

सा भार्या या पतिप्राणा सा भार्या या पतिव्रता।।" इति गारुडे।

3. सूतः

सूयते स्म इति, पुत्र इत्यमरः। पुतो नरकभेदात् त्रायत इति पुत्रः।

"पुनाम्नो नरकभेदात् पितरं त्रायते पुत्रः।

तस्मात्पुत्र इति ख्यातः स्वयमेव स्वयंभुवा।।" इति स्मृतिः। किं वा पुनाति मातापितराविति पुत्रः। "पुत्रो हितकारः एकतकारश्च" इति अमरटीकायां भरतः। मातृपितृस्वभाववत् स्वभावं सुतकन्ये भवतः।

"शीलं संभजते पुत्रो मातुस्तातस्य वै सुता।

यथा शीला भवेन्माता तथा शीलो भवेत्सुतः।।" इति वह्निपुराणे। पार्थिव इति मेदिनी।

4. विकृतिः

(1) विकारः (2) विकार्यम् (3) मीमासकास्तु यत्र सर्वाङ्गोपदेशः स विकृति इति। स्वरविशेषः इति गायकाः आहुः।

5. भिक्षा

याचनम्। भक्षणीयमन्नम्। यथा "भिक्षां देहि त्वमतिथिभ्यो" - इत्यादि। अत्र भिक्षाशब्दस्य भक्षणीय इत्यर्थः। अत्र भिक्षाशब्दः कर्मसाधनमिति बोध्यम्।

6. अतिथिः

अतनति सातत्येन गच्छति, न तिष्ठति इति। अज्ञातपूर्वकगृहागतव्यक्तिः, आगन्तुः, आगन्तुकः, आवेशिकः, गृहागतः, आवेशिकी, अभ्यागतः, प्राघूर्णिकः, इति हलायुधकोशः।

"यस्य न ज्ञायते नाम न च गोत्रम्।

अकस्मात्गृहमायाति साऽतिथिः प्रोच्यते बुधैः।।" इति। कुशपुत्रः, कोपः।

7. योगी

योगः अस्यास्तीति योगी। यज् समाधौ। योगः युक्तः। तस्य लक्षणादि यथा -

"स्वर्गे लोष्टेऽरण्ये सुस्निग्धे चन्दने तथा।

समता भावना यस्य स योगी परिकीर्तितः।।" इति। अपि च

"आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।

सुखं वा यदि वा दुःखं योगी परगतो मतः।।" इति।

8. व्यासः

(1) सत्यवत्यां पराशराज्जातः श्रीनारायणस्य सप्तदशोवतारविशेषः। यथा "व्यासो नारायणः साक्षात्" इत्यादौ व्यासशब्दस्यार्थः। स चोत्सन्नशाखं प्रणष्टं च वेदं संकलितवान् अष्टादशपुरणनाम। ब्रह्मसूत्राणां च कर्ता इति विज्ञेयम्। तदुकंम् - "अष्टादशपुराणानां कर्ता सत्यवतीसुतः।" इति। भागवते चोक्तम् -

"ततः सप्तदशो जातः सत्यवत्यां पराशरात्।

चक्रे वेदतरोः शाखां दृष्ट्वा पुंसोऽल्पमेधसः।।" इति। (2) ततोऽन्यो मुनिविशेषः। तत्रोक्तम् - "प्रह्लादनारदपराशरपुण्डरीकव्यासाम्बरीषशुशौनकभीष्मदालभ्यान्" इति। (3) मानविंशेषः। इति शब्दरत्नावली। (4) विस्तार इत्यमरः। यथा समासव्यासयोगतः इत्यादौ। (5) वैयाकरणस्तु समासादिसमानार्थकं विग्रहवाक्यम्। यथा राज्ञः पुरुषः इति व्यासवाक्यम् इत्यादौ व्यासशब्दस्यार्थः। पदानां समासाभावः इत्यप्याहुः। (6) पौराणिकास्तु पुराणपाठको विप्र इत्याहुः। तदुक्तम् - "य एवं वाच्येद्विप्रः स ब्रह्मन्

व्यास उच्यते।" इति।

9: गोः

(1) गच्छतीति गौः। यद्वा गच्छत्यनेनेति गौ। वृषस्य यानसाधनत्वाम् स्त्रीगव्यादानेन स्वर्गगमनसाधनत्वाच्चोभयोरपि दानेन स्वर्गगमनत्वाद्वा तथात्वम्। वस्तुतस्त्वयं रूढ एव शब्दः। तदुक्तम् -

"रूढा गवादयः प्रोक्ताः योगिकाः पाचकादयः।

योगारूढाश्च विज्ञेयः पङ्गजाद्या मनीषिभि-।।" इति। (2) अध्यायः (3) गोर्मङ्गलत्वादि यथा देवलः-

"लोकेस्मिन् मंगलान्यष्टौ ब्रह्मणो गौहुताशनः।

हिरण्यं सर्पिरादित्यः आपो राजा तथाष्टमः।।"

"अभिप्रेतार्थसिद्धमंगलं तद्धेतुतया ब्राह्मणादपि।" इति। (4) गम्यते कर्मिभिः यज्ञदानपरोपकारादिधर्ममूलककर्मफलैः इति स्वर्गरूपार्थे। (5) गम्यते पुण्यवद्भिः ईर्ष्यापुर्तादिसकामकर्मभिः पुण्यवताश्चन्द्रलोकगमनात् चन्द्रः" इति विश्वः। (6) गच्छति प्राप्नोति विश्वप्रकाशात्मेन स्वतेजसि जानातीति सूर्यः।

10. अग्निः

अङ्गयन्ति अङ्घ्यगं जन्म इति व्युत्पत्या हविः प्रक्षेपदिकरणेषु गार्हपत्या हवनीयदक्षिणाग्निसभ्यावसत्थौपासनाख्येषु षडग्नि। यद्वा अट्याति ऊर्ध्वं गच्छतीति। अगि गतौ। तेजः पदार्यविशेषः। धर्मस्य वसुभार्यायां जातः प्रथमः अग्निः अस्य पर्यायः - वैश्वानरः, वह्निः, वीतिहोत्रः, हिरण्यरेताः, विभावसुः।

"अग्नेर्दुर्दर्षता ज्योतिस्तापः पाकः प्रकाशनम्।

शोको रोगो लघुस्तैक्ष्ण्यं सततश्चोर्ध्वभासिता।।" इति मोक्षधर्मः। वैद्यमते अग्निस्त्रिधा - भौमः, दिव्यः, उदर्यः इति। तत्राद्यः काष्ठेन्धनप्रभवः ऊर्ध्वज्वलनप्रभावपचनस्वेदादिसमर्थश्च। द्वितीयश्च उदकेन्धनः पक्वज्वलनशीलः बाडवः तृतीयः उभयेन्धनः भुक्तस्याहारस्य रसादिपरिणामनिमित्तं च विद्युदादिश्चइति विजयरक्षितोपरिसन्देह भञ्जिका।

11. सच्चिदानन्दः

सच्चासौ चिच्चासौ आनन्दश्चेति सच्चिदानन्दः। नित्यज्ञानसुखस्वरूपं ब्रह्म।

यथा-

"अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न शोकभाक्।

सच्चिदानन्दस्वरूपोऽहं नित्यमुक्तस्वभावान्।।" इति। साकारदेवविशेषणे। यथा - "मुकुन्दं सच्चिदानन्दं प्रणिपत्य महीपते।" इत्यादि मुग्धबोधव्याकरणम्।

12. वियुक्तः

वियोगविशिष्टः। विपूर्वकयुज्धातोः क्तप्रत्ययेन निष्पन्नः। यथा देविभागवते -

"किं करोमि क्व गच्छामि मृता मे प्राणवल्लभा।

न वै जीवितुमिच्छामि वियुक्तः प्रिययानया।।" इति।

13. मंगलम्

मङ्गति हितार्थं सर्पति, दुरदृष्टमनेनास्माद्वेति। भावुकं, भवं, कल्याणम्, भविकं, शुबं, क्षेमं, प्रशस्तं, भद्रं, श्वः, श्रेयसं, शिवं, अरिष्टं, कुशलं, रिष्टं, शस्तम् इति हलायुधकोशः। "मंगलाय च लोकानां क्षेमाय च भवाय च।" इति बागवते। कल्याणं, मंगलं, क्षेमं, शातं, श्रम, शिवः, शुभम् इति वैद्यकरत्नमालायाम्।

14. प्राणिनः

प्राणि इति शब्दस्य प्रथमाबहुवचनम्। प्राणाः सन्त्यस्योति। प्राणविशिष्टः मनुष्यादि। चेतनः, शरीरी,

"कर्मत्मान च देवानां सोऽसृजत्प्राणिनां प्रभुः।

सान्ध्यानां च गणं सूक्ष्मं यज्ञं चैव सनातनम्।।" इति मनुः।

15. उपकारकः

उपकृतिः "उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः" इति माघः। "कृतापकारेव रतिर्बभूव" इति कुमारसम्भवः। विकीर्णपुष्पादिः इति हेमचन्द्रो मेदिनी च।

16. निर्वृतिः

सुस्थितः। अस्तङ्गमगम्, सुखमिति मेदिनि। यथा देवीभागवते -

"जनकस्य दशां दृष्ट्वा राज्यस्थस्य महात्मनः।

स निर्वृतिं परां प्राप्य पितुराश्रमसंस्थितः।।" इति। मोक्षः, मृत्युः, इति हेमचन्द्रः। शान्ति, यथा सुश्रुते -

"भूतेजोवारिजैर्द्रव्यैः शमं याति समीरणः।

भूम्यम्बुवायुजैः पित्तं क्षिप्रमाप्नोति निर्वृतिम्।।" इति। विदर्भवंशीयवृष्णोः पुत्रः। यथा भागवते-

17. संसृतिः

(1) संसार इति शब्दरत्नावली। यथा भागवते -

"आपन्नसंसृतिं घोरां यन्नाम विवशो गुणान्।

ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम्।।" इति। (2) प्रवाह इति त्रिकाण्डशेषः।

18. कृतकेतरः

कृतकादितरो नास्ति यस्य सः कृतकेतरः कृतार्थ इत्यर्थः। अदृष्टकार्यसिद्धया धन्योऽहमित्यर्थः।

19. निर्वेदः

(1) स्वावमाननम् इति हेमचन्द्रः। यथा-

"दैवार्युद्धं कृतं चोयं प्रह्लादस्तु पराजितः।

निर्वेदं परमं प्राप्तो ज्ञात्वा धर्मं सनातनम्।।" इति। स तु त्रयत्रिंशद्व्यभिचारिभावानामादिमः। शान्तरसस्य स्थयिभावश्च। (2) परवैराग्यम्। यथा -

"ततः कदाचिन्निर्वेदान्निराकारश्रितेन च।

लोकतन्त्रं परित्यक्तं दुःखार्तेन भृशं मया।।" इति मोक्षधर्मः।

(3) वैराग्यम्। यथा श्रीमद्भागवद्गीतायाम्-

"तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च।" इति। निर्गतो वेदो यस्मादिति। वेदरहिते।

20. रिष्टः

(1) शान्तः (2) सुबुद्धिः (3) धीरः। तस्य लक्षणं च -

"न पाणिपादचपलो न नेत्रचपलो मुनिः।

न च वागङ्गचपल इति शिष्टस्य लक्षणम्।।" इति।

यथा वा - "धर्मो नाभिगतो यैस्तु वेदः सपरिबृंहणः।

ते शिष्टाः ब्रह्मणाः प्रोक्ताः नित्यमात्मगुणान्विताः।।" इति।

अन्यच्च, "विशेषशब्दनिष्ठस्तु शेषः शिष्टः प्रचक्षते।

मन्वन्तरेषु ये शिष्टाः इह तिष्ठन्ति धार्मिकाः।।

तिष्ठन्तीह च धर्मार्थं तान् शिष्टान् परिचक्षते।

तैः शिष्टैः पालितो धर्मः स्थाप्यते वै युगे युगे।।" इति। (4) अवशिष्टः ; यथा "यज्ञशिष्टमृतभुजो यान्ति ब्रह्म सनातनम्।" इति।

21. सूरयः

(1) सूरिरितीकारन्तपदस्य प्रथनाबहुवचनम्। सूते सद्वाक्यानीति सूरिः। पण्डितः इत्यमर-। यथा भागवते-

"जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वरात्

तेने ब्रह्महृदा य आदिकवये मुह्यन्ति यत्सूरयः।" इति। (2) यादवः, सूर्यः इत्युणादिकोशः।

22. अन्यः

असदृश इति मेदिनी। परः "चातकतापशरण्यो जलधरभिन्नो भवेत्कोन्यः।" इति नीतिमाला।

"सोऽयमन्येन वेगादुद्यमेन द्विरदपतिना सन्निपत्याभियुक्तः।" इति उत्तररामचरिते। तत्पर्यायः - (1) भिन्नः (2) अन्यतरः (3) एकः (4) इतरः इत्यमरः। विलक्षण इति जटाधरः। एकतरः नोम इति शब्दरत्नावली।

23. कैवल्यम्

(1) केवलस्य भावः कैवल्यम्। आत्यन्तिकदुःखविगतरूपे मुक्तिभेदे। तत्स्वरूपसत्वादिकारणानि। तत्वकौमुदीदर्शितानि यथा -

"पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च।

कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृवश्च" इति सांख्यकारिका। (2) कैवल्यं केवलभावः। स च अनुभूयमानस्य बुद्धिधर्मस्य दुःखत्रयस्य विनाश एव। एवं तदर्थं तदुद्देशेन पुरुषस्य प्रकृत्यपेक्षा। तथा हि इष्टविषयेच्छया इव साधनस्य प्रवर्तमानो दृष्टः। पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपाप्रतिष्ठाचितिशक्तिः इति

योगिनः आहुः। पुरुषस्य निर्लोपस्य कैवल्येनावस्थानम् कैवल्यम्। अद्वितीयब्रह्माभावापत्तिरिति मायावादिनः। (3) एकत्वम्।

24. ऋषिः

(1) ऋषति प्राप्नोति सर्वान् मन्त्रान् ज्ञानेन, पश्यति संसारपारं वा इति ऋषिः। ज्ञानसंसारयोः पारंगतः। शास्त्रकृदाचार्यः।

"अग्निः पूर्वोभिऋषिभिरीडयो नुतनैरुत।

स देवा एह वक्ष्यति" इति ऋग्वेदे।" सप्तब्रह्मर्षिदेवर्षिमहर्षिपरमर्षयः। काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमावराः।।" इति रत्नकोशे। (2) वेदः (3) किरणः।

25. वपुः

उप्यन्ते देहान्तरभोगसाधनबीजभूतानि कर्माणि इति वपुः। शरीरम्, यथा - "एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्चः।" इति रघुवंशे। (2) प्रशस्ताकृतिः (3) अंशः, यथा -

"अष्टानां लोकपालानां वपुर्धारयते नृपः।" इति मनुः। "वपुस्तेजोंशः" इति तट्टीकायां मेधातिथिः।

26. उत्कृष्टः

उत्कर्षविशिष्टम्। अतिशययुक्तम्। प्रकृष्टम्, प्रशस्तम्। यथा -

"उत्कृष्टमध्यमनिकृष्टजनेषु मैत्री यद्वत् शिलासु सिकतेषु जलेषु रेखा।

वैरं क्रमादधममध्यमसज्जनेषु यद्वत् शिलासु सिकतेषु जलेषु रेखा।।" इत्युद्भटः।

27. नीचः

(1) निकृष्टामीं लक्ष्मीं शोभां चिनोति इति नीचः। (2) हीनजातिकर्म। (3) वर्वरः (4) विवर्णः (5) पामरः (6) प्राकृतः (7) पृथग्जनः (8) विहीनः (9) अपसदः (10) जल्म (11) हीनः।

"बुद्धिश्च हीयते पुंसां नीचैः सह समागमात्।

मध्यमे मध्यतां याति श्रेष्ठतां याति चोत्तमे।।" इति पद्मपुराणे।

"लीचरोमनखश्मश्रुर्निमलाड्घ्रिमलायनः।" इति वाग्भटः। निम्नः,

"शौत्यं नामुणस्तवैव सहजः स्वाभाविकी स्वच्छता

किं कुर्म कथयन्ति भवन्ति शुचयः स्पर्शेन यस्यापरे।
किं चान्यत्कथयामि ते स्तुतिपदं त्वं जीविनां जीवनं
त्वं चेन्नीचपथेन गछसि पयः कस्त्वां निरोद्धुं क्षमः।।" इति लक्षणसेनः।

28. षण्डता

षण्डस्य भावः षण्डता। शाम्यति शिश्नाभावादिति षण्डः। शम् धातुः। शमेर्दः इति दप्रत्ययेन साधु। (1) नपुंसकः (2) वलीबम् (3) वर्षधरः।

29. वैराग्यम्

(1) दोषशमनाद्विषयत्यापेच्छा। (2) भोगानभिषङ्गः (3) योगशास्त्रज्ञाः तु दृष्टनुश्रविकविषयवितृष्णस्य वशीकारंज्ञां वैराग्यम्। ऐहिकपारत्रिकविषयादौ दोषदर्शनान्निरभिलषस्य ममैते विषयाः वश्याः नाहमेतेषां वश्य इति विमर्श इत्याहुः। वैराग्यं च तत्वज्ञानाद्विषयदोषदर्शनाच्च भवति। तच्च वैराग्यं शमदमानन्तरं ज्ञानद्वारा मोक्षहेतुश्च भवति।

30. अयथार्थाः

विरोधे। यथार्थभिन्ने मिथ्याभूते। यथा अयथार्नुभवः। स च तदभाववति तत्प्रकारकं ज्ञानम्। तच्च त्रिविधम् - संशयभ्रमापरोपरूपतर्कभेदात्। तेषां सर्वेषां तदभाववति तत्प्रकारकज्ञानरूपत्वात् तथात्वम्।

31. अवाच्यः

अनिन्दितः इति स्मृतिः। अवक्तव्य-। वचनानर्हः। यथा -
"अनक्षरमवाच्यं तु वचनानर्हं न यद्भवेत्।
एष वन्ध्यासुतो याति शपुष्पकृतशेखरः।।
मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः।" इति शब्दरत्नावली।

32. प्रभावः

(1) शक्तिः,
"प्रभावतो यथा धात्री लकुचस्य रसादिभिः।
समापि कुरुते दोषत्रितयस्य विनाशनम्।।
क्वचित्तु केवलं द्रव्यं कर्म कुर्यात्प्रभावतः।" इति। कोषदण्डजतेजः, प्रतापम्,

"कोषो धनम्, दण्डो, दमं, तद्वेतुत्वात् सैन्यमपि दण्डः।
ताभ्यां यत्तेजो जायते स प्रतापः प्रभावश्च कथ्यते।।" इति भरतः। (2) तेजः। यथा-

"अद्य मे स्वप्रभावस्य प्रभावः प्रभविष्यति।
राजश्चाप्रभुताकर्तुं प्रभुत्वं च तव प्रभो।।" इति रामायणे। शान्तिः, प्रभागर्भजातः सूर्यपुत्रः "प्रभा प्रभावं सुषुवे" इति मात्स्ये। कलाक्त्यां जातः स्वरोचिषो मनोः पुत्रविशेषः,

"ततश्च जज्ञिरे तस्य त्रयः पुत्राः स्वरोचिषः।
विजयो मेरुनन्द्रश्च प्रभावश्च महाबलाः।।" इति मार्कण्डेये।

33. वेदाङ्गानि

वेदस्याङ्गानि वेदाङ्गानि। "शिक्षकल्पो व्याकरणं निरुक्तं छन्द्रसो चयः। ज्योतिषमयनं चैव वेदाङ्गानि षडेवतु।।" इत्युक्तेषु शिक्षादिषु षड्सु शास्त्रेषु तेषामङ्गविशेषरूपत्वं शिक्षायामुक्तम्। तद्यथा -

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषमयनं चक्षुर्निरुवतं श्रोत्रमुच्यते।।
शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।" इति।

34. आचारः

(1) व्यवहारः, चरितं, चरित्रं, चरणं, वृत्तं, शीलमिति हलायुधकोशः। विचारः,

"आचारेणावसन्नोऽपि पुनर्लेखयते यति।
साऽभिधेयो जितः पूर्वं प्राङ्न्यायस्तु स उच्यते।।" इति व्यवहारतत्वम्। (2) प्रवृत्तिविषयत्वम्। यथा तथैव शिष्टाचारात् इत्यादौ। सदाचारलक्षणनितीम्।

"विद्वेषरागरहिता अनुतिष्ठन्ति यं द्विजः।
विद्वांसस्तं सदाचारं धर्ममूलं विदुर्बुधाः।।" इति। (3) क्रिया (4) कृतिः - यथा अलौकिकाविगीतशिष्टाचारविषयत्वम्" इत्यादौ। गुरुक्तस्यार्थस्याङ्गीकरणमाचार इति योगाचारबौद्धाः वदन्ति।

एकादशाध्यायस्य सारः

सत्स्तोत्रम् नामास्मिन्नध्याये सतां गुणकीर्तनं क्रियते कविना। समदर्शी जीवन्मुक्तः चराचरं सर्वं हृदये स्थापयित्वा मुमुदे। सर्वसम्पत्प्रदायकं परं ब्रह्म एव अतिथिरूपमास्थितं सत् संसारे अटति। यथा अतिथिः किंचित्समयं आतिथेयगृहं स्थित्वा स्वगृहं प्रतिगच्छति तथा परमात्मा अपि विचरति। लोकेऽस्मिन् धीमन्तः अधिकविज्ञानेन सुखमधिगच्छन्ति। अतिमूढाश्च केवलेनाज्ञानेनावृताः सन्तः सुखं यान्ति। मध्ये वर्तमानाः जनाः क्लिश्यन्ति च लोके ये ये दीव्यन्ति ते ते देवाः। यं यं पश्यति तं तं चक्षुषा विन्दति। तदेव प्रत्यक्षं नाम। अतः वेदेषु गोपदस्य देवार्थे ब्राह्मणार्थे च प्रसिद्धिः। एवं सर्वेषां दृष्ट-दर्शन-दृश्यभेदानां साक्षिभूतं, वेदचतुष्टयाद्भिन्नम्, अनुभवरूपादपि परं यत्तदेव सच्चिदानन्दं नित्यं सद्भिः सेव्यमानं श्रीहरिपदम्। वेदातीतं तत्पदं तु अनुभवातीतं षष्ठंमाधारं कृत्वा अनाद्यनन्तः काममृत्युवियुक्तः सन् विराजते। तादृशः परात् परः प्रातिभासिकसत्यरूपेण संसारे प्रकाशते। सांख्याः सत्पदार्थवादिनः परिणामवादिनश्च भवन्ति। तेषां मते असत्पदार्थस्योत्पत्तिः सत्पदार्थस्य विनाशो वा न सम्भवति। अजड-जडभेदरूपे पदार्थविभागे जडरूपप्रकृतिः पुरुषार्थसिद्ध्यर्थं प्राणिनामुपकारार्थं जगद्रूपेण परिणमते। भोक्ता पुरुषः, प्रकृतिश्च भोग्य। तयोः समञ्जससम्मेलनेन प्रपञ्चोत्पत्तिः। अतः अहंभावविनिर्मुक्ताः केवलानुभवात्मकाः जीवानामुपकारकाः स्थावररूपाः सर्वाः लतौषधध्यः शिवमूर्तयः भवन्ति। आत्मरक्षासमुत्सुकाः आत्मभावस्थाः भोक्तारः। शिवे युष्मत्वारोपिताः नानाजीवात्मकाः वेदा। "यद्यत्पश्यति तत्तत् चक्षुर्वेदः इति श्रुतः" इति पूर्वोक्तपद्यानुसारेण अत्र वेदपदस्य लक्षणावृत्या संसार इत्यर्थः। शिवे युष्मत्वारोपात् सांसारिकत्वम्। शिवस्य परिणामरूपोऽयं प्रपंचः। यं विलोक्य निर्वृतिं परां ते लभन्ते। तादृश्यां निर्वाणावस्थायां पुनः दुःखं ते न जानन्ति। सा अवस्थैव शिवमित्युच्यते। वेदः शिवार्थं चरति। तस्य संचारविलासः संसृतिः। यथा प्राणी आहारादिभिः पुष्टिं प्रपद्यते तथा धर्मादिभिः द्विजोऽपि पुंष्टिं प्राप्नोति। प्राणिनां केवलं शारीरमेव प्रधानम्। द्विजानां तु कर्मप्रधान्यत्वात् नित्यनैमित्तिककर्मणां प्राधान्यम्। वेदानुष्ठाननिरतः पुरुषः शिवभावं प्रपद्यते। शिवधर्मरतो तु वेदभावं प्रपद्यते। तस्मात् वेदन्त एव शिवः, शिवः वेदस्य शिर। "शिवः वेदं वहति, वेदश्च शिवं वहति"

इत्यादिना शिववेदयोः परस्परापेक्षा विधीयते। ये च युष्मदस्मद्भावयोः ऐक्यं जानन्ति ते आयुष्मन्तः भविष्यन्ति। परमात्मा वेदानां शिर इति प्रसिद्धः। अत एव वेदः शिवान्तः। तस्माद्वेदानामध्ययनेन शिवपदमुपलभ्य पण्डिताः कृतार्थाः भवन्ति। आत्मा भोक्ता, भोक्तुकामः जनार्दनः। मर्त्यरूपं प्राप्य ईश्वरः रागादिषड्वर्गाननुभवति। सज्जनानां तु वेदमार्गानुसारेण धर्मार्थकाममोक्षरूपपुरुषार्थफलप्राप्तिर्भविष्यति। भोगभोग्यस्वरूपः ईस्वरः उभायात्मकः भवति। भोक्ता च नारायणः। ईश्वरः ऐश्वर्येण युक्तः कर्माधिकारी च विराजते। सज्जनरूपो जीवस्तु कर्तृत्वाभिमाने शिवशतां चानुभवति। एवं ज्ञानं ज्ञेयं च ईश्वररूपमेव चेत्तस्य ज्ञाता जीवो भवितुमर्हति। मन्त्राणां छन्दांसि देवताश्च ईश्वरभावमाप्नुवन्ति। मन्त्रद्रष्टा ऋषिस्तु जीवत्वेन परिकल्प्यते। देवाश्चासुराश्च परस्परविरोधिनः द्वन्द्वभावेन ईश्वरे एव विराजते। सज्जनः यो जीवः स मुनिरिति विज्ञाप्यते। सज्जनानां शरीरमेव परमात्मनः प्रवृत्तिपात्रं भवति। आदिश्च अन्तश्च प्रपञ्चस्येश्वरः एव। व्यक्तं यन्मध्यं तज्जीव इति च जानीमः। ईश्वरं अनादिनिधनमिति तत्वज्ञाः वर्णयन्ति। अत्युत्कृष्टत्वमतिनीचत्वं च ध्रुवान्तरं सत् ईश्वरे एव सम्यगन्विते भवतः। पुनरपि सुखदुःखमयं द्वन्द्वंमीश्वरं परं सहते, न तु जीवः। धर्माचरणं ईश्वरस्य जीवनम्। जन्म-मृत्यु-राग-वैराग्य-बन्धादिदोषाः जीवन्मुक्ते नैव भवति। स्त्रीत्वं षण्डत्वं मूढत्वमित्यादिदोषेभ्योऽपि मुक्त एव सः। अविज्ञेयो भगवान् दुरूहः हृदयगुहायां वसति। सज्जनैः शिवरूपः परमात्मा वेदवेद्यः इत्यापि निर्धार्यते। एवं वेदोक्ताचारैः वेदाङ्गपठनैश्च ये सर्वेश्वरं समाराध्यन्ति तेभ्यो सज्जनेभ्यो प्रणामः।

द्वादशोऽध्यायः

अज्ञानप्रकरणे अमर्त्यविधानम्

वेदसारस्तु सन्मार्गे स्वभावो धर्मसंज्ञितः।
स्वधर्मो भवतां भूत्यै एधतां चन्द्रबिम्बवत्।। 1
प्रणवस्थो महादेवो नीच्चोच्चं वपुरेधते।
एको जीवः परस्त्वन्यः अनर्थोर्थविधायकः।। 2
जन्मादिप्रणवात्मत्वाज्जीवोऽनर्थप्रदो नृणाम्।
अतीव रमणीयत्वान्नित्यमुक्तः परस्सुखी।। 3
बाल्यकैशोरपौगण्डयौवनस्थविरादिभिः।
प्रकर्षेण नवात्मा स्यात् जीवोऽत्यन्तसुदारुणः।। 4
क्षणो क्षणे नवमिव पश्यतां यच्च मोहनम्।
तदपि प्रणवं प्राह लावण्यामृतसागरम्।। 5
पितुरिच्छात्मकत्वात्तु माययात्मा तिरोदधे।
युष्मान् प्रकाशप्रसृतानायुष्मानिह पश्यतु।। 6
पितृत्वमिच्छया प्राप्तं न्यस्तमिच्छात्मके सते।
यदिच्छया भवत्तातस्तदिच्छा सुतमादधे।। 7
इच्छाभावादसम्भूतस्वराट् भावाच्च मोचितः
साक्षिभावाद्विमुक्तः सन् वासनामात्रशेषितः।। 8
वेद्यं तु वासनामात्रात् वास्तवं त्वभिधीयते।
यस्माद्धर्मः प्रसरति तस्मात्तच्छिवदं भवेत्।। 9
मायामये शरीरेऽस्मिन् सर्वेषां मङ्गलप्रदः।
भगवान् वासनामात्रः स्फुरत्यन्तमाश्रितः।। 10
एतद्भगवतो रूपं सद्भावेन प्रकाशितम्।
भवन्तोऽन्तः समीक्षन्तु सद्भावप्रतिपादकाः।। 11

सर्वेषां प्राणिनामन्तः सुखं भूयादिति स्मृतिः।
तदेववासनां विद्याद्यदर्थं कर्म कुर्वते।। 12
अतितीष्णस्तु जीवात्मा कर्मकाण्डेन बोध्यते।
परमात्मातिशीतः स्यात् सोऽपि ज्ञानेन बोध्यते।। 13
उष्णशीतगुणोत्कर्षादुभावप्राप्यतां गतौ।
तयोरेकत्र संयोगाद्धर्मो भवति दुःसहः।। 14
अग्निरेव च कर्म स्यात् ज्ञानं त्वमृतमुच्यते।
अग्नेरपां समुद्भूतिः तस्मिन्नेव प्रलीयते।। 15
अग्नेर्निर्वापणं त्वापः अपां शोषकरोऽनलः।
विरुद्धगुणसंयोगद्यथा योगं विकल्पयेत्।। 16
अयथायोगसंयोगाद्विरोधः स्यात्परस्परम्।
तस्माद्धर्षं च शोकं च समं कुर्वीत बुद्धिमान्।। 17
अत्यन्तसुखदुःखेभ्यः स्तम्भनं मोहनं भवेत्।
उत्कण्ठा जायते तस्मादबोधस्तत्र सम्भवेत्।। 18
तदेव मरणं विद्यात्सुखदुःखातियोगतः।
तस्मात्सुखे वा दुःखे वा एकस्मिन्नातिसज्जयेत्।। 19
कर्मज्ञाने कदान्योन्यें न स्पृशेन्नाधिकं चरेत्।
अन्तर्ज्ञानं बहिः कर्म कुर्वतां वः सुखं भवेत्।। 20
यथा बाह्येऽग्नियोगेन स्थालीस्थं शिशिरं जलम्।
विमुञ्चति तथा कुर्यात् योगं हीनाधिकं न तु।। 21
यथा बलं तथा कर्म कुर्वन्नाप्नोति शोभनम्।
हीनातियोगादन्योन्यं विरुद्धत्वाद्विनश्यति।। 22
ज्ञानानुरपकर्मत्वाज्जीवः स्वस्थतरो भवेत्।
अन्नानुरूपव्यायामाच्छरीरं स्वस्थतां व्रजेत्।। 23
शरीरजीवयोः स्वस्थान्निर्विकारसुखं भवेत्।
असह्यपरिहारेण नानाबाधनिवर्तनात्।। 24
सुखमेव भवेन्नूनं निरूपाधिकमेव तत्।

स्वसुखं तद्विजानीयान्नाशस्त्रस्य न विद्यते।। 25

अविद्यायाः समभवद्विद्यामयशरीरभृत्।
स एव सर्वलोकानामुद्धर्ता वैद्यसंज्ञितः।। 26

नानारोगात्मकाज्जीवात् नानारोगविघातकः।
वन्ध्यासुत इवाभाति सन्मार्गस्य विलोकनात्।। 27

अभावाज्जायते भावः अनर्थादर्थमाबभौ।
अरूपाद्रूपमभवत् सन्मार्गस्यावलोकनात्।। 28

अन्धे रूपावलोकं स्यात् वन्ध्या पुत्रं प्रसूयते।
निस्वे स्वत्वं समायाति सन्मार्गे परिवर्तनात्।। 29

किमलभ्यं भगवति वेद्ये हृत्पद्मसंस्थिते।
प्रसन्ने सकलानन्दसन्दोहे भुक्तिमुक्तिदे।। 30

दृश्यो वेद इति प्रोक्तो वेद्यो वेदान्तसंज्ञितः।
वेत्ता तदुभयोर्योगस्तत्राहमिति बुध्यते।। 31

अकारो विषयी विष्णुः हकारो विषयः शिवः।
तयोर्योगादहमभूत् पार्वतीपरमेश्वरः।। 32

पार्वती शैलतनया रमा सागरकन्यका।
तयोः पतिरहं नाम नैवास्मदि भवेदहम्।। 33

तेजो हरिहराकारं शुक्लकृष्णैकविग्रहम्।
अत्युच्चमतिनीचं च शैलाब्धिदुहितृप्रियात्।। 34

नानावर्णैकरूपत्वान्नैकवर्णतयाऽबभौ।
अतो नानास्वरूपेण कथयन्ति मनीषिणः।। 35

पार्वतीं च रमां चैव स्वाङ्कस्थां पालयेत्तुयः।
पार्वतीपरमेशोऽहमार्य एष इति श्रुतः।। 36

अविभक्तस्वरूपत्वान्न विभक्तिरहं पदे।
द्रष्टृदृश्यैकरूपत्वात् साक्षादनुभवात्मकम्।। 37

वेदविद्यासमुद्भूतवेद्यवैद्यं समीक्षितुम्।
परस्मिन्नधिकृत्यास्ते आर्यस्वात्मानमव्ययम्।। 38
स्वस्मिन् वसति चेत्स्वत्वं अन्तर्द्धानं करिष्यति।
तस्मादस्वस्थितः स स्यात् स्वावलोककुतूहली।। 39
अतोऽहं नैव निर्देश्यः स्वावलोकनकौतुकी।
केनापि स्वस्थितं सत्यं को जानात्यविशेषणम्।। 40
पिता पुत्रश्च भावौ द्वावविद्यात्मनि भावितौ।
विद्यात्मन्यपि तौ न स्तः तथापि द्वैतमीक्षितः।। 41
सुविभक्तमहं नाम अस्मच्छब्देन बोधितम्।
तदज्ञानसमुद्भूतंमन्यथार्थप्रकाशकम्।। 42
अविभक्तमहं ज्ञानं सच्चिदानन्दसंज्ञितम्।
विभंक्तमस्मदज्ञानमसदज्ञ विषादता।। 43
अस्तीति भावं सद्विद्यात् ज्ञानमेव चिदुच्यते।
आनन्दं कृतकृत्यत्वं सच्चिदानन्दमीदृशम्।। 44
असन्नास्तीति भावं स्यात् अज्ञानं त्वचिदुत्यते।
अकृतार्थो विषादः स्यात् अरतिर्नरकं त्विदम्।। 45
वैदिकं लौकिकं चैव बुद्धया संयोज्य पौरुषम्।
कुर्वतां किमलभ्यं स्यात् स साम्राडिति विश्रुतः।। 46
बुद्धियोगाद्विराड्भूतः पौरुषेण स्वराट् भवेत्।
कार्योपभोगपूर्णात्मा स्वस्थः साम्राट् भविष्यति।। 47
बिन्दुज्ञानं चिदाकारं नादश्चिदचिदात्मकः।
बोधो बीजं तदज्ञानहदि बोध्यं प्रकाशते।। 48
बिन्दुरेवात्र वेत्ता स्यान्नादो वेद उदाहृतः।
वेद्यं बीजमपूर्वं स्याज्योतिषां परमं तु तत्।। 49
वेत्ता सत्वगुणो विद्याद् वेदो राजसमुच्यते।
वेद्यो तमोगुणो विद्यात् सर्वेषां ज्योतिषां परम्। 50

वेत्ता वेदो यदन्तं स्यात् ज्ञानं यत्र प्रशाम्यति।
वेदो यत्रोपरमते स बीजाख्यो महेश्वरः।। 51
आत्मन्यहमिति ज्ञानं स्पष्टमज्ञानसंभृतम्।
दृश्यरूपे तु पारक्ये द्रष्टृदृष्ट्यानुमीयते।। 52
विषयो दर्पणाकारः विषयी तत्र बिम्बितः।
वीक्षते बिम्बसाक्षी तु नानावर्णधरोऽस्म्यहम्।। 53
वेदो वेद्यं विजानाति वेदरूपं तु वेद्यता।
विद्याभावान्नवेदत्वं वर्णरूपेण सम्भवेत्।। 54
वर्णस्वरूपसाक्षीस्याद् वर्णाभावान्न वीक्षते।
चक्षुरेकोऽवलम्बत्वाद्वर्णमात्रप्रकाशकः।। 55
नानावर्णैकरूपत्वाद् साक्षी शबरसंज्ञितः।
रलयोरुक्यरूपत्वात् शबलः शबरः स्मृतः।। 56
शारवर्णावलोकत्वात् शारदेति च कथ्यते।
पार्वतीपरमेशैक्यं नानावर्णात्मकं महः।। 57
तदेतदखिलं लोकं वेदवेद्यचराचरम्।
ईक्षते वर्णनाम्नैव साक्षी बोधाच्च बुध्यते।। 58
बोधोऽहमान्तरालोकात् साक्षी बाह्यावलोकनात्।
पार्वतीपरमेशोऽयं बुद्धया कान्त्या विराजते।। 59
विषयस्थं विषयिणं साक्षित्वात्प्रतिबिम्बितम्।
इति जानाति यो मर्त्यः अमर्त्य स भवेत् ध्रुवम्।। 60

इति

अज्ञानप्रकरणे अमर्त्यविधानं नाम

द्वादशोऽध्यायः

द्वादशाध्यायस्य टिप्पणी

1. स्वधर्मः

स्वस्य धर्मः। स्वजात्युक्ताचारः। यथा-

"श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।

स्वधर्मो निधनं श्रेयः परधर्मो भयावहः।।" इति भागवत्गीतायाम्। अपि च,

"ये यस्य विहितो धर्मः स तज्जातिः प्रकीर्तितः।

तत्मात्स्वधर्मो कुर्वीत द्विजो नित्यमनापदि।।

चत्वारो वर्ण राजेन्द्र चरेयुश्चापि वाश्रमाः।

ऋते स्वधर्मं विपुलं न ते यान्ति परां गतिम्।।" इति श्रीनारसिंहपुराणम्। स्वधर्मत्यागी कृतघ्नः।

2. भूतिः

(1) भवने (2) अणिमाद्यष्टविधैश्वैर्ये (3) शिवाङ्गस्थभस्मानि (4) गजवेशे च मेदिनी। (5) भूतृष्णे (6) सम्पत्तौ (7) जात्याम् इति विश्वः। (8) वृद्धिनामौषधे च।

3. विधायकः

विधानकर्तरि।

4. रमणीयम्

सुन्दरमित्यमरटीका। यथा गीतागोविन्दे -

"वितरति दिक्षु रणे दिक्पतिकमनीयम्।

दशसुरमौलिबलिं रमणीयम्।।" इति।

5. नियुक्तः

नित्यं मुक्तः। कालत्रयऽपि बन्धशून्ये परमात्मनि " अहं देवो न चान्योऽस्मि" इत्युपक्रमे नित्यमुक्तस्वभाववान्" इति।

6. बाल्यम्

बालस्य भावः बाल्यम्। तत्पर्यायः (1) शिशुत्वम् (2) शैशवम् इत्यमरः। तच्च षोडशवर्षपर्यन्तम्। आषोडशाद्भवेद्बाल इत्युक्तेः। इति भरतः।

7. पौगण्डम्

पोगण्डस्य भावः। अवरूथाविशेषः। यथा-

"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।

कैशरेमापञ्चादशात् यौवनं च ततः परम्।।" इति दशमस्कन्धीयद्वादशाध्याये श्रीधरस्वामिकृतवचनम्। पौगण्डावस्थावति तदवस्थासम्बन्धिनि च।

8. यौवनम्

यूनोः भावः। तत्पर्यायः, तारुण्यम् इत्यमरः। वय इति जटाधरः। तत्तु षोडशवर्षमारभ्य सप्ततिवर्षपर्यन्तम्।

"आषोडशाद्भवेद्बालस्तरुणस्ततः उच्यते।

वृद्धः स्यात् सप्ततेरूर्ध्वं वर्षीयान् नवतेः परम्।।" इति स्मृतिः।

9. स्थविरम्

(1) शैलेये गन्धद्रव्ये इति राजनिघण्टुः (2) चतुर्मुखे (3) अचले (4) स्थिरे (5) वृद्धे।

10. प्रकर्षः

उत्कर्षः। यथा

"गुणप्रकर्षेण जनोऽनुरज्यते

जनानुरागप्रभवा हि सम्पदः।" इति।

यथा च महाभारते -

"बालोऽपि यौवनं प्राप्य मानुषेषु विशाम्यते।

सर्वास्त्रेषु परं वीरः प्रकर्षमगमद्बली।।" इति।

11. लावण्यम्

लवणत्वम्। लवणा त्विट् विद्यते यस्येति लवणः। सौन्दर्यविशेषः। तस्य लक्षणं यथा

मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा।

प्रतिभाति तदङ्गेषु तल्लावण्यमिहोच्यते।।" इत्युज्वलनीलमणिः। तथा हि -

"नीतिर्भूमिभुजां नतिर्गुणवतां हीरङ्गनानां धृति-
र्दम्पत्योः शिशवो गृहस्य कविता बुद्धिः प्रसादा गिराम्।
लावण्यं वपुषः स्मृतिस्तु मनसा शान्तिर्द्विजस्य क्ष्मा" शीलनैपुण्यादि।

12. वेद्यम्

वेदितव्यम् । यथा -

"धर्म प्रोज्झितकेतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मुलनम्।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः" इति।

धनाय हितम्। यथा ऋग्वेदे -

"रथमिव वेद्यं शुक्रशोचितमग्निम्। "वेद्यं वेदो धनम्। तस्मै हितम्।" इति तद्भाष्ये सायणः। स्तुत्यम्। तथा तत्रैव -

"प्रबोधसे कवये वेद्याय गिरम्।" "वेद्याय स्तुताय" इति तद्भाष्ये सायणः। लब्धव्यम्। यथा वाजसनेयसंहितायाम् - "वित्तं च मे वेद्यं च मे"। "वेद्यं लब्धच्यम्" इति तद्भाष्ये महीधर-। वेदाय हितमिति। वेदहितम्। वेदप्रतिपाद्यम्। यथा महाभारते -

"वेद्यं च यद् वेदयते च वेद्यम्
विधिश्च यश्चाश्रयते विधेयम्।
धर्मे च वेदे च बले च सर्वं
चराचरं केशवं त्वं प्रतीहि।।" इति।

13. वास्तवम्

(1) वस्त्वेव। (2) यथार्थभूतम्। यथा-

"धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।" इत्यादिः। वास्तवं परमार्थभूतं वस्तु। यद्वा, वास्तवशबदेन वस्तुनों शो जीवः वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथक्" इति तट्टीकायां श्रीधरस्वामि।

14. तीक्ष्णम्

(1) स्वरे स्पर्शे (2) विषे (3) लौहभेदे (4) युद्धे इत्यमरः। (5) सामुद्रलवणे। (6) मुष्कके इति मेदिनी। चव्यके इति राजनिघण्टुः। (7) मरके इति हेमचन्द्रः। (8) तीक्ष्णतायुक्ते "तीक्ष्णश्चैव मृदुश्च स्यात् कार्यं वीक्ष्य महीपतिः।" इति मनुः। "प्रतिभायां हीरके कटाक्षे दुर्वाच्ये नखे लवणे विकारे" इति कविकल्पितायां तीक्ष्णत्वमुक्तम्। (9) यवक्षारे इति मेदिनी। (10) श्वेतकुशे (11) कुन्दुरुके इति राजनिघण्टुः नक्षत्रविशेषणे यथा -

"शक्राहिशिवमूलाश्च मन्दाहस्तीक्ष्णदारुणे" ज्यातिषम्।। (12) आत्मत्यागिनि इति मेदिनी। (13) निरालस्ये सुबुद्धौ इति धरणी (14) योगिनि इति अजयपालः।

15. शीतः

(1) स्पर्शविशेषः। यथा शीतस्पर्शवत्यापः इत्यादौ। अत्र शीतत्वं च स्पर्खनिष्टो जातिविशेषः प्रत्यक्षसिद्धः इति ज्ञेयम्। (2) शीतस्पर्शयुक्तः पदार्थः। यथा शीतं शीतलम् इत्यादौ शीरशब्दस्यार्थः। (3) वृक्षविशेषः।

16. विरोध

(1) इष्टार्थभङ्गः। निग्रहस्थानम्। (2) क्वचित् तद्वत्ताप्रतिबन्धकज्ञनविषयत्वम् इति गदाधरी। (3) विरुद्धत्वम्। (4) विरोधित्वम् (5) परम्पराभावव्याप्यत्वविशेषितयोः परस्परज्ञानप्रतिबन्धकीभूतज्ञानाविषयत्वम्। अयं च स्वरूपतो विरोधः इत्युच्यते। यथा घटघटाभावयोर्विरोधः (6) विपरीतार्थकत्वम्। यथा विरोधे त्वनपेक्षं स्यात् असति ह्यनुमानम्। (7) अर्थालङ्कारविशेषः इति काव्यज्ञा आहुः।

17. हर्षः

(1) चित्तोत्साहः। स च क्वचित् मिथ्या कारणं भवति। यथा हृष्टो दर्पति दृप्तो धर्मम्प्रतिक्रामति धर्मातिक्रमे खलु पुनर्नरकः। (2) इष्टाधिगमजन्यानन्दः। (3) अभिप्रेतविषयकप्रार्थनप्राप्तौ सुखानुभवो हर्षः। (4) पौराणिकस्तु कन्दर्पपिता इत्याहुः। (5) आधुनिकास्तु कलियुगीयो राजविशेषः। यथा हर्षचरितम् इत्यादौ हर्षशब्दार्थः।

18. शोकः

इष्टवियोगे तल्लाभानर्हताज्ञानम्। यथा "अशौच्यानन्यशोच्यत्वम्" इत्यादौ।

यथा वा "निवसति तरुणी ते काकं शोकं विमुच्य" इत्यादौ च शोकशब्दस्यार्थः। केचित्तु इष्टवियोगजातो दुःखानुगुणश्चित्तवृत्तिविशेषः इत्याह इति वाचस्पत्यम्। इष्टविषयवियोगे सति तत्प्राप्त्यशक्यप्रार्थना शोकः।

19. व्यायामः

(1) श्रमे (2) श्रमसाधने व्यापारे (3) पौरुषे (4) दुर्गसंस्कारे (5) विश्रमे इति मेदिनी। (6) मल्लानां श्रमकारके व्यापारे (7)

20. निरूपाधिः

(1) निर्गतः उपाधिः यस्य सः निरूपाधिः। उपाधिर्नाम धर्मचिन्ता (2) कुटुम्बव्यापृतः (3) छलम् "उपाधिर्न मया कार्यो वनवासे जुगुप्सितः" इति रामायणे। (4) विशेषणम् "पदार्थविभाजकोपाधित्वम्" - इति मुक्तावली। (5) नामचिह्नं हेतोरव्यापकः। यथा धूमवान् वह्निरिति आर्द्रकाष्टमुपाधिः। अस्य प्रयोजनं व्यभिचारस्यानुमानम्। आलङ्कारिकमते जातिगुणक्रियायदृच्छास्वरूपः।

21. रोगः

धातुवैषम्यजातो व्याधिः। तल्लक्षणादिकं च -

"रोगस्तु धातुवैषम्यं दोषसाम्यंमरोगता।

रोगाः दुःखस्य दातारो ज्वरप्रभृतयो हिते।।" इति। ते च स्वाभाविकाः केचिदागन्तवः स्मृताः। मनसा केचिदाख्याताः कथिताः केऽपि कायिकाः।। कर्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे। कर्मदोषोद्भवाश्चान्ये व्याधायस्त्रिविधाः स्मृताः। सुखसाध्यो कष्टसाध्यो द्विविधः साध्य उच्यते। (2) कुष्टौषधम् इति मेदिनी।

22. निस्वः

निर्गतं स्वं यस्येति निस्वः। दरिद्र इत्यर्थः।

23. भुक्तिः

उपभोगः।

24. मुक्तिः

(1) संसारोपरमः। (2) परुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति। (3) नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिः। (4) प्रकृतिपुरुषान्यथाख्यातौ प्रकृत्युपरमे पुरुषस्य स्वरूपेणावस्थानां मुक्ति-। (5) आवरणमुक्तिमुक्तिः। (6)

लब्धानन्तचतुष्कस्य लोकगूढस्य चात्मनः।
क्षीणाष्टकर्मणो मुक्तिः निर्व्यावृत्तिर्जिनोदिता।।"

(17) मोचनं निस्सरणं वाम मुक्तिरिति काव्यज्ञाः आहुः।

25. वेत्ता

ज्ञाता। वेत्तीति। विद् धातोस्तृणप्रत्ययेन निष्पन्नमिदम्। यथा हितोपदेशे - "यथा स्वरश्चन्दनभारवाही भारस्य वेत्ता न तु चन्दनस्य" इति।

26. विष्णुः

वेवेष्टि व्याप्नोति विश्वं यः वेषति सिञ्चति आप्यायते विश्वमिति वा। विष्णाति वियुनक्ति भकगन् मायापसारेण संसारदिति वा। विशति सर्वभूतानि विशन्ति सर्वभूतानि यत्र वा।

"यस्माद्विश्वमिदं सर्वं तस्य भक्त्या महात्मनः।
तस्मादेवोच्यते विष्मुर्विशधातोः प्रवेशनात्।।" इति विष्णुपुराणे। बृहत्वाद्विष्णुरुच्यते इति महाभारते। नारायणः, कृष्णः, वैकुण्ठः, विष्टरश्रवाः, दामोदरः, हृषीकेशः केशवः, माधवः, दैत्यारिः, पुण्डरीकाक्षः, गोवन्दः, गरुडध्वजः, पीताम्बरः, अच्युतः, शाङ्र्गी, विष्वक्सेनः, जनार्दनः, पुराणपुरुषः, कृष्णिः, सनातनः इत्याद्यनेकानि नामानि सन्ति।

27. हकारः

व्यंजनेषूष्मवर्णभेदः। कण्ठस्थानोच्चार्यः। तस्योच्चारणे आभ्यन्तरप्रयत्नः जिह्वाग्रेण कण्ठस्थानस्य अर्द्धस्पर्शः। अस्य ध्येयरूपं कामधेनुतन्त्रोक्तं यथा -

"हकार श्रुणु चार्वङ्ग चतुर्वर्गप्रदायकम्।
कुण्डलीद्वयसंयुक्तं रक्तविद्युल्लतोपमं।।
रजःसत्वतमोयुक्तं पंचदेवमयं सदा।
पंचप्राणात्मकं वर्णं त्रिशक्तिमहितं सदा।।
त्रिविन्दमहितं वर्णं हृदि भावय पार्वति।" इति। अस्य वाचकशब्दस्तन्त्रोक्ता यथा -

"हः शिवो गगनं हंसोथ नागलोकाम्बिकापतिः।
नकुलीशो जगत्प्राणः प्राणेशः कपिलामलः।।"

परमात्मात्मजो जीवः वराकः शान्तितो कलः।
मृगो भयो रुणः स्थाणुः कूटकूपनिवारणाः।।
लक्ष्मीर्हरिहरप्राणिसन्धि ललाटजः।
महालक्ष्मी परं नादो मेघनादो विमर्दनः।।
बिन्दुर्दुर्गा प्रिया देवी मेघश्यामः महेश्वरः।
दक्षपादः सदा शम्भुः श्यामो यः सोममण्डलूम्।।" इति वर्णभिधानम्।

28. विषयः

"(1) विषिज्यन्ति विषयिणं स्वेन रूपेण निरूपणीयं कुर्वन्ति।" इति सांख्यतत्वकौमुदी। चक्षुरादिग्राह्यः। स तु शब्दस्पर्शरूपरसगन्धरूपः। तत्पर्यायः गोचरः (2) इन्द्रियार्थः (3) देशः (4) आशयः इत्यमरः। (5) भोगसाधनं विषयः। सर्वमेव हि कार्यमंदृष्टाधीनं यच्च कार्यं यदहष्टाधीनं तत्तदुंपभोगं साक्षात्परम्परया जनकत्वेव न हि नीचप्रयोजनाभ्यां विनोत्पत्तिरस्ति। तेन द्व्यणुकादिब्रह्माण्डान्तं सर्वमेव विषयो भवतीत्यर्थः। इति सिद्धान्तमुक्तावली। नित्यसंवितः इति भरतधृताजयः। नियामकः यथा -

"विशब्दो हि विशेषार्थः सिनोतेर्बन्ध उच्यते।
विशेषेण सिनोतीति विषयो स नियातकः।।" इति भट्टकारिका।

29. शुक्लवर्णः

(1) श्वेतवर्णे (2) श्वेतवर्णयुते इत्यमरः। शुक्लवर्णपदार्थास्तु कविकल्पलतायां उक्ताः यथा -

"सुधांशूच्चैश्रवाः शम्भूः कीतिर्ज्योत्स्ना शरद्घनाः।
प्रसादसौधनगरमन्दारद्रुहिमाद्रयः।।
सूर्योन्दुकान्तकर्पूरकरम्भा रजतं हली।
निर्मोकभस्महिण्डीरचन्दनं करका हिमम्।।" इत्यादयः।

30. आर्यः

अर्तुं प्रकृतमाचरितुं योग्यः। अर्यते वा। पूज्यः। साधुः, सज्जनः, वैश्य, सत्कुलोद्भवः, श्रेष्ठः, उदारचरितः, शान्तचित्तः। यायपथावलम्बी प्रकृताचारशीलः, सततकर्तव्यकर्मानुष्ठाता

"कर्तव्यमाचरन् काममकर्तव्यमनाचरन्।

तिष्ठति प्रकृताचारे स तु आर्य इति स्मृतः।।" इति। धार्मिकः, धर्मशीलः, "आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत्।" इति मनुः। "आर्याश्च पृथिवीपालाः" इति महाभारते। स्वामी, बुद्धः, सुहृत्, श्रेष्ठवर्णः, म्लेच्छेतरजातिः।

31. अविभक्तः

न विभक्तः अविभक्तः। विभक्तनाम् - (1) पृथक्कृते (2) विभिन्ने (3) कृतविभागे (4) विभागे इति मेदिनी। यथा -

"अविभक्तं स्थावरं चेत् सर्वेषामेव तद्भवेत्।

विभक्तं स्थावरं प्राप्तं नान्योदर्यैः कदाचन।।" इति यमवचनम्। (5) कार्तिकेयः, यथा महाभारते -

"षष्ठीप्रियश्च धर्मात्मा पवित्रो मातृवत्सलः।

कन्या भर्ता विभक्तश्च स्वाहेयो रेवतीसुतः।।" इति।

32. विभक्तिः

(1) विभजनमिति। (2) संख्याकर्मादयो ह्यर्थाः विभज्यन्ते आभिरिति च। (3) विभागः, स्यादिः, त्यादिश्च। यथा -

"संख्यात्वव्याप्यसामान्यैः शक्तिमान् प्रत्ययस्तु यः।

सा विभक्तिर्द्विधा प्रोक्ता सुप्तिङ्चेति प्रभेदतः।।" इति। (4) संख्यात्वावान्तरजात्यवच्छिन्नशक्तिमान् यः प्रत्ययः सा विभक्तिः। सुप् तिङ् इति भेदा द्विविधा इति शब्दशक्तिप्रकाशिका। उभयस्योदाहरणं यथा - नैषधे

"क्रियेत चेत्साधु विभक्ति चिन्ता

व्यक्तिस्तदा सा प्रथमाभिधेया।

या स्वौजसां साधयितुं विलासे-

स्तावत्क्षमानामपदं बहु स्यात्।।" इति।

33. विषादः

। अवसादः। यथा - "जाड्यं मौर्ख्यं विषादोऽवसादः सादो विषम्मता" इति हेमचन्द्र। यथा भगवते - "दध्मौ दरवरं तेषां विषादं शमयन्निव" इति।

34. अरतिः

(1) औत्सुक्यं (2) उद्वेगः (3) अनवस्थितचित्तत्वम् (4) क्रीडाभावः (5) रतिविरहः (6) विरतिः (7) प्रीतिविरहः (8) अनुरागराहित्यम् (9) उत्साहहीनता (10) उद्यमाभावः (11) उद्योगराहित्यम् (12) निश्चेष्टता (13) सुखाभावः (14) दुःखं (15) क्लेशः (16) इष्टवियोगाच्चित्तस्याकुलीभावः। तदुक्तम् -

"स्वाभीष्टवस्त्वलाभेन चेतसो यानवस्थितिः।
अरतिः सा तु विज्ञेया।" इति। सुस्थताभावः, अस्वस्थ्यम्,
"श्रमो रतिर्विवर्णत्वं वैरस्यं नयनप्लवः" इति सुश्रुते।

35. साम्राट्

सम्यक् राजते इति। पक्रवर्ती, सार्वभौमः येन राजसूयेनेष्टम्। यो मण्डलस्येश्वरः। आज्ञया राज्ञः शास्ति यः। राजसूयश्चक्रवर्तिसाध्यो यागविशेषः। यश्च राज्ञो नुपात् आज्ञया शास्ति भृत्यवद्व्यापरेषु नियोजयति स साम्राट् उच्यते। इह परत्र च सम्यक् राजते इति।

36. विश्रुतः

(1) ख्यातः इत्यमरः। यथा कलाविलासे -

"विद्वान् सुभगो मानी विश्रुतः कर्माकुलोन्नतः शूरः।
वित्तेन भवति सर्वो वित्तहीनस्तु सद्गुणोप्यगुणः।।" इति। (2) ज्ञातः (3) संहतः इति विश्वः।

37. बिन्दुः

(1) अल्पेंशे अमरः। (2) राजभेदे ततोऽपत्ये। बैन्दव तदपत्ये। रेखागणितप्रसिद्धे स्थुलत्वदीर्घत्वहीने लक्षयितुं शक्ये। (3) साहित्यदर्पणोक्ते अर्थप्रकृतिभेते

"बीजं बिन्दु पताका च प्रकरी कार्यमेव च। अर्थपकृतयः आहुः।" (4) अनुस्वारसूचके रेखाभेदे। (5) नादजन्ये क्रियाप्राधान्यलक्षणे चिच्छक्तेरवस्थाभेदे। यथा -

"सच्चिदानन्दविषयात् सकलात् परमेश्वरात्।
आसीच्छक्तिस्ततो नादो नादाद्बिन्दुसमुद्भवः।।

अखण्डपरचिच्छक्तिर्जाता चिद्रूपिणो विभुः।" इति। (6) बीजभेदे
"बिन्दुः शिवात्मकों बीजशक्तिनादस्तयोर्मितः।
समवायः समाख्यातः सर्वागमविशारदैः।।" इति।

38. चित्

ज्ञाने चेतनायाम् इत्यमरः। चैतन्ये चित्तवृत्तिभेदे "चिदसि मनासि धीरसि" इति यजुर्वेदे। "अचेतनदेहादिसंघातस्य चेतनत्वं संपादयन्ती बाह्यवस्तुषु निर्विकल्परूपं सामान्यज्ञानं जनयन्ती वृत्तिश्चित्र तदेवात्र चिदित्युच्यते" इति वेददीपिका। निर्विशेषस्फुरणमात्रे चेतने स्वत एव प्रकाशमाने ब्रह्मणि निर्विकल्पकं सर्वावभासकं ज्ञानं प्रत्यगारूत्मरूपं चिदिति" व्याख्यातारः। उपासकानां सिद्ध्यर्थं ब्रह्मणो रूपकल्पना" "तस्मिन् चिद्दर्पणे स्फारे समस्ताः वस्तुदृष्टयः। इमास्ताः प्रतिबिम्बन्ति सरसीव चलद्रुमाः" इति योगवासिष्ठः। असाकल्ये इत्यमरः। कश्चित् कथंचित् जातुचित् अव्यक्तानुकरणें च चित्कारः "न हि करिणि दृष्टे चित्कारेण तमनुमिमतेऽनुमातारः" इति वाचस्पतिमिश्रः।

39. नादः

(1) शब्दः। "विभान्ति ते देववराः ससाध्याः प्रध्मातशङ्खास्वनसिंहिनादाः" इति हरिवंशे। (2) अर्द्धचन्द्राकृतिवर्णः, अर्द्धेन्दुः, अर्द्धमात्राः, कलाराशिः, सदाशिवः, अनुच्चार्याः, तुरीया, विश्वमादकला, परा, ब्रह्मस्वरूपघोषविशेषः, मुनिविशेषः, अयें तु ईश्वरः मुनेः पुत्रःन्यायतत्वयोगरहस्ययोः प्रणेता, अस्य वासस्थानं दाक्षिणात्यप्रदेशः।

40. सत्वगुणः

प्रकृतेर्गुणविशेषः। अत्र सत्वं प्रकाशकज्ञानं सुखहेतुः। सत्वं द्वितकारमिति।
"सत्वं रजस्तमश्चैव त्रीन् विद्याद्आत्मनो गुणान्।
यैवर्याप्येमान् स्थितो भावान् महान् सर्वानशेषतः।।" इति मनुः। सत्ता, विद्यमानता, स्थाम, वलं, भूतः पिशाचादि।
"अद्य नूनं दशरथः सत्वमाविश्य भाषते।
न हि राजा प्रियं पुत्रं विवासयितुमर्हति।।" इति रामायणे। (3) द्रव्यं, व्यवसायः (4) स्वभावः (5) आत्मा, चित्तं, रसः, आयुः, कुबेरः, धनम्, आत्मता,

(6) जन्तुः यथा "रक्षापदेशान्मुनिहोमधेनोर्वर्ण्यान् विनेष्यन्निव दुष्टसत्वान्" इति रघौ।

41. रजोगुणः

रज्यतीति रजः। प्रकृतेर्गुणविशेषः। स तु रागद्वेषात्मकं दुःखहेतुः। महाभारतमते दुःखजनकः गुणः। तस्य धर्मः, कामः, लोभः, मानः, दर्पश्च, इति मोक्षधर्मः।" तृष्णा क्रोधो भिसंरम्भो राजसास्ते गुणाः स्मृताः।।" इति। अभिसंरम्भो द्वेषाभिनिवेशः इत्याश्वमेधिकपर्वम्। अपि च,

"काम एष क्रोध एष रजोगुणसमुद्भवः।

महाशान्तो महापाप्मा विद्ध्येनमिह वैरिणाम्।।" इति श्रीमद्भागवतीतद्गीतायां द्वितीयोऽध्यायः।

42. तमोगुणः

त्रिगुणात्मकप्रधानस्य गुणभेदे। अश्वमेधिकपर्वणि तस्य कार्यभेदादिकमुक्तं

"तमसो मिथुनं सत्वं सत्वस्य मिथुनं रजः।

रजसश्चापि सत्वं स्यात् सत्वस्य मिथुनं तमः।।

नियम्यते तमों यत्र रजस्तत्र प्रवर्तते।

नियम्यते रजो यत्र सत्वं तत्र प्रवर्तते।।

नैशात्मकं तमो विद्यात् त्रिगुणं मोहसंज्ञितम्।

अधर्मलक्षणं चैव नियतकर्मसु।।" इति। (2) सांख्योक्ते अविद्यायाः अष्टविधभेदे च "भेदास्तमसोष्टविधः" इति सांख्यकारिका।

43. पारलोक्यम्

(1) परस्मै लोकाय हितम्। परलोकहितकर्म। यथा -

"पादेन तस्य पारक्यं कुर्यात् संचयमात्मवान्।

अर्द्धेन चात्मभरणं नित्यनैमित्तिकं तथा।।

पादस्यार्द्धार्द्धमर्थस्य मूलभूतं विवर्द्धयेत्।

एवमाचरः पुंसो ह्यर्थः साफल्यमृच्छति।।" इति मार्कण्डेयपुराणम्। (2) परस्येदमिति। परकीये। यथा मनुः-

"वरं स्वधर्मो विगुणो वा पारक्यः स्वानुष्ठितः।

44. शबलः

कर्बुरवर्णः

"अङ्कश्च मलपङ्केन संच्छन्नं शबलस्तनम्।" भागवते

45. शबरः

शक्तीति। यद्वा शवं राति गृह्णाति इति। पृषोदरादित्वात् मध्ये बकारः। शबरः अन्त्यजातिः।

46. शारवर्णः

कर्बुरवर्मः, कंखः, कवरः, सम्पृक्तः, खचितः, शीर्यते येन शृणाति वा। वायुः, अक्षोपकरणम्। हिंसनम्, कर्वुरवर्णः।

47. शारदा

(1) शरदि भवा शारदा। (2) शालीना (3) अधृष्टा, नूतना, अप्रतिभा, शरज्जाता, सरस्वत्याः अपरसंज्ञा।

द्वादशाध्यायस्य सारः

अमर्त्यविधानं नम्न्यस्मिन्नध्याये अमर्त्यलक्षणं प्रतिपाद्यते। अध्यायारम्भे मङ्गलाचरणे भगवान् परमेश्वरः परामृश्यते। महादेवः प्रणवस्थितः इति शास्त्रेषु प्रसिद्धः। प्रथमं तावत् जीवात्मपरमात्मनोः भेदः उक्तः। जीवः अनर्थप्रदायकः, परस्तु नित्यमुक्तः आनन्दरूपश्च भवति। सोऽयं जीवः बाल्यकौमाराद्यवस्थाविशिष्टः सन् दुःखमनुभवति। एक एव प्रणवस्थः महादेवः नीचं तथा उच्चं च वपुः एधते। अयं भावः - एक एव परमेश्वरः कृमिकीटादिषु इन्द्रादिषु चानुस्यूतः सन् एधते। एक एव परमेश्वरः प्रणवे स्थित्वा नित्यमुक्तः आनन्दस्वरूपः सन् विराजते। बाल्यकौमाराद्यवस्थासमेतः सुदारुणः भवति।

"अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यथा।।" इति वाक्येन महेश्वरस्य द्वैविध्यं जीवपररूपेण वा देवमनुष्यरूपेण वा स्पष्टम्।

प्रणवः इत्यत्र प्र इति पुरातनवाची। नव इत्यस्य नूतनमित्यर्थः। पुरातनोऽपि नित्यनूतनो समाकर्षक इत्याशयः। अत्र तु अन्यप्रकारेण विचार्यते। प्रणवस्य

रामणीयकत्वं कविरत्रोपवर्णयति -

"क्षणे क्षणे यत्नवतामुपैति तदेव रूपं रमणीयतायाः।" इति अलङ्कारशास्त्रवचनस्यापि अभिसन्धिरास्ते।

पितुरिच्छया मायया सुतस्य जीवत्वप्राप्तिः। तथा च प्रतिशरीरं भिन्नः जीवात्मा प्रकाशते। एवं कामनारूपेणैव जगतः उत्पत्तिः। कामानुवृत्तिरेव जगत्स्थितिकारणम्। अत एवेच्छाभावत्समुद्भूतः, स्वराट्भावाद्विमोचितः साक्षिभावाद्विर्निमुक्तः सन् यः अवशिष्टते स एव ज्ञेयः, स एव वास्तवरूपेण स्थितः। मायमलीमसेऽस्मिन् शरीरे सर्वेषां मङ्गलादयकः वासनामात्रस्थितः भगवान् शिवः विराजते। एवं च भगवतः रूपं सद्भावेन प्रकाशते इत्यर्थः। यथा वैद्युतिः लोहतन्तुषु उपाधिभूतेषु संचरन्तीप्रकाशमाना तथा परमात्मापि जीवशरीराण्युपलभ्य भासते इत्याशयः।

"सर्वेषां प्राणिनामन्तः सुखं भूयात्" इति स्मृत्यनुसारेण यश्च वासनारूपेणान्तः स्थितः, तत्प्राप्त्यर्थं कर्म करोति। कर्मकाण्डेषु प्रवर्तकः कर्मठः तीक्ष्णस्वभावो भवतीति लोकानुभवः। परमात्मा च तीव्रविकाराद्यतीतः शीतः इवानन्ददायकः इत्यपि ज्ञेयः। अयं भावः - "मायावच्छिन्नस्यात्मन जीवस्य ज्ञानं कर्मणा स्फुटं भवति। "आयुरन्नं विजानीयात्" इतियादिवाक्यं "आयुर्वैघृतम्" इत्याप्तवाक्यं स्मारयति। अन्नं न लभ्यते चेज्जीवोऽपि नश्यत्येव। अन्नलाभाय कर्म अनुपेक्षणीयं किल। निरन्तरं "चलनात्मकं कर्म" जीवात्मनि विकारोष्मलतामातनोति।

ज्ञानगम्यस्तु परमात्मा आनन्दमयः सन् चन्द्र इव जनान् रंजयति। परमात्मजीवात्मनोः पारस्परिकविरुद्धधर्मयोः योगः अयथायोग इत्युच्यते। एतादृशायथायोगः न सुखदुःखादिद्वन्द्वं परिहरति। यस्य हृदयं ज्ञानेन सम्पन्नं शरीरं च कर्मसु व्यापृतं तस्यैव सुखेऽधिकारः। यथा उचितमन्नं व्यायामेन सङ्गतं शरीरं पुष्णाति तथैव उचितज्ञानयुक्तेन कर्मणा जीवः स्वास्थ्यं सम्पादयति। इत्थं शरीरजीवयोः परस्परानुभाविकं स्वास्थ्यं निरुपाधिकाय सुखाय कल्पते। तदेव जीवस्य नैसर्गिकं सुखमिति शास्त्रेषु अभिधीयते। अत्र तु अविद्याद्वारेव प्रज्ञानरूपस्य ब्रह्मणः ज्ञानं जायते। अभावात् भावः जायते, अनर्थादर्थश्च। दृक्दृश्यविवेकः इति तत्वमत्र सुचितं विद्यते। वेद्यो वेदान्तः। वेत्ता जीवात्मा परमात्मप्रेरितः सन् अहंपदार्थे गुम्भितो वर्तते। अकारः

विष्णुः विषयी, हकारश्च शिवः विषयः, विषयविषयिणोः संयोगात् अहंपदार्थः निष्पन्नः। शैलतनया पार्वती सागर कन्यका रमा च यः स्वाङ्के कृत्वा लालयति सोऽहमार्यः। वेदाः परमात्मप्रतिपादकाः। तस्मात् वदेविद्यासमुद्भूतं वेद्यरूपं। वैद्यशास्त्रे तु परमात्मनि भक्तियुक्तस्यैवावकाशः। केवलं स्वात्मनि स्थैर्यावलम्बनेन स्वत्वं पुष्कलं न भवेत्। तद्भावे च सः स्वावलोकतत्परः भविष्यति। अविद्याभूते अनात्मप्रपंचे एव पितृत्वपुत्रत्वाद्यापेक्षिकधर्माणां प्रसक्तिः। पराविद्याप्रकाशवत्सु जीवात्मसु ईदृशाः धर्माः निरस्ताः। तथापि जीवन्मुक्ते द्वैतभावना ईषदप्यनुवर्तत एव। अविभक्तः अहंपदार्थः परमात्मवाची। सुविभक्तस्तु जीवात्मा अस्मच्छब्देन बोधितः। अविभक्तमहंपदार्थज्ञानं सच्चिदानन्दपदवाच्यं भवति। विभक्तं तु असदित्यभिधीयते। अत्र तु अस्तीति भावः सत्। ज्ञानं च चित्। आनन्दस्तु कृत्याकृत्यम्। नास्तीति यो भावः स असत् इत्युच्यते। अज्ञानं च अचित् इति। पुरुषप्रयत्नेन लौकिकं वैदिकं च विज्ञानं समासाद्य यः कर्म कुरुते स एव साम्राट्पदालंकरणाय समर्थो भवति।

ज्ञानस्य केन्द्रभावः सुवर्णबिन्दुरित्युच्यते। तज्जन्यनादः ज्ञानाज्ञानामिलितो बोध्यः। बीजरूपं ज्ञानमज्ञानस्यापि प्रकाशकं वक्तव्यम्। बिन्दुरेवात्र परमो वेत्ता। वेदः नादरूपः इति च स्पष्टं भवति। मूलकारणरूपं बीजमेव वेद्यम्। परंज्योतिस्वरूपो राजते परमात्मा। तं परमपुरुषं ज्ञात्वा कृतार्थः सन् मौनी भवति जीवन्मुक्तः। "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति वचनात्ज्जीवात्मनि अहन्ताविजृम्भणमज्ञानमूलकं बोध्यम्। द्रष्टुः जीवात्मनः दृष्ट्या बाह्यविषयाः अनुमीयन्ते। मिथ्याभूतानां वस्तूनां परमार्थसत्ता नास्तीति वचनात्। अत्र बिम्बप्रतिबिम्बभावः प्रस्तूयते। बिम्बो जीवः, प्रतिबिम्बः ईश्वरः। दर्पणस्थानीयमन्तः करणमुपाधिः। वर्णं नाम नामरूपम्। नामरूपात्मकं प्रपंचम्। चक्षुषोर्निमीलनेन प्रपंचस्य तिरोभावः। जीवसाक्षी तु नानावर्णसंवृतत्वात् विचित्रवर्ण इति कल्प्यते। शबलशबरयोरैक्यभावः निष्पादितः। यतः नानावर्णपिच्छभारै भूषिताः वनवासिनः जनानाकर्षयन्ति। सर्वशबलायाशार इति धवलार्थकं पदम्। शारदा इति सरस्वत्याः अपराभिधानम्। अन्तर्मुखसमाराध्याः भवन्ति जीवाः। एवं विषयविषयिणं च पृथक्कृत्वा यो जानाति सः महापुरुषः अमृतमश्नुते इति भावः।

त्रयोदशोऽध्याय

अज्ञानप्रकरणे जीवन्मुक्तानुभवकथनम्

नानाक्षरमयं तेजः पार्वतीपरमेश्वरम्।
अन्तर्बहिः समाकीर्णं मङ्गलायास्तु वः सदा। 1
शब्दार्थविषयी जीवः संज्ञारूपेण सर्वतः।
व्याप्तं तच्छबलं तेजो भूत्यै भवतु वः सदा।। 2
नीलाम्बरावनीभूतमुद्गं यत्र विराजते।
तदेव सद्विजानीयात् साक्षी सर्वाश्रयं महत्।। 3
पृथिव्यम्बरयोरन्तं विषयं खण्डिताम्बरम्।
दिग्देशाद्यैरवच्छिन्नं सत्यं तज्जीवविष्टरम्।। 4
तद्यस्य विषयं याति जीवात्मा विषयी तु सः।
दिग्देशाद्यैरवच्छिन्नः प्रामाण्यं परमात्मनः।। 5
लोकोऽयं परमाणुः स्यात् जीवाख्यः परमात्मनः।
रूपाकारस्वरूपस्य तस्मात् तद्ब्रह्मसंज्ञितम्।। 6
ईश्वरोरूपता साक्षी बोधबोध्यो महानसौ।
यद्रुपपरमाणुः स्याल्लोक एष चतुर्दश।। 7
चतुर्दशमहाविद्या यद्रूपपरमाणुताम्।
प्रमाणीकर्तुमुद्युक्तः चरत्यद्यापि सर्वतः।। 8
एवंभूतं महात्मानं को वा वेत्ति महेश्वरम्।
तद्रुपपरमाणुत्वं धाता विन्दति विश्वधृक्।। 9
अन्यस्तु सज्जनो विन्दे नैव जानन्ति तत्वतः।
अतो यमादिभिर्नित्यं ध्यायन्ति ब्रह्मवादिनः।। 10
ब्रह्माण्डानि समस्तानि बीजानि परमात्मनः।
अतस्समस्तजीवात्मा परमात्मत्वतामियात्।। 11

संसारवृक्षो भवति आर्यशर्मा फलिष्यति।
अमृतद्रवसंयुक्तं फलं मर्त्येषु दास्यति।। 12
जीवबीजाद्विनिर्मुक्तं आर्यः स्थावरतां गतः।
फलभारविनम्रः सन्नास्ते स्थाणुरिवाधुना।। 13
अन्धाः पश्यन्ति न फलं वृक्षं वा नम्रशाखिनम्।
अन्धानां नयनं दातुं प्रापितो वैद्य एव सः।। 14
पिता यं कलिरित्याह स कलिर्मोक्षधर्मवित्।
कालरूपी प्रसरति स्वकार्यं स्थापितुं भुवि।। 15
ब्रह्माख्यजीवबीजस्तु विवेकामृतधारया।
स्थाने स्थिताः प्ररोहन्तु क्षेत्रस्थाः वृष्टिभिर्यथा।। 16
बीजो नैव चिरस्थः स्याज्जीर्णत्वाच्च प्ररोहति।
क्षामे तु भुञ्जते सर्वं घुणास्तं भक्षयन्ति हि।। 17
आधिव्याधिजराक्लेशैः जीवो नाशं समेष्यति।
कालेन च निरन्नेन तस्माज्जीवो न शाश्वतः।। 18
तस्माज्जीवत्वमुन्मुच्य वर्तिनां वः स्थिरात्मताम्।
फलवृक्षाभिसन्धानात् भवत्येव न संशयः।। 19
धर्मार्थकामोक्षांश्च फलानीत्यत्र निश्चितः।
जन्तुर्धर्मरतिं कृत्वा सन्मार्गमवलोकयेत्।। 20
आहारं चैव निर्हारं निद्रां मैथुनमेव च।
जन्तुत्वेन सहायाति धर्माद्यर्थास्तु यत्नतः।। 21
प्रत्यक्षं च परोक्षं च विषयो द्विविधो भवेत्।
विषयी जीव एव स्यात् स जीवो द्विविधः स्मृतः।। 22
इन्द्रियैर्यस्तु जानाति प्रत्यक्षविषयस्तु सः।
यः पश्येद्वेदशास्त्रार्थान् परोक्षज्ञः परोऽप्यसौ।। 23
अनर्थदाता प्रत्यक्षः अर्थदाता परः स्मृतः।
प्रत्यक्षं यो विजानाति सुखार्थी तं परित्यजेत्।। 24

सन्मार्गोलोकनादेव दुर्मार्गाच्च विमोचितः।
आयुष्मानिह संज्ञातो स्मृत्वायुष्मत्वमात्मनि।। 25
आत्मत्वं पितृतः प्राप्तं नामतः तु पितामहात्।
प्रपितामहतः प्राप्तं प्रकाशं सुमहद्यशः।। 26
रूपनामप्रकाशं तु पूर्वजैः प्रतिपादितम्।
अज्ञानं तु विना तत्र कोऽहमित्यभिधीयते।। 27
अहङ्कारनिवृत्तस्य जीवन्मुक्तस्य देहिनः।
नानाभेदविमुक्तस्य कृत्याकृत्ये कदाचन।। 28
जन्तुत्वं मर्त्यभावं च देवत्वमसुरत्वता।
विद्वत्ता मूढता चैव पुस्त्वं स्त्रीत्वं च षण्डता।। 29
क्षुत्पिपासा च शीतोष्णं बन्धमोक्षौ सुखासुखम्।
रागित्वं वा विरागित्वं समत्वं विषमत्वता।। 30
एते न बाधन्ते किंचिद् जीवन्मुक्तमनहङ्कृतिम्।
अहङ्कारस्थितं जीवमेते बाधन्ते सन्ततम्।। 31
अहङ्कारनिबद्धस्तु जीवः प्रत्यक्षमीक्षते।
परार्थैकान्तनित्यस्तु परोक्षमपि चेक्षते।। 32
अतीव चपला क्रूराः कुणपेष्वात्ममानिनः।
कौणपाः पापशीलाश्च सर्वप्राण्युपघातकाः।। 33
अहङ्कारपराधीनाः सत्यात्मापरिपन्थिनः।
अतीवसक्ताः श्रीभूम्योः नारायणपराङ्मुखाः।। 34
स्त्रैणाश्च स्वर्गहन्तारः तृप्तिभावविवर्जिताः।
महाशनाच्छिद्रपराः सत्यधर्मविघातकाः।। 35
प्रत्यक्षेण परान् घ्नन्ति परोक्षेणात्मघातिनः।
एवं भवन्ति जीवाश्च परलोकात्परिच्युताः।। 36
अनर्थानि समीक्षन्ते जीवाः प्रत्यक्षदर्शिनः।
जन्ममृत्युजराव्याधिदुर्भिक्षभयपीडिताः।। 37
उत्कण्ठाबोधदुःखैश्च पीडिताश्चन्यताडिताः।
इहामुत्र न लभन्ते क्षेममात्यन्तिकं सुखम्।। 38

आत्मात्मीयज्ञातिधनं येषां तु कुणपात्मकम्।
तेषां स्वरूपं दुःखं स्यात् असदात्माभिमानिनाम्।। 39
कुलविद्या च यन्माता कुलधर्मस्तु यत्पिता।
सत्कीर्तिरेव यद्भार्या सन्तोषो यत्सुतो भवेत्।। 40
तत्स्वरूपं सुखं विद्यात् सोऽपि मृत्युञ्जयो भवेत्।
येषां परोक्षे प्रत्यक्षं प्रत्यक्षे च परोक्षता।। 41
जायते ते परात्मानो जीवन्मुक्ता भवन्ति च।
आत्मात्मीयज्ञातिधनं येषां तु कुलभूषणम्।। 42
तेषां वैद्यत्वमायाति कालभीतिनिवर्तिनम्।
इत्येतद्वैद्यसाम्राज्यं यस्मिन् वसति सर्वदा।। 43
आर्यशर्मा स वैद्य स्यात् यथा नामार्थयोगतः।
सर्वेषामग्रजो नाम्ना वृत्या कुत्सितया भृशम्।। 44
वैद्यः सर्वकनीयस्त्वात् तस्माद्विधिनिषेधकः।
नाममात्रगुणो विद्यात् वृत्तिरत्यन्तकुत्सिता।। 45
तस्मान्नामसमुद्रगृह्य दोषाख्यां वृत्तिमुत्सृजेत्।
नामैव शोभनं विद्यात् तद्दीक्षावृत्तिरूच्यते।। 46
तदत्यन्तमसद्विद्यात् यथा सद्भावविस्मृतिः।
दिक्ष्वीक्षणं तु दीक्षा स्यात् सच्छाया दिक्षु वीक्ष्यते।। 47
अन्तर्ज्ञानं तु सद्विद्यात् बाह्यलोकमसद्भवेत्।
करामलकविद्विश्वं जीवाख्यं यत्र भासते।। 48
तत्र नित्यसुखं सत्यं तच्छाया दिक्षु भासते।
अन्तर्ज्वलितजीवस्य छायां बाह्ये विराजते।। 49
तच्छायया स्वं जानाति जीवोऽन्तस्तः परंत्विति।
बाह्यं परं विषयिणः विषयस्यान्तरं परम्।। 50
एवं परावलोकेऽर्थे स्वावलोकमनर्थदम्।
पराख्यजीवो भगवान् यथातत्वावलोकनात्।। 51

भावदोषाख्यकुहकं त्यक्त्वा प्रत्यक्षमीक्षते।
आत्मनात्मविवकेन भगवान् विश्वभावनः।। 52
विश्वरूपेण पुरतः सुस्वरूपो विराजते।
निरावृतः स्वराट् भूत्वा श्रीभूमिभ्यां समन्वितः।। 53
सत्वः सुखकरो नित्यं रवीन्दुज्वलनप्रभः।
अलोलुपश्च सम्पूर्णोः सर्वेषामुपकारकः।। 54
नानानर्थविनिर्मुक्तो नित्योत्साही दयानिधिः।
नानगुणैकनिलयः सर्वविघ्नविघातकः।। 55
ज्ञातृज्ञेयज्ञानगम्यः सच्चिदानन्दविग्रहः।
परावलोकनित्यस्य परोक्षो भगवान् हरिः।। 56
परमानन्दरूपेण प्रत्यक्षो भवति ध्रुवम्।
अस्मद्भावं भगवतः तदिन्द्रियविलोकनात्।। 57
अहंभावंविमूढस्तु आसुरं भावमीक्षते।
सद्भावं भगवद्रूपं वेददृष्ट्या विलोकनात्।। 58
अहम्भावविनिर्मुक्तो दैविकं भावमीक्षते।
एवं तु सदसद्रूपी लोकालोकमयः पुमान्।। 59
अन्तर्बहिररूपेण रूपेण च विराजते।
एवं जीवात्मनो रूपं द्वैतं संसारहेतुकम्।। 60
मूलत्रयो महावृक्षः यस्मिन्कालोऽधितिष्ठति।
जीवात्मैवाशुभः कालः परमात्मा शुभः स्मृतः।। 61
एवं कालद्वयेनात्मा महानस्तीति कथ्यते।
वेदान्तब्रह्मरूपस्य निमेषोन्मेषणात्मकः।। 62
परार्द्धद्वययुग्मोऽयं कालः सदसदात्मकः।
वेदान्तब्रह्मचलनं जीवत्वेन विराजितम्।। 63
भगवच्चलनं प्राहुरशेषनिगमाः सदा।।

इति
अज्ञानप्रकरणे जीवन्मुक्तानुभवकथनं नाम
त्रयोदशोऽध्यायः

त्रयोदशाध्यायस्य टिप्पणी

1. समाकीर्णः

समन्तादाकीर्णः समाकीर्णः। अकीर्णो नाम व्याप्तः। तत्पर्यायः (1) सङ्कीर्णं (2) सङ्कुलम् इत्यमरः। समाकीर्णमिति शब्दरत्नावली। यथा रघुवंशे - "आकीर्णमृषिपत्नीनामटजद्वाररोधिभिः।।" इति। जलादिभिर्निरवकाशाऽवकाशमिति भरत-।

2. संज्ञा

(1) चेतना, यथा कुमारसम्भवे -

"रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्ययः" इति।

(2) बुद्धिः, ज्ञानम्। यथा भागवते -

"गुरोर्नाधिकदः संज्ञां परीक्षन् भगवान् स्वराट्।

ध्यायन् धिया सुरैर्युक्तः शर्म नालभतात्मनः।।" इति।

(3) नाम, आख्या, यथा

"शोकसव्यवहारार्थं याः संज्ञाः प्रथिताः भुवि।

ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्यान्यशेषतः।।" इति मनुस्मृतौ। (4) गायत्री, सूर्यपत्नी इति मेदिनी। यथा मार्कण्डेये -

"मार्ताण्डस्य स्वेर्भार्या तनया विश्वकर्मणाः।

संज्ञा नाम महाभाग तस्यां भानुरजीजनत्।।" इति।

3. मुद्गः

प्रशस्तः, उत्तमः। "प्रकाण्डमुद्गतल्लजो प्रशस्तवाचकान्यमूनि" इत्यमरः।

4. प्रमाण्यम्

प्रमाणस्य भावः। प्रमाकरणत्वम्। यथा मार्कण्डेये -

"सत्यं भूतिहितार्थोक्तिर्वेदप्रामाम्यदर्शनम्।

गुरुदेवर्षिसिद्धर्षिपूजनं साधुसङ्गमः।।" इति।

5. परमाणुः

परम सक्वचरमकोऽणुः। पृथिव्यादिभूतचतुष्टयानां द्यणुकानामययवः। स च नित्यः निरवयवः ततः किमपि सूक्ष्मं नास्ति। यथा -

"नित्यानित्या च सा द्वेधा नित्यास्यादणुलक्षणा।
अनित्या तु तदन्या स्यात्सैवावयवयोगिनी।।" इति।
पारिमाण्डल्यनामकतत्परिमाणं तु न कस्यापि कारणम्। यथा -

"पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्।" इति । जलादिपरमाणुरूपस्य नित्यत्वम्। पार्थिवपरमाणुरूपस्यानित्यत्वम्। यथा भाषापरिच्छेदे-

"जलादिपरिमाणे तन्नित्यमन्यत्सहेतुकम्" इति। तैरेव परमाणुभिराद्युपादानैद्यणुकत्र सरेण्वादिक्रमेण स्थूलक्षितिजलतेजोमरुतः सृजति परमेश्वरः। प्रलये अतिस्थूलस्थूलनाशानन्तरें परमाणुक्रियाविभागपूर्वसंयोगनाशादिक्रमेण द्वयणुकनाशात्तिष्ठन्ति परमाणव एवेति। यथा - "दोधूयमानात्तिष्ठन्ति प्रलये परमाणवः" इति प्राचीनकारिका। सतः प्रपंचस्य परमाणुतां परमाण्ववस्थां यो भुङ्क्ते स एव कालः परमाणुः तस्यैवाविशेषं साकल्यं यो भुङ्क्ते स कालः यो भुङ्क्ते स परममहत्।

6. चतुर्दशमहाविद्या

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश।।" इति शास्त्रेक्तम्।

7. ब्रह्माण्डानि

ब्रह्मणो जगत्स्रष्टुरण्डम्। चतुर्दशभुवनगोलकः। यद्वा ब्रह्मणा विश्वसृजा कृतमण्डम्। भुवनकोषः। विश्वगोलकः। यथा -

"ब्रह्मण्डवचनाख्यानां श्रूयतां सावधानतः।
ब्रह्माण्डरनार्थं च भक्ताः जानन्ति यत्नतः।।" इति। ब्रह्माण्डगोलम यथा -

"भूर्भूधरत्रिदशदानवमानवाद्याः
ये याश्च धिष्ण्यगगने चरचक्रकक्षा।
लोकव्यवसितिरूपर्णुपरिप्रविष्ठा
ब्रह्माण्डभाण्डजठ तदिदं समस्तम्।।

महादानविशेषः। यथा -

"अथातः संप्रवक्ष्यामि ब्रह्माण्डविधिमुत्तमम्।
यच्चेदं सर्वदानानां महापातकनाशनम्।।" इति।

8. कलिः

(1) कलते, कलेराश्रयत्वेन वर्तते इति। (1) विभीतकवृक्षः। विभीतकस्य कलिद्रुमत्वकारणमुक्तं यथा -

"इत्येवमुक्तो देवेन ब्रह्मणा कलिरव्ययः।

दीनान दृष्ट्वा च शक्रादीन् विभीतकवनं ययौ।।" इति। (3) कलते स्पर्धते इति कलिः। शूरः। यद्वा कलन्ते स्पर्धमानाः अस्मिन् भाषन्ते अस्मिन्निति। (4) विवादः, यथा -

"तासां कलिरभूद्भूयांस्तदर्थेपोह्य सौहृदम्।

समानुरूपो नायं वः इति तद्गतचेतसाम्।।" इति। (5) युद्धम्। कलयते पापेषु निक्षिप्यते अनेन। यद्वा कलयति पापेन जडयति कलुषितं करोति। अन्त्ययुगमिति हेमचन्द्रः।

9. जरा

(1) जीर्यत्यनया इति जरा। वार्द्धक्यं, विस्रसा, वयःकृतश्लथमांसाद्यवस्थाभेदः, कालकन्या

"कालकन्या जरा साक्षात् लोकस्तां नाभिनन्दति।

स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः।।" इति भागवतम्। (2) क्षीरकावृक्षः राक्षसीविशेषः।

"अन्यस्यामपि भार्यायां शकले द्वे बृहद्द्वयात्।

ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धते।।" इति भागवतम्।

10. निर्हारः

(1) निघातशल्यादेरुद्धरणे। (2) मलमूत्रादित्यागे,

"आहारनिर्हारविहारयोगाः सुसंवृता धर्मविदा तु कार्याः" इति शास्त्रोक्तिः (3) प्रेतदेहस्य दाहार्थं बहिर्नयने (4) यथेष्टविनियोगे च"

"न निर्हारं स्त्रियः कुर्युः कुटुम्बात् बहुमध्यमात्।

स्वकादपिच वित्ताद्वि स्वस्य भर्तुरनाज्ञया।।" इति मनुः

11. मैथुनम्

(1) मिथुने सम्भवतीति मैथुनम्। यद्वा मिथुमस्येदम्। अग्न्याधानम्। यथा मनुशतौपतौ -

"असपिण्डा च या मातुरसगोत्रा च या पितुः।

सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने।।" इति। मैथुने मिथुनशब्दवाक्ये स्त्रीपुंससाध्ये अग्न्याघानपुत्रोत्पत्यादौ इत्युदाहृतम्। (2) सङ्गमः, रतमिप्यर्थः। "सङ्गतिः सङ्गमो दारसंयोगः विवाह इति कलिङ्गः। रतं सुरतम्। अनोर्मैथुनम् इति तट्टीकायां भरतः। (3) अभिमानितम् (4) संप्रयोगः (5) अनारदम् (6) अब्रह्मचर्यकम् (7) उपसृष्टं (8) त्रिभद्रम् (9) क्रीडारत्नम् (10) महासुखम् इति त्रिकाण्डशेषः।

तस्य गुणस्तु धातुक्षयकारित्वम्। रति सन्तानदातृत्वं च। अतिशयमैथुनमस्य। श्वासकासः ज्वरकारित्वम्। अमैथुनस्य च प्रमेहमेदग्रन्थिरोगाग्निमाद्यकारित्वम्।

12. कृत्यम्

(1) कार्यम्। यथा, गोः रामायणो

"तथा स राक्षसीरुक्ता राक्षसेन्द्रः प्रतापवान्।

निश्क्रस्यान्तः पुरात्तस्थौ किं कृत्यमिति चिन्तयन्।।" इति। (2) प्रयोजनमिति हेमचन्द्रः।

13. रागित्वम्

रागः अस्यास्तीति रागी तद्भावः रागित्वम्। रागित्वं नाम (1) अनुरक्तः। यथा मार्कण्डये -

(2) कामुकः इति विश्वः। (3) विषयानुरागयुक्तः। स च द्विविधः। यथा देवी भगवते-

"द्वैविध्यं सर्वलोकेषु सर्वत्र द्विविधो जनः।

विरागी द्विविधः कामं ज्ञातो ज्ञातश्च मध्यमः।।" इति।

रागी च द्विविधः प्रोक्तो मूर्खश्च चतुरस्तथा।

"रागी यस्यास्ति संसारे स रागीत्युच्यते ध्रुवम्।

दुःखं बहुविधं तस्य सुखं च विविधं पुनः।।" इति। (4) रक्तवर्णविशिष्टः। यथा कथासरित्सागरे -

"ईर्ष्यारुषामभावेऽपि भङ्गुरभ्रुणि रागिणि।

न सुखे तत्तयोः राज्ञोस्तद्दृष्टिस्तृप्तिमाययौ।।" इति।

14. विरागित्वम्

(1) विगतो रागो विषयवासना यस्येति विरागः। विरागः अस्यास्तीति विरागी, तद्भावः विरागित्वम्। विराग इत्यस्य। वीतराग इति अर्थोपि विद्यते। यथा भगवते -

(2) अनुरागः (3) रागशून्यः (4) विविधवर्णविशिष्टः।

15. विषमत्वम्

विषमस्य भावः विषमत्वम्। (1) असमानम्। यथा मनुः -

"भ्रातृणामविभक्तानां यद्युत्थानं भवेत् सह।

न तत्र भागं विषमं पिता दद्यात् कथंचन।।" इति। दायत्वम्। (2) सङ्कटः। यथा गीतायाम् -

(3) अनतिक्रमणीयः। यथा सहित्यदर्पणे -

"का विषमा दैवगतिः किं द्रुर्ग्राह्यं जनः खलो लोके।" इति।

16. कौणपः

कुणपस्त्रिधातुकं शरीरं शवो वा, तं भक्षयितुं शीलमस्य। राक्षस इत्यमरः। यथा महाभारते -

"पिच्छलः कौणपश्चक्रः कालवेगः प्रवालनः।

हिरण्यवाहः शरणः कक्षकः कालदण्डकः।।"

एते वासुकिना नागाः प्रविष्टः हव्यवाहने।" इति।

17. पापशीलः

पापः शीलं यस्य सः पापशीलः। पापयुक्तः। यथा -

रुधिरौघप्लुताः केचित् केचित्कर्दमभूषितः।

केचिद् केचित्कृशङ्गाश्च पथि गच्छन्ति पापितः।।"

18. उपघातकः

उपघातं करोतीति उपघातकः (1) उपहन्यते अनेन इति। रोग इति राजनिघण्टुः (2) विनाशः। यथा -

"तथात्वं चेदिन्द्रियाणमुपघाते कथं स्मृतिः।" इति भाषा परिच्छेदे। "स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च" इति मनुः।

19. पराधीनः

परस्य परेषां वा अधीनः। परवशः। तत्पर्यायः - परतन्त्रः, परवान्, नाथवान् इत्यमरः। तस्य जीवन्मृतत्वं यथा -

"स्वाधीनवृत्तेः साफल्यं न पराधीनवृत्तिता।
ये पराधीनकर्माणो जीवन्तो पि च ते मृता।।" इति।

20. परिपन्थी

परि सर्वताभावेन दोषाख्यानपन्थयितुं शीलमस्येति परिपन्थी। शत्रुः इत्यमरः। यथा गीतायाम् -

"इन्द्रियस्यन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ।।" इति। प्रतिकूलाचारी। यथाह कश्चित् -

"अपराधिनि चेत्क्रोधः क्रोधे क्रोधः कथं नहि।
धर्मार्थकाममोक्षाणां चतुर्णं परिपन्थिनि।।" इति।

21. पराङ्मुखः

(1) पराक् पतिलोमानि मुखं यस्य सः पराङ्मुखः। विमुखः। तत्पर्यायः- पराचीनः इत्यमरः। यथा मनुः -

(2) "स्वधर्मो विजयस्तस्य नाहवे स्यात्पराङ्मुखः।" इति।

(3) तन्त्रोक्तमन्त्रविशेषेक। यथा तन्त्रसारे -

"कामबीजमुखे माया शिरस्यङ्कुशमेव च।
असौ पराङ्मुखः प्रोक्तो मध्ये तु बिन्दुकच्छितः।।"

22. परिच्युतः

परितः च्युतः परिच्युतः।

23. दुर्भिक्षम्

भिक्षायाः अभावः। भिक्षायाः अप्रत्पिकालः। अकाल इति भाषा। यथा - "दुर्भिक्षमल्पं स्मरणं चिराय" इत्युद्भटः। भिक्षायाः प्रायो निष्फलत्वमिति अव्ययीभावसमासः। यद्देशे यत्काले तद्देशतत्कालयोग्यसस्यादिकं न जायते तद्देशे तदा याच्यमानद्रव्याभावात् दुर्भिक्षं जातमिति व्यवह्रियते सद्भिरिति।

24. क्षेमम्

(1) कुशलम्। यथा मनुः -

"ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।

वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च।।" इति। (2) तद्वतीत्यमरः। (3) लब्धारक्षणमिति मेदिनी। (4) मोक्ष इति हेमचन्द्रः।

25. मृत्युञ्जयः

मृत्युं जयतीति मृत्युञ्जयः। महादेव इत्यमरः।

"कतिधा मृत्यु कन्यानां ब्रह्मणां कोटिशोलये।

काले न लीनः शम्भुश्च सत्वरूपी च निर्गुण-।।

मृत्युकन्या जिता शश्वत् शिवेन गुरुणा मम।

न मृत्युना जितः शम्भुः कल्पे श्रुतौ श्रुतम्।।" इति पुराणे।

26. उत्साही

उत्साहः अस्य अस्तीति। उद्यमः, अध्यवसायः, सूत्रम्, कल्याणम्, भावविशेषः

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।

जुगुप्सा विस्मयश्चेत्थंमष्टौ प्रोक्ता शमाऽपि च।।" इत साहित्यदर्पणे। ध्रुवकविशेषः,

"उत्साहः स्याद्रसे हास्ये ताले केन्दुससंज्ञके।

वंशवृद्धिकरः पादस्त्रयोदशमिताक्षरा।।" इति सङ्गीतदामोदरः।

27. दयानिधिः

दयायाः निधिः दयानिधिः। दया करुणा, अस्याः लक्षणं यथा पाद्मे क्रियायोगसारे

"यत्नादपि परक्लेशं हर्तुं या हृदि जायते।
इच्छाभूमि सुरश्रेष्ठ! सा दया परिकीर्तिता।" इति। अपि च मत्स्यपुराणे -
"आत्मवत्सर्वभूतेषु यो हिताय शुभाय च।
वर्तते सततं हृष्टः क्रिया ह्येषा दया स्मृता।।" इति। इयं हि शक्तीनामन्यनामन्यतमः। यथा देवीभागवते -
"श्रद्धा मेधा स्वहा स्वाधा क्षुधा निन्द्रा दया मतिः।
संस्थिताः सर्वतः पार्श्वे महादेवाः पृथक् पृथक्।।" इति।

28. अशुभम्

न शुभम्, न तत्पुरुषः। नास्ति शुभं यस्येति समासे वाच्यलिङ्गः। पापम्, अमङ्गलम्
"अशुभं सज्जनं दृष्ट्वा देवब्राह्मणपूजनम्।
दानं कुर्वति कुर्याच्च स्नानं सर्वोषधीजले।।" इति तिथ्यादितत्वे।

29. परार्धम्

परादर्ध्यति सर्वोत्कृष्टतया वर्द्धते इति। दशमध्यसंख्या। लक्षलक्षकोटिः (100000000000000000)। इयं चरमसंख्या अष्टादशाङ्गपर्यन्तम्। इति हेमचन्द्र- ज्योतिषश्च। यथा नैषधे -
"यदि त्रिलोकी गणनापरा स्यात्
तस्याः समाप्तिर्यदि नायुषः स्यात्।
पारे पार्द्धं गणितं यदि स्यात्
गणेयनिश्शेषगुणोऽपि स स्यात्।।" इति। ब्रह्मणः आयुषोर्धम्। यथा -
"निजेन तस्य मानेन चायुर्वर्षशतं स्मृतम्।
तत्पराख्यां तदर्धं च परार्धमभिधीयते।।" इति कूर्मपुराणे। तथा मार्कण्डेये -
"शतं हि तस्य ब्रह्मणः वर्षाणां परमित्यभिधीयते।
पंचाशद्भिस्तथावर्षैः परार्द्धमिति कीर्त्यते।।
एवमस्य परार्द्धन्तु अतीतं द्विजसत्तम।
यस्यान्ते भून्महाकल्पः पद्म इत्यभिविश्रुतः।।" इति।

30. निगमाः

(1) निगमे पुर्यां भव इति निगमः। (2) वाणिजः (3) निगम्यतेऽत्र इति व्युत्पत्या पुरी इत्यर्थः। (4) निगम्यते ज्ञायते येन इति निगमः वेदः। यथा देवीभागवते -

"कथङ्कारं वाप्यः सकलनिगमागोचरगुण-

प्रभावः स्वं यस्मात् स्वयमपि न जानासि परमंम्।" इति। वणिक्पथः। (5) निश्चयः, यथा "तस्या एव प्रतिज्ञयां हेतुभिर्दृष्टान्तोपनयर्निगमैः स्थापना।।" इति चरके (6) अध्वा इति हेमचन्द्रः। (7) उपदेशः। यथा भागवते -

त्रयोदशाध्यायस्य सारः

जीवन्मुक्तानुभवकथननामकेऽस्मिन्नध्याये जीवन्मुक्तस्य लक्षणं प्रतिपादितम्। इतरेष्वध्यायेष्विवात्रापि विषयाणां विकीर्णत्वं दृश्यते। तत्र तत्र च मुख्यविषयं विहाय जीवात्मापरमात्मनिरूपणं, प्रपंचोत्पत्तिप्रभृतीनामन्यविषयाणामपि उल्लेखनं कृतवान् कविः।

"सर्वत्र समाकीर्णः जीवस्य प्रकाशभूतं पार्वतीपरमेश्वररूपं तेजः मङ्गलायास्तु इति मङ्गलाचरणपूर्वकमध्यायः प्रारभ्यते। तत्र प्रथममेव जीवात्मनः निरूपणं क्रियते। प्रपंचोऽयं सद्रूपेण भासते, बुद्धिस्वरूपं महत्तु साक्षिरूपेण वर्तते। प्रपंचः विषयः। दिग्देशाद्यैरवच्छिन्नं सत्यं विषयी। तत्सत्यमेव जीवात्मा इत्युच्यते। परमात्मनः प्रमाणं भवति जीवात्मा। मायावच्छिन्नस्य परमात्मनः जीवाख्यः परमाणुरेवायं लोकः। एतादृशाः चतुर्दशलोकाः प्रसिद्धाः भवन्ति। सरूपे अस्मिन् लोके अरूपः ईश्वरः साक्षिरूपेण बोधबोध्यरूपेण च विराजते। स्वयं प्रमाणीकर्तुं सर्वत्र चरन्तं महेश्वरं ज्ञातुं न कोऽपि शक्तो भवति। महेश्वरस्य परमाणुत्वं विधाता एव जानाति। महेश्वरस्य महद्रूपं तु सन्तः एवाभिजानन्ति। एकस्यैव परमात्मनः जीवरूपाणि भवन्ति समस्तानि ब्रह्माण्डानि। अत एव सर्वोपि जीवात्मनः परमात्मतां प्राप्नुवन्ति।

जीवन्मुक्तः पुरुषः स्थावरतां प्राप्य अमृतरूपं फलं प्रददाति। संसारिणस्तु मोहान्धाः सन्तः चतुर्वर्गरूपफलप्रदायिनं तं संसारवृक्षं, तत्फलं वा न पश्यन्ति। ज्ञानरूपं नयनं तेभ्यो दातुं जीवन्मुक्तः एव प्रभवति।

यथा उचिते स्थाने निक्षिप्तानि बीजानि वृष्टिभिः प्ररोहन्ति तथैव शास्त्रविवेकेन जीवमूलस्य ब्रह्मणः बोधः समुत्पद्यते। जीवानां तु जीवत्वं न स्थिरस्वभावम्। नानाविधैः क्लेशैः जीवः अतीव परितप्यते। तस्माज्जीवत्वप्रापणेनैव स्थिरतांमधिगच्छन्ति पुरुषाः। आहारनिर्हारनैथुनादयः प्राणिधर्माः भवन्ति। पुरुषार्थस्तु यत्नेनैव लभ्यन्ते।

पूर्वपरामृष्टंः प्रपंचरूपः विषयः तु प्रत्यक्षपरोक्षभेदेन द्विविधा भवति। विषयी जीवः। तस्यापि द्वैविध्यमुक्तम् प्रात्यक्षज्ञः परोक्षज्ञश्चेति। परोक्षज्ञः पर इत्यपि व्यवह्रियते।

"आत्मा वै पुत्र नामासि" इति वाक्येनात्मत्वं पितृतः प्राप्नोति। पितामहात्संज्ञां प्रपितामहाद्यशश्च लभते। एवं नामरूपप्रकाशादीनि पूर्वपितृभ्यो समागतानि भवन्ति। यद्यैतत् सत्यं हृदि स्फुरति तर्हि "कोऽहम्" इति चिन्ता मनसि समुदेष्यति। अनया चिन्तया चाहङ्कारविमुक्तश्च भवति। स च जीवन्मुक्तः इति कथ्यते। जीवन्मुक्तस्य पुरुषस्य सर्वेष्वपि वस्तुषु समदर्शितत्वम् विद्यते। विद्वत्ता-मूढता-स्त्रीत्व-पुंस्त्व-षण्डत्वादिविनिर्मुक्तं तमहंकृतिर्न बाधते। क्षुत्पिपासाशीतोष्ण-सुखदुःखादीनां पीडनां सोऽपि न विधेयो भवति। अत एव जीवन्मुक्तः पुरुषः दुःखहीनः सन् वर्तते।

अहंकारस्थितं प्रत्यक्षज्ञं पुरुषं स्त्रीपुंरुत्वादि भावाः बाधन्ते। अहंकारपराधीनास्ते सत्यात्मविरोधिनो भवन्ति। परमात्मपराङ्मुखाः एते भोग्यविषयेषु अत्यासक्ताः दुःखमनुभवन्ति। ते च च्छिद्रपराः भूत्वा प्रत्यक्षेण परान्, परोक्षेणात्मानं च नाशयन्ति। एवं प्रत्यक्षदर्शिनः जीवाः अनर्थानेव पश्यन्ति। तेषां च नानाविधक्लेशानुभवेन कदापि आत्यन्तिकसुखप्राप्तिः न जायते।

स्वधर्मानुष्ठानपराणां सुखं भवति। तस्माद्यः कुलविद्यां मातेव परिगणयति, यस्य च कुलधर्मः पिता, यस्य कीर्तिः कान्ता, सन्तोषश्च सुतः सैव आत्यन्तिकं सुखमनुभवति। एवं च परोक्षे प्रत्यक्षं, प्रत्यक्षे च परोक्षं पश्यति सैव जीवन्मुक्त इति ग्रन्थकर्तुरभिप्रायः।

इत्थं जीवन्मुक्तस्य लक्षणमुक्त्वा जीवन्मुक्तरूपेणात्मानं प्रकाशयति कविः। येषांमात्मात्मीयज्ञातिधनार्थद्योतकं स्वं कुलभूषणं तेषां तेषां वैद्यत्वं समायाति। यद्यपि प्रसिद्धे वैद्यकुटुम्बे जन्म लेभे तथापि ग्रन्थकर्ताऽयं वैद्यः, अन्यशास्त्रेषु च नातिनिपुणः इति स्वयं विनयभावं प्रस्तौति। नाम्नैव सः वैद्यः आसीत्, न तु वृत्या इति प्रस्तावः

अक्षरार्थत्वेन स्वीकर्तुं न शक्यते। दीक्षा एव वृत्तिरित्युच्यते इति तस्य मतिः। दिक्षु ईक्षणं दीक्षा इति पदस्य व्युत्पत्तिः। सा च दीक्षा सद्भावविस्मृतिजनत्वात् असत् भवति। सद्रूपस्य परमात्मनः छायानिरीक्षणमेव दीक्षा इति कथ्यते। ज्ञानमेव सत्। असत् तु प्रपंचः।

यस्य हृदये करतलामलकवद्विश्वं भासते तत्र नित्यसत्यं प्रकाशते। तदेव परमात्मा। तस्यैव छाया लोके नीलिमारूपेण प्रसरति। छायया तु परमात्मानं ज्ञातुं वयं शक्नुमः। आत्मानात्मविवेकेन, रागद्वेषादीनामुपरमेण च भगवन्तं साक्षात्कर्तुं प्रभवति शास्त्रतः। प्रकाशरूपः परमात्मा स्वराट् भूत्वा अलोलुपः सम्पूर्णः सन् सर्वेषांमुपकाराय सुखाय च वर्तते। स एव च नानानर्थविनिर्मुक्तः, कृपासागरः ज्ञातृज्ञेयगम्यः, सच्चिदानन्दविग्रहः परोक्ष हरिः इत्युच्यते। एतादृशं सद्भावं दैविकं भगवद्रूपंमहम्भावविनिर्मुक्तैः वेदचक्षुषा द्रष्टुं शक्यते। अन्ये अहंभावपराधीनाः आसुरं भावमेव पश्यन्ति। एवं सदसद्रूपो परमात्मा अन्तर्बहिरूपेणारूपेण च प्रकाशते। तदेव संसारहेतुकं द्वैतं जनयति।

अध्यायावसाने कालस्य माहात्म्यं निर्धारयति कविः। कालस्तु सात्विक-राजस-तामसगुणान्वितं संसारवृक्षमधितिष्ठति। तत्र तु जीवात्मा अशुभः कालः, परमात्मातु शुभः। एवं जीवात्मापरमात्मनोः शुभाशुभकालरूपेण कल्पना क्रियते।

महाप्रलये केवलब्रह्ममेवावतिष्ठते। द्विपरार्धकालानन्तरं, प्रपंचविधानार्थं भगवानीषणक्रियां स्वीकृत्य, त्रैलोक्यपरिमाणार्थं मायां संचालयति। तच्चलनात् जगदुत्पद्यते। अयमेवाशयः नारायणीयेऽपि दृश्यते। तद्यथा-

"एवं च द्विपरार्द्धकालविगता वीक्षां सिसृक्षात्मिकां
बिभ्राणे त्वयि चुक्षुभे त्रिभुवने भवाय माया स्वयम्।
मायातः खलु कालशक्तिरतुलादृष्टं स्वभावोऽपि च
प्रादुर्भूय गुणान् विकास्य विदधुस्तस्या सहायक्रियाम्।।" इति।

चतुर्दशोऽध्यायः

अज्ञानकल्पे नित्यशरीरप्रतिपादनम्

यस्मात्सदसदुत्पन्नः कालमायात्मको महः।
द्वैतो जीव इति ख्यातो तमेवार्यः प्रशंसति।। 1
सर्वत्र वासनारूपी तु व्यक्तोव्यक्त एव च।
अनाद्यनन्तो यो जाग्रन्नपूर्व इति संज्ञितः।। 2
प्रणाचार्यस्तु तं वेत्ति तस्माद्वैद्य इति श्रुतः।
आर्यशर्मेति विख्यातः कालमुल्लङ्घ्यवर्तते।। 3
यस्मात्कालश्च वेदश्च जीवश्च समभूत् पुरा।
अन्तर्भूतं तमधुना आयुष्मानिह पश्यति।। 4
कालात्मा चैव जीवात्मा वेदात्मा यत्र लीयते।
तमेवानुभवन्नित्यमायुवेदविदीक्षते।। 5
द्रष्टा पश्यति सर्वाणि दर्शनात् सोऽनुमीयते।
तस्माददृष्टो द्रष्टा स्यादिति कैश्चन कथ्यते।। 6
अन्तर्दृष्ट्यावलोकेन वैद्यस्तं स्पष्टमीक्षते।
शास्त्रदृष्ट्यावलोकेन किमस्पष्टं भविष्यति।। 7
अपूर्वजः कनिष्ठः स्यात् पूर्वजं तमिहोच्यते।
तदप्यपूर्वं भवति पूर्वजोऽभूदपूर्वजः।। 8
वैद्यस्त्वपूर्वाद्भवति अपूर्वोऽप्यनुभूयते।
पश्यत्यपूर्वं सर्वत्र बभूवापूर्व एव सः।। 9
कालज्येष्ठोभयात्मत्वात् कनीयान् सोऽपि ज़ायते।
ज्येष्ठत्वं च कनिष्ठत्वं च कालस्यैव भवेद्ध्रुवम्।। 10
वेदजीवौतु तन्मध्ये वर्तेते कालकिङ्करौ।
कालात्सर्वं प्रभवति काले सर्वं प्रलीयते।। 11

काल एव परो ज्ञेयः कालो वेत्येव तत्परम्।
अपूर्ववैद्यः कालः स्यात् प्राणाचार्य स एव च।। 12
इदानीमार्यशर्मेति विख्यातो वैद्य एव सः।
अदृष्टोद्भवकालेस्मिन्नदृष्टोऽन्तर्दधे पुनः।। 13
तस्मात्कालो द्विधाभूतो दृष्टादृष्टविभेदतः।
द्विपरार्द्धस्तु दृश्यं स्याददृश्यस्तद्वदेव च।। 14
यथा सूर्याद्दिवारात्रं तथा कालाल्लयोदयः।
यथेह बाह्य दृष्टीनां भास्करेणावलोकनम्।। 15
तथैवान्तरदृष्टीनां कालमाया प्रकाशते।
द्विपरार्धं दिनं विद्यात् परस्मिन् कल्पितात्मनाम्।। 16
द्विपरार्द्धं तु रजनी भवेदायुष्मतां नृणाम्।
एको जीवात्मनः कल्पः दिनं स्यात् परमात्मनः।। 17
परावलोकनादात्मा परोपरि समाप्यते।
जीवात्मा तु विराट् प्रोक्तः परमात्मा स्वराट् स्मृतः।। 18
तयोराश्रयवृक्षः स्यात् साम्राट् जीवः परिच्युतः।
विराट् ब्रह्म स जीवाख्यो लोकपालात्परः स्मृतः।। 19
तत्परश्च स्वराट् विष्णुः परमात्मपरायणः।
परात्परः कालरूपी जीवन्मुक्तः स्थिरीकृतः।। 20
स्थाणुः सर्वाश्रयतरुः स शिवः शिवदो नृणाम्।
विराट् ब्रह्म स्वराट् विष्णुः सम्राट् शिव उदाहृतः।। 21
विषयी च परः साक्षी ब्रह्मविष्णुर्महेश्वराः।
आत्मानां विषयीकृत्य विषयो यत्र राजते।। 22
स विराडिति विज्ञेयः स्रष्टा बाह्यवलोकनः।।
स्वस्मिन्नात्मतया यस्य कुक्षौ सर्वं विराजते।। 23
स्वराट् स्वस्मिन् प्रकाशत्वादन्तर्दृष्ट्यावलोक्यते।
समं राजति सर्वत्र बाह्यान्तर्भाववर्जितः।। 24

सर्वेषां विषयः कालः कालस्य विषयो न च।
काले सर्वाणि पश्यन्ति कालः कं नापि पश्यति।। 25
प्रतिकूलानुकूलाभ्यां सर्वत्रैकः प्रकाशितः।
आत्मा मातेति विख्यातः कालो लोकः शिवे वशी।। 26
साक्षात्कारान्तरो बाह्ये यः प्रकाशं प्रपद्यते।
वेदो जीवश्च तद्द्रष्टा जीवात् वेदात् परस्तु सः।। 27
सोऽयं निर्विषयः कालो निर्गुणश्च गुणप्रदः।
अज्ञानी ज्ञानदः सूक्ष्मः स्थूलं यस्माद्विराजते।। 28
अदृष्टिर्दर्शनात्प्राप्तो निश्रोत्रश्रवणःप्रियः।
निर्जीवो जीवदाता स्यान्निर्गन्धो गन्धदायकः।। 29
नीरसो रसदाता च निस्पृहः स्पर्शनप्रदः।
अपादः पाददाता स्यादकरश्च करप्रदः।। 30
अयोनिः सर्वयानिः स्यादवाक् सर्ववचस्तु सः।
अरूपः सर्वरूव्पस्याद् निस्वः सर्वस्व एव च।। 31
निर्वेदः सर्ववेदोऽयं अद्वैतो द्वैतदः प्रभुः।
सर्वेषां जीवभूतोऽपि निर्जीवः स महेश्वरः।। 32
अनामा सर्वनामा स्यादनन्तोऽन्तकरः सदा।
अगृध्नुः सर्वगृध्नुः स्यादपालः सर्वपालकः।। 33
अकामः सर्वकाम स्यादभावः सर्वभावदः।
नानागुणैकनिलयः शङ्करो निर्गुणः स्मृतः।। 34
इत्थं परोक्षप्रत्यक्षं निर्गुणं गुणभाजनम्।
शरीरं सद्गुणावासं असत्तं धर्मसाधनम्।। 35
शरीरं कालरूपं स्यादभावं भावकारणम्।
परोक्षादेवसम्भूतं न भूतैरिह निर्मितम्।। 36
बोधादत्र समुद्भूतं बोधो महदद्भूतम्।
अपूर्वमात्मनः पृष्ठमगोचरमदृष्टितः।। 37

पृष्ठावलोकिनामेतत् भूतात्मकमिदं वपुः।
धर्मैकं सत्यमत्यन्तंसुखदं सच्चिदात्मकम्।। 38
वेद्यं पवित्रमोङ्कारं ऋग्सामयजुरेंव च।
शरीरमेतज्जानाति आयुष्मानार्यसंज्ञितः।। 39
अज्ञानोत्थमिदं ज्ञानं ज्ञानोत्थं ज्ञानखण्डनम्।
सन्मार्गवर्तनादेतन्निर्मितं त्वार्यशर्मणा।। 40
परोक्षवादं प्रत्यक्षं चतुर्वर्गफलप्रदम्।
अल्पायासमहामोहं मार्गान्धं तम एव च।। 41
विवेकमार्गमार्तण्डं कर्ममार्गस्य देशिकम्।
अनेकवेदशास्त्रर्थसिद्धान्तं सार्वधार्मिकम्।। 42
नानावर्णाश्रमाचारं वेद्यवैद्येन निर्मितम्।
कालदोषहरं पुण्यमाधिव्याधिनिबर्हणम्।। 43

इति
अज्ञानकल्पे नित्यशरीरप्रतिपादनं नाम
चतुर्दशोऽध्यायः

चतुर्दशाऽध्यायस्य टिप्पणी

1. उत्पन्नः

उत्पत्तिविशिष्टः, जातः, उद्भूतः।

2. जाग्रता

जागर्ति इति। जागरणविशिष्टः। यथा -

"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाग्रजाग्रत्फणी-
स्फूर्जत्रफुत्कृतिभीतिसंभृतचमत्कारस्फुरत्संभ्रमाः।" इति काव्य चन्द्रिका।

जागरणम्, यथा मनौ

"एवं च जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरम्।
सञ्जीवयति चाजसं प्रमापयति चाव्ययः।।" इति।

3. आयुष्मान्

(1) चिरं जीवी (2) दीर्घायुः। तत्पर्यायः - जैवातृक इत्यमरः। यथा -

"आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने"

"आयुष्मन्तं सुतं सूते यशो मेधासमन्वितो" इति च। (3) विष्कम्भादिसप्तविंशतियोगान्तर्गततृतीययोगः। तत्र जातकफलम्-

"यस्मायुष्मान् जन्मकाले धनुष्मान् याने यानं यस्य देशेषु कार्यम्।

कुर्यान्नूनं क्रीडनं पुष्पवाट्यां दासैवासरेन्वितो गर्वितश्च।।" इति दीपिका।

"आयुष्मान् सत्ववान् साध्यो द्रव्यवानात्मवानपि।" इति सुश्रुतः।

4. अपूर्वः

नास्ति पूर्वः यस्य सः अपूर्वः। न पूर्वः न समासः। आश्चर्यम्। यथा -

"अपूर्वोयं हरेर्माया त्रिगुणा रज्जुरूपिणी।

यया मुक्तो न चलति बद्धो धावति धावति।।" इति उद्भटः।

पूर्वदिग्देशकालभिन्नम्।

5. अपूर्वम्

नास्ति पूर्वं पूर्वकालभवं दृष्टं यस्य तत्। कर्मजन्यमदृष्टम्। तत्पर्यायः - अनुशयः, नियोगः, अतिशयः, कार्यं, प्रयोगः इति स्मृतिः। चतुर्विधं यथा - फलापूर्वं, उत्पत्यपूर्वं, अङ्गापूर्वम्। येन स्वर्गः आरभ्यते तत् फलापूर्वम्। अमावास्यां त्रयाणां योगानामेकः समुदायः, पौर्णमास्यामपरः तयोर्भिन्नकालवर्तिनोः संहत्य फलापूर्वारम्भायोगात्तदारम्भाय समुदायद्वयजन्ममपूर्वद्वयं कल्पनीयम्। तयोरेवैकस्यारम्भाय एकैकसमुदायवर्तिनां त्रयाणां योगानां भिन्नक्षणवर्तित्वेन संघातापत्याभावात् यागत्रयजन्यनि त्रीणि उत्पत्यपूर्वाणि कल्पनीयानि।

6. किङ्करः

किंचित्करोति। दासः इत्यमरः। यदुक्तं पुराणे-

"विप्रास्य किङ्करो भूपो वैश्यो भूपस्य भूमिपः।

सर्वेषां किङ्कराः शूद्राः ब्राह्मणस्य विशेषतः।।" इति।

7. भास्करः

भाः करोतीति भास्करः। सूर्यः। तदुक्तम् -

"प्रतिगृह्योप्सितं दण्डमुपस्थाय च भास्करम्।

प्रदक्षिणं परीत्याग्निं चरैर्भक्ष्यांयथाविधिः।।" इति। अग्निः, वीरः, अर्कवृक्षः, ब्रह्मसूत्रभाष्यकृत्भास्करभट्टः, भारकराचार्यः। स च सिद्धान्तशिरोमण्यादिज्योतिषग्रन्थकर्ता।

8. रजनी

रात्रिः,

"सा व्युष्ट्वा तत्र पितुर्वेश्मनि भामिनी।

विश्रान्ता मातरं राजन् इदं वचनमब्रवीत्।." इति महाभारते। हरिद्रा,

"हरिद्रा पीतिका गौरी काञ्जनी रञ्जनी निशा।

"अस्याः सुराधीशदिशः पुरासीत् यदम्बरं पीतमिदं रजन्या।

चन्द्रांशुचूर्णव्यतिचुम्बितेन तेनाधुना नूनमलोहिताहि।।" इति नैषधो। जतुका इति बृहत्सहितायाम्।

9. स्रष्टा

सृजतीति स्रष्टा। ब्रह्मा, विधिः, विधाता, विरञ्चि, विरिञ्चि, प्रजापतिः, विश्वसृट्,

"कारणं सर्वभूतानां स एकः परमेश्वरः।

लोकेषु सृष्टिकरणात्स्रष्टा ब्रह्मेति गीयते।।" इति महानिवार्णतन्त्रे। शिवः, विष्णु-।

10. प्रतिकूलम्

प्रतीपं कूलादीति, अननुकूलम्, विपक्षः, प्रसव्यम्, अपसव्यम्, प्रतीपं,

11. अनुकूलम्

अनुकूलं करोतीति (1) अप्रतिकूलः (2) दक्षिणः (3) सहायः, यथा, "मयानुकूलेन नभस्वरेति" इति श्रीभागवतम्।

12. निर्जीवः

निर्गतः जीवः यस्मत्सः निर्जीव। मृत इत्यर्थः।

13. निर्गन्धः

निर्नास्ति गन्धो यस्य स निर्गन्धः। गन्धशून्यम्। यथा - चाणक्ये -

"रूपयौवसम्पन्ना विशालकुलसम्भवाः।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः।।" इति।

14. नीरसः

नितरां रसो यत्र, दाडिमः इति हारावली। यद्वा निर्नास्ति रसो यत्र रसशून्ये।

यथा -

"शृङ्गारी चेत्कविः काव्ये जातं रसमयं च जगत्।
स एव चेदशृङ्गारी नीरसं सर्वमेव तत्।।" इति प्रा चः।

15. निस्पृहः

निर्गता स्पृहा दृष्टादृष्टविषयवासना यस्येति। स्पृहाशून्यः। यथा -

"निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा।" इति श्रीमद्भगवद्गीतायाम्।

16. सर्वस्वम्

सर्वं स्वम्। समुदायधनम्। यथा -

"गुरवे दक्षिणां दद्यात् प्रत्यक्षाय शिवात्मने।
सर्वस्वं वा तदर्धं वा तदर्धं वा तदाज्ञया।।" इति तन्त्रसारः।

17. अगृध्नुः

न गृध्नुः। गृध्यति कामयते लिप्सति वा धनमिति गृध्नुः। लुब्धा इत्यमरः।

यथा भागवते -

"न वयं प्रभवस्तांसां त्वामनुकर्तुं गृहेश्वरि।
अप्यायुधा वा कात्सन्र्येन ये चान्ये गुणगृध्नवः।।" इति।

18. अद्भुतम्

अ पूर्वं, विस्मयः, आश्चर्यं, चित्रं, तद्विशिष्टे वाच्यलिङ्गम् आश्चर्यं, इङ्गम्।

19. पृष्ठम्

पृष्यते सिच्यते इति। शरीरपश्चाद्भागः।

"न विगर्ह्यकथां कुर्याद् बहिर्माल्यं न धारयेत्।
गवां च यानं पृष्ठेन सर्वथैव विगर्हितम्।।" इति। चरममात्रम्, स्तोत्रविशेषः।

20. अगोचरः

न गोचरः अगोचरः। गावः इन्द्रियाणि चरन्त्यस्मिन्निति गोचरः। इद्रियार्थः। (2) गोषु इन्द्रियेषु चरतीति। इन्द्रियप्रत्यक्षभूतविषयः। यथा वेदान्तसारे - "अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्।" इति।

21. पवित्रम्

(1) व्रतादिना शुद्धः। प्रयतः, पूतः, शुचिः, पवित्रितः, पुण्यः, पावनः, "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते" इति भगवद्गीतायाम्।

(2) शुद्वद्रव्यम्, कौशी, हैमी, वार्मिका, पूतं, मेध्यं, शुद्धं, शुचिः, पुण्यं, पूतिवत्,

"बाल्यं पवित्रमायुष्यं सुमङ्गल्यं रसायनम्" इति भावप्रकाशः।

(3) पुनातीति पवित्रः, तिलवृक्षः, पुत्रजीववृक्षः, कार्तिकेयस्य नामान्तरम्, "षष्ठीप्रियस्य धर्मात्मा पवित्रो मातृवत्सलः" इति महाभारते।

(4) पूयते अनेन इति पवित्रं, कुशं, वर्षणं, ताम्रं, पयः, घर्षणं, अर्घोपकरणं, यज्ञोपवीतं, घृतं, मधुः।

(5) विष्णुः, यथा - "प्रभूस्त्रिककृद्धाम पवित्रं मङ्गलं परम्" इति महाभारते।

(6) महादेवः, यथा - "पवित्रं च महांश्चैव नियमो नियमाश्रितः" इति महाभारते।

22. ओंकारः

प्रणवः, ओम्, "ओङ्कारं पूर्वमुच्चार्यस्ततो वेदमधीयते" इति स्मृतिः।

"ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्वा विनिर्यतौ तस्मान्माङ्गलिकावुभौ।।" इति।

"प्राणायामैस्त्रिभिः पूतस्तत ओंकारमर्हति।" इति मनुः।

23. खण्डनम्

भज्जनम्, भेदनम् द्व निराकरणम्, छेदनम्, यथा - "घटस्य भुजबन्धनं जनस्य रदखण्डनं देहि पदपल्लवमुदारम्।" इति जयदेवः।

24. माहमोहः

(1) महान् मोहः। भ्रान्तिहेतुको वस्तुतो निष्ठष्वपि रागः। (2) संसारतद्विषयकारणरूपे अज्ञानभेदे तमो अविवेको मोहः स्यादन्तकरणविभ्रमः। (3) मैथुनादिसुखभोगेच्छारूपे अन्तःकरणवृत्तिभेदे च। वैषयिकसुखस्य वस्तुतो निष्ठत्वात् तथात्वम्।

"दशविधो महामोहः" इति सांख्यकारिका। शब्दादिषु पंचसु दिव्यादिव्यतया दशविधेषु विषयेषु रज्जनीयेषु रागः आसक्तिः" इति तर्ककौमुदी।

25. मार्ताण्डः

मृते अण्डे भवः। (1) सूर्ये, तस्य मृताण्डजन्म च,

"मारितं च यतः प्रोक्तमेतदण्डं त्वयोदितः।
तस्मान्मुने। सुतस्ते यो मार्ताण्डाख्यो भविष्यति।।" इति मार्कण्डेयपुराणम्।

(2) अर्कवृक्षे इत्यमरः।

26. . देशिकः

(1) पथिकः इति हेमचन्द्रः। यथा महाभारते -

"अदेशिको यथा सार्थः सर्वं कृत्थं समृच्छति।
अनायका तथा सेना सर्वान् दोषान् समृच्छति।।" इति। (2) गुरुः, यथा देशिको मूलमन्त्रेण इत्यागमः।

26. पथ्यम्

(1) हिते चिकित्सादौ। (2) हितकारकभोज्यद्रव्यभेदे। रागभेदे पथ्यापथ्यं च वैद्यके प्रसिद्धम्।

27. निबर्हणम्

निबर्हते इति निबर्हणम्। मारणमित्यमरः। यथा मार्कण्डेयेपुराणे -

"युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम्" इति।

चतुर्दशाध्यायस्य सारः

नित्यशरीरप्रतिपादनमित्यस्याध्यायस्य नाम। अध्यायारम्भे सदसदुत्पन्नं द्वैतभावापन्नं जीवं प्रशंसति कविः। अत्र वैद्यविषयद्वारा वेदान्तचिन्तनं कृतम्।

प्रथममेव परमात्मानं निरूपयति। वासनारूपेण सर्वत्र स्फुरत् ब्रह्म अपूर्वमित्युच्यते। कालजीववेदानांमुदयः लयश्च ब्रह्मण्येव भवति। एतादृशं ब्रह्म यः पश्यति स एव वैद्यः। तद्ब्रह्म एव नित्यम्। यथा छायां दृष्ट्वा बिम्बस्यानुमानं तथैव जगद्दृष्ट्वा परमात्मा अनुमीयते इति अद्वैतवादिनः प्रवदन्ति। अत्र तु दृष्ट-दर्शन-अदृष्टानामेकत्र स म्मेलनं जायते।

केवलध्यानेनैव परमात्मसाक्षात्कारः सम्भवति न शास्त्रेण। अपूर्वं नाम कोऽपि धर्मः यागाद्यनुष्ठानेन जीवे जायते इति मीमांसकाः। तेनापूर्वेण कालान्तरे स्वर्गप्राप्तिरूपं यागफलं सिध्यति। एवं च अपूर्वं द्वारमित्याहुः। पूर्वपुण्येनैव कोऽपि सिद्धवेद्यो भवति। कालेन चिरशाश्त्रपरिचयेन वैद्यः ज्येष्ठो भवति, अल्पकाल परिचयेन कोऽपि वैद्यः कनिष्ठश्च भवति। अप्राप्तकौशलः कनिष्ठः वैद्य इति भावः। कालो नामेश्वरस्य विभूतिः। शरीरेण जीवस्य सम्बन्धः यावद्भविष्यति स एव आयुष्काल इत्युच्यते। एवं च वैद्यः सिद्धमन्त्रौषधिप्रयोगेण मनुष्याणां कालरूपमायुः वर्धयति। एवमुत्तमः वैद्यः कालरूपमीश्वरमुपास्ते। वैद्य एव कालसौभाग्यदाता इति च तं जनाः आराधयन्ति।

आयुष्मतां जनानामेको भागः दिवसत्वेन कल्पितः, अपरोभागः रात्रित्वेन कल्पितः। अहोरात्रमितिद्वन्द्वमन्तरा केवलकालस्य प्रतीतिः पामर जनानां न सम्भवति। जीवात्मनः एकः कल्पः ब्रह्मणः एकं दिनं भवति। परब्रह्मसाक्षात्कारादात्मा परात्परः भवति। साम्राट्रूपाश्रयवृक्षं विराट्रूपेपजीवात्मना स्वराट्रूपेपः परमात्मना चाधिष्ठितः। जीवाख्यं ब्रह्म विराडित्युच्यते। परमात्मपरायणः परस्तु नित्यः स्वराडित्युच्यते। आत्मानं विषयीकृत्य यत्र सृष्टिस्थितिसंहारभूताः ब्रह्मविष्णुमहेश्वराः राजन्ते। स एव परमात्मनः विराट्रूपमिति ज्ञेयम्। अयं लोकः ब्रह्मणः स्थूलरूपम्। यस्यान्तः सदसद्रूपं सर्वं प्रकाशते स एव स्वराट्। स तु विराट्रूपवन्मांसचक्षुषा नावगम्यते। ध्यानेन तु तत् अन्तः भासते। भावविहीनः परमात्मा वासनारूपेण सर्वत्र राजन्ते। सर्वेषां विषयः कालः। किन्तु कालस्तु निर्विषयः भवति। सर्वेषां द्रष्टा कालः। कालस्त्वदृष्टः सन् वर्तते। प्रमाता सर्वेषां दुःखानामाश्रयः भवति। आत्मनि सर्वस्याप्याधेयत्वं दृश्यते।

जीवः वेद एव। वेदातीतः परस्तु तद्रष्टा। कालरूपाऽयं निर्विषयः निर्गुणः सन् अपि गुणप्रदायकः भवति। कालरूपः महेश्वरः अदृष्टाऽपि शास्त्रद्वारा द्रष्टुं शक्यते। श्रोत्रहीनोऽपि श्रवणमनननिधिध्यासनैः गम्यो भवति। (जीवात्मा न भवति, किन्तु जीवप्रदायकः।) निर्गुणः सन्नपि रूपरसगन्धस्पशादीन् गुणान् जीवाय ददाति। निरीन्द्रियोऽपि शरीरिणामिद्रियदायकः। एवमरूपोऽपि लोकरूपेण सर्वरूपत्वं भजते। (निर्गतः स्वं यस्य सः निस्वः, सम्पद्धीनः इत्यर्थः।) निस्वोऽपि महेश्वरः शरीरिभ्यः चैतन्यं प्रददाति। निर्वेदोऽपि सः सर्वमपि वेत्ति। एष महेश्वरः सर्वज्ञोप्यवेद्यो भवति। सोऽयमद्वैतोऽपि द्वैतस्य प्रभुः। एवं सर्वेषां जीवभूतः ईश्वरः निर्जीवत्वेन वर्तते। नामरूपहीनोऽपि सः सर्वनामत्वं प्राप्नोति। अगृध्नुरपि सर्वगुध्नुर्भवति। सोऽयं केनापि न पाल्यते, किन्तु सर्वान् पालयति। कामरहितोऽपि सर्वेभ्यो कामान् प्रददाति। भावरहितोऽपिभावप्रदायकः। एवं महेश्वरः सगुणोऽपि निर्गुणः, सरूपोऽपि अरूपः विषयी अपि निर्विषय सन् विराजते। गुणानामाश्रयभूतं धर्मसाधनं शरीरं कालरूपं ईयते। भूत-वर्तमान-भविष्यत्कालभेदः शरीरस्यापि विद्यते। शरीरं जायते नश्यति, पुनर्जायते पुनर्नश्यति। शरीरस्योत्पत्तिविनाशादिक्रिया निरन्तरं सम्भवति। यद्यपि पांचभौतिकं शरीरमित्युच्यते तथापि परोक्षादेव तस्योत्पत्तिः ज्ञेयम्। बोधरूपात्परमात्मनः एव अबोधस्याविर्भावः यथा मनुष्यः स्वं पृष्ठं द्रष्टुं न शक्नोति, तद्वत् ब्रह्मस्वरूपं सर्वतोमुखेन ज्ञातुं न कोपि प्रभवतीत्याशयः। एवं मनुष्याणां विवेकोदयार्थं नानावेदशास्त्रान् निर्धारयति कविः।

पंचदशाध्यायः

अज्ञानप्रकरणे अनर्थपरिहारः

सतां संस्मरणदेव समन्ताद्युष्मद्दर्शनात्।
आयुष्मानिह स ज्ञातो आत्मभावाद्विमोचितः।। 1
आर्योन्तः स्मृतवान् सन्तः सन्तापस्योपशान्तये।
स्मृतमात्रेण सर्वत्र प्रकाशं प्रतिपेदिरे।। 2
सतां स्मरणमात्रेण चित्तशुद्धिर्भविष्यति।
चित्ते शब्दे सदा सन्तश्चित्रं कुर्वन्ति सुस्थिरम्।। 3
चित्ते स्थिरतरं प्राप्ते निश्चयः सम्भविष्यति।
तदा सन्देहकणिका हृदये नैव जायते।। 4
हृच्छुद्या वाग्विशुद्धिः स्यात् ततः कायं शुचिर्भवेत्।
कायवाक्चित्तशुद्धया च सर्वत्र शिवमीक्षते।। 5
चित्तं बिन्दुरिति ज्ञेयं शब्दो नाद उदाहृतः।
बीजं शरीरमेवात्र नानातत्वविचिन्तने।। 6
संसारबीजं चित्तं स्याद् मोक्षबीजं कलेबरम्।
शब्दस्तूभयतो योज्यं अर्थभेदोऽत्र सम्भवेत्।। 7
सिद्धान्तमनुसृत्येव कविरर्थमिहोत्यते।
औचित्यमर्थं जानीयात् शब्देर्थनियतेन च।। 8
औचित्यं स्वरतो ग्राह्यं स्वरादर्थसमुद्भवः।
स्वरस्तु कार्यं शब्दानां नादः सिद्धान्तकारकः।। 9
उच्चैः स्वरपरार्थं स्यान्नीचैरात्मार्थमुच्यते।
आत्मोदयोऽनुदात्त स्यादुदात्तः परनाशनः।। 10
अभिचारविधानं तु उदात्तेन विधीयते।
आत्मरक्षाकरं मन्त्रं अनुदात्तस्वरैर्जयेत्।। 11

साधारणं तु स्वरितः गुणदोषप्रदं तु तत्।
वक्तुर्हृदयमालोक्य स्वरस्तत्र प्रवर्तते।। 12
सर्वत्र युष्मदालोके आयुष्मदवलोकनात्।
सर्वेषां तु कनीयस्त्वादात्मानं बुभुजेपरः।। 13
सर्वत्रोत्कर्षमालोक्य न्यूनत्वं त्वैव चात्मनः।
परभोगत्वमासाद्य स्वभोगाच्च विमोचति।। 14
अद भक्षण इत्यस्मात् निषेधो मेत्युदाहृतः।
आत्मेति कथ्यते यत्र तत्र भोगं न विन्दति।। 15
विक्षिप्ताज्ञानसम्मूढं परभावतिरस्कृतम्।
साक्षात्कारं समालोक्य भूतरूपी प्रकाशते।। 16
विक्षेपावरणे मुक्त्वा युष्मदस्मत्वनिर्मिते।
भव्यं भवं च निर्मथ्य आर्यो भूतमुपेयिवान्।। 17
परश्चात्मा स्वनिलयं त्यक्त्वैवोर्ध्वं प्रतिपद्यते।
कालमुन्मुच्य चरति पक्षी हसः स्वरूपधृक्।। 18
सोऽहंभावपर्यस्तो हंसभावमुपागतः।
अभूतपरमहंसत्वं परमात्मा निरावृतः।। 19
हिरण्याण्डसमुद्भूतः हंसः पक्षद्वयात्मकः।
स्वेच्छारूपेण चरति दशदिक्षु निरावृतः।। 20
ईश्वरः कालमायाभ्यां विक्षेपावरणात्मकः।
परोक्षः क्रीडते नित्यं तदेतद्वर्ततेऽधुना।। 21
वेदस्तु बिन्दुनादाभ्यां भव्यं कथयति सदा।
ईश्वरः क्रीडतां नित्यं वेदो भाव्यार्थमुच्यताम्।। 22
हंसः पततु सर्वत्र भूतावासो निराकुलः।
भूतावासमिदं विद्यात् शरीरं लोकशङ्करम्।। 23
वर्तमानं तु मृत्यु स्यात् भविष्यत्काम एव च।
मृत्युरेवेश्वरक्रीडा वेदः कामविधायकः।। 24

भूतं तु पूर्ववृत्तान्तः कथारूपप्रकाशकम्।
तदेव देहं जानीयात् न वेदो नैव चेश्वरः।। 25
आत्मत्रयं परित्यज्य भूतावासं गृहीतवान्।
साक्षी तुरीयः स भवेत् वैद्यस्तन्मात्रमीक्षते।। 26
इदमित्थमिति ज्ञानं सर्वमेवात्र साधितः।
दृष्टतोऽदृष्टतो वापि वेदवेद्यतयापि च।। 27
शरीरेमेकं साक्षी स्यात् भूतावासः सुखासुखे।
सर्वेषां ब्रह्मसृष्टीनां तस्मात्सैव परात्परः।। 28
सदाचारप्रवृत्तस्य स सुखाय भविष्यति।
दुराचारप्रवृत्तस्य कायो दुःखाय जायते।। 29
सदाचारं समाश्रित्य बभूवार्यो सदा सुखी।
पितृपितामहात्प्राप्तः धर्मस्त्वाचार उच्यते।। 30
धर्माचारनिवृत्तस्य शरीरस्तु निरर्थकः।
समीरयति सर्वेषां इत्यर्थात् शङ्करोप्यसौ।। 31
एतदर्थविपर्यासं निवृत्ताचार ईक्षते।
परोपकारशीलस्य शरीर्थविधायकरमः।। 32
परोपद्रवशीलस्य शरीरं शब्द एव च।
कान्तासु कनके सक्तिःप्रायोऽनर्थकरां नृणम्।। 33
तस्मात्तेषु न सज्जेत अकृतात्मात्मनिह्नवात्।
परेषां प्रीतियोगार्थं कान्तासु कनकेषु च।। 34
रक्तानां च दोषः स्यात् तदाचारकृतात्मनाम्।
श्रीमन्नारायणार्थोऽयं आर्यनारायणोद्भवम्।। 35
एवं परम्पराप्राप्तं पारम्पर्यमनादि यत्।
तदनन्तं बभूवेह अतोऽयं तु परात्परः।। 36
परोबुद्ध्यानुमेयं स्यात् धारणागम्य एव च।
गोत्रादिरिति विज्ञेयः तत्परस्तु परात्परः।। 37

एवमेतत्पुराप्राप्तं भूतावासं कलेबरम्।। 38

अनन्तधर्मकर्तारं धर्मकार्यनिगूहितम्।

पूर्वाशायां समुदितो लीयते पश्चिमे दिशि।। 39

तदा देहोदितो धर्मः काले दिनकरो यथा।

अनादिरेष कायस्तु सर्वेषामादिकार्यकृत्।। 40

कालस्त्वनन्त एव स्यात् कार्यकालैकमेलनात्।

अनाद्यनन्त एव स्यात् कार्यकालैकमेलनात्।। 41

आद्यन्तं तत्कृतमिदं कार्यकालेपृथक्स्थिते।

कायस्यैवात्र कर्तृत्वं कालो भोक्ता जनार्दनः।। 42

भोज्यं कर्तृकृतं कर्म इति ज्ञेयं मनीषिभिः।

भूतावासस्तु भगवान् स कर्ता सर्वकर्मणाम्।। 43

अत्मोदयमिति पूर्वं कतृप्राधान्यमेव च।

परज्यानिर्बलात्कारः भोक्तृप्रामाण्यतामियात्।। 44

कर्ता नयेन भोक्तारं बलवन्तं वशं नयेत्।

यथार्यो नयमाश्रित्य राजानं कुरुते वशम्।। 45

यथा गिरिभवाः नद्यः सागरेम्भसि लीयन्ते।

तथा शरिरजा कीर्तिः काले परिसमाप्यते।। 46

।*भोक्ता स्वाद्वन्नदातारं न हन्ति परिपाल्यते।

निषिद्धान्नप्रदातारं पाचकं निहनिष्यति।। 47

भोक्तर्यनुभवे नष्टे रजस्तमौ प्रवर्तेते।

तदादिरिति विज्ञेयं अनाद्यन्तसमुद्भवम्।। 48

अनन्तो बुभुजेनादिं आदिस्तु न विकल्पितः।

आदिज्ञानं विजानीयात् अनाद्यज्ञनमुच्यते।। 49

भवेदनन्त आयुष्मान् सैव भोक्ता महाबलः।

सैव कर्ता विजानीयात् यस्मादादिरिहाबभौ।। 50

---

*भोक्ता स्वाद्वन्नदातारं न हन्ति पालयत्यमुम्। इति साधु प्रतिभाति।

रजः कर्म विजानीयात् तदेव ज्ञानमुच्यते।
तदेवादिरिति ज्ञेयं कर्ता भोक्ताऽत्र केवलः।। 51
अज्ञाने कर्तृभोक्तृत्वमेकत्र न भविष्यति।
ज्ञाने तु कतृभोकृत्वमेकस्मिन् प्रतिपद्यते।। 52
तार्तीयं न भवेज्ज्ञाने ज्ञातृज्ञेयौ विशिष्येते।
इतराज्जायते ज्ञानं तृतीयो नात्र तिष्ठति।। 53
पूर्वाभावमतद्भावं तद्भावं तु पुनर्भवम्।
इति बुद्धया विनिश्चित्य प्राप्तो येन पुनर्भवः।। 54
स एव सर्वमर्त्यानामत्युत्कृष्टोऽत्र वर्तते।
तस्मान्नाम्नार्यशर्मोऽयं आयुष्मानिह जायते।। 55
आज्ञानस्थितभूतोऽयं आर्यशर्मेति विश्रुतः।
कुणपंत्विदमज्ञानं तत्स्थो धर्मस्तु सत्समृतः।। 56
धर्म एव शरीरं स्यात् कुणपो ज्ञानमुच्यते।
सत्तां स्वीकृत्य सद्भूतः आर्यो सद्भ्यो विमोचितः।। 57

इति

अज्ञानप्रकरणे अनर्थपरिहारो नाम

पंचदशोऽध्यायः

पंचदशाध्यायस्य टिप्पणी

1. समन्तात्

समन्ततः इति शब्दरत्नावली। यथा ऋतुसंहारे -
"दिनकरपरिपातात्क्षीणतोयाः समन्तात्
विदधति भयमुच्चैर्वीक्ष्यमाणाः वनान्ताः।" इति।

2. निश्चयः

(1) तदभावप्रकारकत्वे सति तत्प्रकारकं ज्ञानं निश्चयः। यद्वा तदभावप्रकारत्वानिरूपितविशेष्यताशालि ज्ञानम्। यथा भूतलं घटवदिति निश्चयः।

अत्र च संशयभिन्ने ज्ञानं निश्चय इति सर्वेषां सिद्धातः। निश्चयत्वं न जातिः। प्रत्यक्षादिना सांकर्या सांकर्यात्। किन्तु विषयताविशेष एव। (2) क्वचित्तु आधेयताविशेषतापन्नस्य अधिकरण्यं या संशयत्वनिरूपकविशेष्यतान्यविशेष्यता तन्निरूपितप्रकारताशालिज्ञानम्। अत्रेदमवधेयम्। संशये च प्रत्येककोटिनिश्चयीयविशेष्यताभ्यामतिरिक्तैव विशेष्यता वर्तते इति। तन्निरूपितप्रकारताशालि तादृशज्ञानं च साध्याभावांशे निश्चय इत्युच्यते। (3) बुद्धेरसाधारणवृत्तिविशेषः इति मायावादिनो मन्यन्ते। (4) अध्यवसाय इति सांख्याः। (5) अर्थालंकारविशेष इति आलंकारिकाः आहुः।

3. सिद्धान्तः

सिद्धः अन्तो यस्मात्। पूर्वपक्षं निरस्य सिद्धपक्षस्थापनम्। इति भरतः। यथा महाभारते - "स्थापनाक्षेपसिद्धान्तपरमार्थक्षतां गतैः। इति। राद्धान्त इत्यमरः। तन्त्राधिकरणाभ्युगमा संस्थितः सिद्धान्तः। स च चतुर्विध। सर्वतन्त्रप्रतितन्त्रधिकरणाभ्युपगमसंस्थित्यर्थान्तराभावात्।

4. औचित्यम्

उचितस्य भावः। उपयुक्तता, योग्यत्वम् इत्यमरः। यथा साहित्यदर्पणे तृतीयपरिच्छेदे "एत अपि यथौचित्यादुत्तममध्यमाधमाः" इति।

5. स्वरः

ससयर्त स्वर्यन्ते शब्दाः अनेन इति स्वराः। अकाराद्विवर्णः। अच्, मात्रा

"एकमात्रो भवेत् ह्रस्वो द्विमात्रो दीर्घमुच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेया व्यंजनं चार्द्धमात्रतः।।
स्वरा विंशतिरेकस्य स्पर्शानां पंचविंशतिः।" इति शिक्षायाम्।

तन्त्रीकण्ठोत्थितनिषाददिध्वनिः। उदात्तादित्रितयम्। "उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः। चतुर्थाः प्रचितो नोक्तो यतो सौ छान्दसः स्मृतः।।" इति भरतः। प्राणिस्वनः, ध्वनिः, शब्दः, निनादः, निनदः।

6. अनुदात्तः

न उदात इति नञ्समासः। वेदगाने नीचस्वरः। यथा

"उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः"। "समाहारः स्वरितः" इति पाणिनिः।

7. उदात्तः

उच्चैरादीयते स्म। स्वरभेदः स तु वेदगाने उच्चैस्वरः इत्यमरः। दानम्, वाद्यविशेष इति शब्दरत्नावली। काव्यलङ्कारभेद इति मेदिनी। तदुक्तं साहित्यदर्पणे दशमपरिच्छेदे -

"लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते।
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्।।" इति।

8. साधारणः

(1) सपक्षविपक्षवृत्तिहेतुः। साधारणः। यथा पर्वतो वह्निमान् प्रमेयत्वादिस्यादौ प्रमेयत्वं हेतुः साधारणः। अत्र प्रमेयत्वं हेतुर्हि सपक्षे महानसे विपक्षे महाह्रदादौ च वर्तते। अतः साधारणः। (2) साध्यात्यन्ताभाववति साध्यवदन्यस्मिन् वर्तमानो हेतुः। यथा शब्दो नित्यो निःस्पर्शत्वात् - इत्यादौ निःस्पर्शत्वं साधारणः (3) नित्यसमविशेषः। स च स्वव्याघातकमुत्तरं भवति। (4) व्यवहाशास्त्रज्ञारस्तु अनेकस्वत्वकमेकं धनं साधारणम्। यथा अलंकारोऽपि यो येन धुतः स तस्यैवः अधृतः साधारणो विभाज्य एवेत्यादौ साधारणशब्दस्यार्थ इत्याहुः। (5) सदृशमिति साहित्यशास्त्रज्ञाः आहुः। वेश्यदिनायकासाधारणी इत्यालंकारिकाः आहु। कुचिका इति काव्यज्ञाः आहुः।

9. न्यूनत्वम्

(1) न्यूनस्य भावः न्यूनत्वम्। प्रतिज्ञदीनामवयवानामन्यतमेनाप्यवयवेन हीनं न्यूनं निग्रहस्थानम्। साधनाभावे साध्यासिद्धिरिति। (2) यत्र विवक्षितार्थसमर्पकात्किंचिन्यूनं तत्। (3) यत्किंचियवयवशून्यावयवाभिधानम्। यथा न्यायमंते पंचानामवयवानां सिद्धान्तत्वेन पर्वतो वह्निमान् धूमात् यो यो धूमवान् स स वह्निमान् तथा चायम् इति चतुर्णामेवावयवानामभिधानं न्यूनं भवति। (4) उनम् (5) गार्हयम् इति काव्यज्ञाः आहुः।

10. आवरणम्

(1) प्राप्तिविशेषः। (2) अविद्येति मायावादिनो जगुः। (3) बाह्यं तम इति

माध्वाः। (4) आच्छादनमिति काव्यज्ञाः आहुः।

11. पक्षी

(क) पक्षौ विद्येते यस्य स पक्षी। विहङ्गमः। तत्पर्यायः - खगः, विहङ्गः, विहङ्गमः, विहाया, शकुनिः, शकुन्तिः, नीडोद्भवः, मरुत्मान्, द्विजः, पत्री इत्यमर। नाडीचरणः, कण्ठाग्निः, पतङ्गः, चंचुभृत्, छुरण्डः, सरण्ड इति शब्दरत्नावली। पिपतिषुः द्युगः इति राजनिघण्टुः। (ख) महादेवः, यथा महाभारते, शिवनामकीर्तने "पक्षी च पक्षरूपश्च अतितीप्यो विशांपति-।" इति।

12. हंसः

(1) हन्ति सुन्दरं गच्छतीति हंसः, पक्षिविशेषः। तत्पर्यायः - श्वेतगरुत्, चक्राङ्गः, मानसौकाः इत्यमरः। धवलपक्षः, मानसालय इति राजनिघण्टुः। (2) निर्लोभनृपः विष्णुः, यथा महाभारते -

"त्वं हंस सविता भनुरंशुमाली वृषकपि-।" इति। परमात्मा, मत्सरः, योगिभेदः, मन्त्रभेदः, शरीरस्थवायुविशेषः, तुरङ्गप्रभेदः, इति मेदिनी। गुरुः पर्वतः इति शब्दरत्नावली। शिव इत्यनेकार्थकोशः, अग्रतः स्थितः श्रेष्ठः इति हेमचन्द्रः। विशुद्ध इत्यजयः।

13. निराकुलः

निर्गतः आकुलः यस्य सः निराकुलः। आकुलं नाम व्यस्तं, व्याकुलं, व्यस्तं अप्रगुणं चेति।

14. भूतावासः

भूतानामावासः भूतादावासः विभीतकवृक्षः इति राजनिघण्टुः। विष्णुः। यथा - "भूतावासो वासुदेवो सर्वासु निलयो लयः" इति महाभारते दानधर्मः। शरीरं यथा मनुसंहितायाम् -

"जराशोकसमाविष्टं रोगायतनमातुरम्।
रजस्वलमनित्यं च भूतावासमिमं त्यजेत्।।" इति भावप्रकाशस्य पूर्वखण्डे प्रथमभागे।

15. मृत्युः

म्रियते अस्मादिति मृत्युः। प्राणवियोगः। पंचता, कालधर्मः, दिष्टान्तः, प्रलयः,

अत्ययः, अन्तः, नाशः, मरणं, निधनं, कालः, परलोगमनं, दीर्घनिद्रा, निमीलनं, अवसानं, भूमिलाभः, निपातः, विलयः, इति तस्यार्थाः।

16. पूर्ववृत्तान्तः

पूर्वश्च यः वृत्तान्तः सः पूर्ववृत्तान्तः। वृत्तः अनुवर्तनीयः अन्तः समाप्तिर्यस्य सः वृत्तान्तः। संवादः, वार्ता, प्रवृत्तिः, उदन्तः, श्रुतिः, उदन्तकः, इति पर्यायः। प्रक्रिया, कात्सर्न्यं, वार्ताप्रभेदः, प्रस्तावः इति च।

17. आचारः

(1) प्रवृत्तिविषयत्वम्। यथा तथैव शिष्टाचारादित्यादौ। सदाचारलक्षणमित्थम्-

"विद्वेषरागरहिता अनुतिष्ठन्ति यं द्विजाः।

विद्वांसस्तं सदाचारं धर्ममूलं विदुर्बुधाः।।" इति। क्रिया (3) कृतिः। यथा अलौकिकावगीतशिष्टाचारविषयत्वमित्यादौ (4) गुरूक्तस्यार्थस्य अङ्गीकरणमाचार इति योगाचारबौद्धाः वदन्ति।

18. निरर्थकम्

वर्णक्रमनिर्देशवन्निरर्थकम्। तदर्थश्च वर्णानां क्रमेण निर्देशो जबगडत्यादिप्रयोगः तत्तुल्यो निर्देशः इति। यथा नित्यः शब्दः कचटतपाः जबगडदशत्वात् झभ घढधष्वत् इति। एवं प्रकारें निरर्थकम्। (2) समयन्थबव्यतिरेकेणावाचकपदप्रयोगः। (3) अवाचकशब्दप्रयोगः। यथा शब्दो नित्यः जबगडदशत्वात् इत्यादि। (4) काव्यदोषविशेषः इत्यालकारिकाः आहुः। (5) निष्फलम्।

19. परोपकारशीलः

परोपकार एव शीलः परोपकारशीलः। परोपकारश्च,

'स्वभिन्नस्य साधुवृत्तस्य हिंसापादनम्'। यथा "परोपकाराय सतां विभूतयः" इत्यादौ च।

20. परोपद्रवशीलः

परोपद्रव एव शीलः परोपद्रवशीलः। उपद्रवो नाम उत्पातः। रोगारम्भकदोषप्रकोपजन्यो विकारः,

"यो व्याधिस्तस्य यो हेतुस्तस्य प्रकोपतः।

स उपद्रव उच्यते" इति हारिते। कालजातो व्याधिरूपसृजति स तन्मूल एवोपद्रवसंज्ञः" इति सुश्रुते।

21. धारणा

धार्यते या र+धारणा। बुद्धिरिति राजनिघण्टुः। यथा याज्ञवल्क्ये

"इन्द्रियाणि मनः प्रायो ज्ञानमायुः सुखं धृतिः।

धारणा प्रेरणं दुःखमिच्छाहंकार एव सः।।" इति। न्यायपथस्थितिः। तत्पर्यायः - संख्या, मर्यादा, स्थितिः इत्मरः। योगाङ्गविशेष इति मेदिनी। "स तु अद्वितीयवस्तुन्यन्तरिन्द्रियधारणम्।" इति वेदान्तसारः। "ध्येये चित्तस्य स्थिरबन्धनमिति हेमचन्द्रः। ब्रह्मणि मनोधारणं यथा -

"ब्रह्मात्मचिन्ता ध्यानं स्यात् धारणा मनसो धृतिः।

अहं ब्रह्मेत्यवस्थानं समाधिर्ब्राह्मणः स्थिति-।।" इति गरुडे।

22. निगूहितं

यत्र निगूहनं कृतं तन्निगूहितम्। निगूह्यते संव्रियतेति निगूहनम् - गोपनं, संवरणं इत्यर्थः।

23. बलात्कारः

बलात् करणम्। हठात् करण्। तत्पर्यायः - प्रसभम्, हठः इत्यमरः। हठात्कारः, प्रसभः इति शब्दरत्नावली।

"मत्ताभियुक्तस्त्रीबालबलात्कारकृतं च यत्।

तदप्रमाणं लिखितं भयोपाधिकृतस्तथा।।" इति। यथा रघुवंशे "शपयन्त्रितपौलस्त्यबलात्कारकचग्रहैः" इति।

24. नयः

। मतम्, यथा न्यायनयः मींमांसानयः इत्यादौ। नीतिशास्त्रम्, यथा "विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः" इत्यादौ इति नीतिज्ञाः वदन्ति।

25. महाबलः

महत् उत्कृष्टं बलम् ऐश्वर्यं यस्य स महाबलः। बुद्ध इति त्रिकाण्डशेषः। पितृगणविशेषः, यथा मार्कण्डेये -

"महान् माहात्मा महितो महिमावान् महाबलः।
गणाः पंच तथैवेते पितृणां पापनाशनाः।।" इति। वायुः, बलीयसि इति हेमचन्द्रः। यथा रामायणे

"नियुज्यमानो राज्याय नैच्छन्द्राज्यं महाबलः।
स जगाम वनं वीरो रामपादप्रसादकः।।" इति

26. सत्ता

(1) द्रव्यगुणकर्मसमवेता सत्ता। इयं च वेशेषिकमते परसत्ता परसामाम्यं वा इत्युच्यमते। द्रव्यगुणकर्मवृत्तिश्चेति बोध्यम्। तत्र प्रमाणं भावोनुवृत्तेरेव हेतुत्वात्सामान्यमेव। इयं सत्ता द्रव्यं सत्ता गुणः सन् इत्याद्यनुगतप्रतीत्यैव सिध्यति। अत्र सूत्रं सदिति यतो द्रव्यगुणकर्मसु सा सत्ता द्रव्यं सत्ता इति। तथा चानुमानम् - सत्ता नद्रव्याद्यत्मिका न वितक्षणबुद्धिवेद्यत्वात् इति। इयं सत्ता वैशषिकमते एव प्रसिद्धा। नव्यास्तु इमां सत्तां न स्वीचक्रुः। अयमाशयः - सन्निति प्रतीतिविषयो भावत्वमेव। अत एव सामान्यदिवष्वपि सदिति व्यवहारः। न त्वतिरिक्ता द्रव्यादित्रिकवर्धिनी सत्ताख्या जातिरिति। तेन परस्परं सामान्यं परं सत्ता इति वैशेषिकविभागो निर्युक्तिकत्वदनादेयः इति। (3) विद्यमानत्वम्, यथा भूतले घाटसत्तादशायामित्यादौ सत्ता शब्दस्यार्थः। मायावादिमते सत्ता त्रिविधा पारमर्थिकी व्यांवहारिकी प्रातिभासिकी चेति। तत्र पारमर्थिकी ब्रह्मणः सत्ता, त्रिकालाबाध्यत्वात्। व्यावहारिकी च घ़टादीनां सत्ता, व्यवहारकाले अबाध्यत्वात्। सा तु तत्वज्ञाननाशाया। प्रातिभासिकी तु शुक्तौ रजतादेः, अधिष्ठान बाध्यत्वात्। प्रातिभासिककालमात्रसत्वाच्च इति। सा चाधिष्ठानसाक्षात्कारनाशाय। ब्रह्मसत्तैव सर्वेषां सत्ताव्यवहारः (3) आत्मधारणानुकूरव्यापारः सत्तेति शाब्दिकाः। वदन्ति। (4) अर्थक्रियाकारित्वम्। यथा यत् सत् तत्क्षणिकामित्यादौ इति बौद्धाः आहुः। (5) प्रामाणिकत्वमित्यन्ये आहुः।

पंचदशाध्यायस्य सारः

सन्तापस्योपशमनाय सज्जनप्रणामं कृत्वा अयमध्यायः आरभ्यते। सतां स्मरणमात्रेणैव कामविवर्जितं मनः शुद्धं भवति। अभ्यासेन वैराग्येण च नियन्त्रितचित्तानां

सतां मनसि ज्ञानं प्रकाशते। अनेन ज्ञानेन तु सर्वत्र शिवं पश्यन्ति एते सत्पुरुषाः। कायप्रवृत्तकं चित्तं बिन्दुरित्युच्यते। शरीरं तु संसारबीजमिति ज्ञेयम्। वागेव नादपदेनाभिधीयते। अत्र विषये तन्त्रशास्त्रे ग्रन्थकारस्य परिचयः सूचितः।

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इति उपनिषद्वाक्येन मनसः संसारबीजत्वं सिद्धम्। पुरुषार्थसाधकं भवति शरीरम्। तस्माछरीरस्य मोक्षसाधकत्वं स्फष्टं भवति। संसारमोक्षप्रतिपादकः शब्दः। एवंरूपस्य शब्दस्य तु द्वयोः संसारमोक्षयोः व्यंजकत्वात् अर्थकल्पने सिद्धान्तरूपस्यौचित्यस्य च दीक्षा कर्तव्या। स्वरापेक्षया ओचित्यकल्पना विधेया। अतः सिद्धान्तकारकः स्वरः उच्चारणरूपं कार्यं विदधाति। स्वयं राजते इति स्वरस्य निर्वचनम्। स्वरास्तु उदात्तानुदात्तस्वरितभेदेन त्रिविधः। तत्र मन्त्रस्य उदात्तस्वरेण जपः उच्चाटनार्थं भवति। अनुदात्तस्वरेंण जपः मन्त्रसिद्धिं जनयति। स्वरितरूपेण मन्त्रपाठः आत्मादयाय च भवति। अत्र मन्त्रशास्त्रस्य जपव्यवस्था सूचिता। गुणदोषसाधारणरूपं वक्ता स्वेच्छया प्रयुनक्ति।

सर्वेऽपि गुणवन्तः पुरुषाः ज्ञानवन्तश्चास्माकं ज्येष्ठाः। वयं कनिष्ठाः तेषां पादसेवनं कृत्वा पुण्यभाजो भवाम। अन्येषूत्कर्षं विलोक्य स्वहृदये असूयाकालुष्यं मा भवतु। स्वस्मिन् न्यूनतावलोकेन विनयश्च सम्भवति।

केवलस्यात्मनः कत्तृत्वं भोकृत्वं वा नास्ति। अज्ञानस्य विक्षेपशक्तिः आवरणशक्तिरिति विभागद्वयं वर्तते। मन्दान्धकारः रज्जुमावृणोति। एष एवावरणशक्तिः। तत्र रज्जौ सर्पः विक्षिप्यते। एष विक्षेपशक्तिरित्युच्यते। एवमावरणविक्षेपाभ्यां मायाशक्तिभ्यां प्रपंचजालस्यानंर्थभावः वेदान्ते प्रपंचितः। जीवात्मा बद्धरूपेण प्रकाशते। सोऽयं विक्षेपावरणात् मुक्त्वा स्वशरीरं त्यक्त्वा कालातीतः सन् परमात्मानमुपैति। तदा च अहंभावविनिर्मुक्तः सः हंसभावं प्राप्नोति। हंस इत्यस्य अहं सः इत्यद्वैतात्मकं निर्वचनं बोध्यम्। मध्याह्नेऽपि समुज्जवलितप्रकाशः दिनमणिः सन् हंसः आकाशे धवलपक्षीवोड्यमानो विराजते। हंसोऽयं निरावृतः सन् सर्वत्र विचरति। कालमायाभ्यामावृतः विक्षेपवरणात्मकः हंसस्तु ईश्वरः परोक्ष सन् वर्तते।

कालत्रयाणां निरूपणं कृत्वा कविरयं भूतं वृत्तान्तं देहमिति वक्ति। तेषां मते वर्तमानाकलः मृत्युः। स एवेश्वरक्रीडा। भविष्यत्कालस्तु कामः। वेदस्तु कामविधायकः कथारूपप्रकाशकिः पूर्ववृत्तान्तः भूतकालः।

जीवरूपेण प्राणिषु स्थितमात्मानां साक्षीति कथ्यते। "ज्ञानाधिकरणमात्मेति" तार्किकमतनुसारेण सर्वस्यापि ज्ञानस्याश्रयभूतः भवत्यात्मा। तस्माद्दृष्टादृष्टरूपेण वेदवेद्यतया वा ज्ञानमेव जायते, किन्तु सुखं चासुखं च जीवे साक्षी वेद्यमेव भवति। शरीरस्य स्वास्थ्येन सुखंमस्वास्थ्येन दुःखं च जायते इत्याशयः। सदाचारनिष्ठाय शरीरं सुखाय भवति। दुराचारप्रवृत्तस्य तु शरीरं दुःखभाजनमेव।

परम्परया प्राप्तः कुलधर्मः आचार इत्युच्यते। कुलधर्मानुष्ठानेन, परोपकारेण च शरीरस्य सार्थक्यं स्यात्। "शरीरमाद्यं खलु धर्ममाधनं"मिति पण्डितोक्तिरत्रनुसन्धेयः। तद्विपर्ययेण तु शरीरं निरर्थकं भवति। तस्माद् भौतिकसुखेषु आसक्तिं परित्यज्य स्वधर्माचरणं कर्तव्यमित्यस्य वैद्यकस्य मतिः।

भूतावासं धर्मकायनिगूहितमिदं शरीरमपि परम्परया प्राप्तम्। तस्मादनादिरेष कायः। कालस्त्वनन्त एव। कार्यकालयोः सेंयोगेननादिरादिरनन्तोऽन्तश्च भवति। तयोः पृथक्भावे अनादिश्च अन्तश्च भवति कालः। कार्यस्य कर्तृत्वं, कालस्य भोक्तृत्वं कर्तृकृतकर्मणस्तु भोग्यत्वं चोक्तं पण्डितैः। आत्मोदयस्योमिति सर्वाङ्गीकारः भवति। एवं शक्तिमान् कर्ता परं भोक्तरं स्वाधीनमानयति।

यथा नद्यः सागरे विलयं प्राप्य प्रत्येकं नदीभावंत्यजन्ति तथैव जीवोऽपि अनन्तभूते काले लयं प्राप्य प्रत्येकभावं परित्यजति।

आदिः ज्ञानम्। अनादिस्त्वज्ञानम्। अनन्तरूपः परमात्मा तु भोक्तामहाबलश्च भवति। स एव कर्तृरूपेण प्रकाशते। आदौ तु कर्ता भोक्ता च केवलरूपेण प्रकाशते। तस्माद्रजः प्रवर्तते। रजसा कर्मोत्पत्तिः। तत्कर्म एव ज्ञानमित्युच्यतेति ज्ञानकर्मसमुच्चयोऽत्र सूचितः।

अनादिरेवाज्ञानमित्युच्यते। अज्ञाने कर्मसमुच्चयः न दृश्यते, ज्ञाने तु ज्ञानकर्मणोरेकत् मेलनं भवतीति ज्ञानाज्ञानयोर्मिथो भेदः। ज्ञानावस्थायामन्यवस्तुजातं कर्तृभोर्क्तृभिन्नं ज्ञानं कदापि न जायते। पूर्वं यः भाव आसीत् स एव पुनर्भवः इति बुद्ध्या यः जीवति स एव उत्तमः। चैतन्ययुक्तो देहः शिव इत्युच्यते। चैतन्यरहितो देवः शवः (कुणपः) इत्यपि ज्ञेयः। शरीरस्य शवत्वं अमङ्गलरूपमज्ञानमेव। शरीरं धर्मानुष्ठानायोत्तमोपाधिर्भविष्यति। एष आर्यः ईश्वरसत्तामवलम्ब्य सज्जनपरिचरणाय अज्ञानाद्विमोचितः इति स्वयं प्रस्तौति।

षोडशोऽध्यायः

अज्ञातात्मप्रकाशकम्

सन्तः सन्तु सदा सन्तः सर्वसन्तोषकारकाः।
येभ्योऽसदपि सत् भाति तेभ्यो वोऽस्तु नमस्सदा। 1
ज्ञानं तु सदिति ज्ञेयं सन्तस्तद्वन्त एव च।
अज्ञानमसदित्युक्तं असन्तोऽज्ञानतास्थिताः।। 2
ज्ञानं तु भावं जानीयात् यथाबोधेन भासितम्।
अयथाबोधमज्ञानंमभावं सत्यविप्लवम्।। 3
जले जलमिति ज्ञानं तत् सत्यं भावमुच्यते।
जले स्थलमिवाभाति तदसत्यतभावजम्।। 4
जलस्यैकस्य सद्भावे असत्तत्रैव भासते।
एवं सत्यं द्विधाभूतं सन्दिग्धं निश्चयात्मकम्।। 5
सत्योत्कर्षादसदपि सत्यमित्यभिमन्यते।
यथा मरीचितोयं स्यात्तदैवासति सत्यता।। 6
रज्जुसत्ये यथा सर्पः स्थाणुसत्ये यथा पुमान्।
यथा शुक्तौ तु रजतं तथा सत्यादसद्भवेत्।। 7
सद्भावैकस्य सत्यत्वात्दसत्यमपि सद्भवेत्।
आभिमानिकमित्याह सत्याभासमसत्स्फुटम्।। 8
सत्यं वैषयिकं विद्यात् मानसं त्वाभिमानिकम्।
पूर्वं यद्विषयैर्ज्ञातं तत्संस्कारस्तु मानसः।। 9
पूर्वं संस्कृतवस्तूनामुत्प्रेक्षा चित्ततो भवेत्।
सत्यवस्तुनि सम्भूते तदसत् सत्यवद्भवेत्।। 10
प्रत्यक्षेण परोक्षेण सत्यमेकं द्विधा भवेत्।
चित्तेन्द्रियोभयोर्योगात् सत्यमेव द्विधा बभौ।। 11

द्वयमित्यत्र नो संख्या एकभावविपर्ययम्।
एकस्मिन् बहुधा भाति अभिमानप्रसङ्गतः।। 12
एवं सत् प्रभुतां विद्यात् भावत्रयविकासिनीम्।
एकसद्भावसत्यत्वात् त्रिसत्यमिह भासते।। 13
कर्तृत्वं चाप्यकर्तृत्वं अन्यथाकर्तृत्वं यतः।
तत्रः कर्ता पुमान् जीवः प्रकाशं प्रतिपद्यते।। 14
[1]*यथा बोधमबोधं च अन्यथाबोधमेव च।
सुखासुखे च दुःखं च यत् सत्यादस्ति तद्बभौ।। 15
इन्द्रियाणां च मनसः दुःखं येभ्यः प्रवर्तते।
तेभ्यो वोऽस्तु नमः सद्भ्यो प्रत्यक्षेभ्योर्यशर्मणः।। 16
शरीरंः शङ्करो यस्य तस्य बुद्धिस्तु गोत्रजा।
पार्वतीपरमेशाभ्यां सुब्रह्मण्यो विराडभूत्।। 17
आर्यः कुमरजन्माय गोत्रे काश्यपनिर्मिते।
प्रसिद्धे वैद्यनिलये विख्यातोऽभूच्च विद्यया।। 18
सत्यङ्गनाशमालोक्य शरीरं शङ्करस्तदा।
अनङ्गं कृतवान् कामं रत्या तद्वीक्ष्य तप्यते।। 19
नास्तित्यत्र रति प्राप्ता कामरूपविनाशतः।
येषां हृदि रतिस्तिष्ठेत् अप्रियस्तेषु सम्भवेत्।। 20
अथ शङ्करपार्वत्योर्योगात्काम प्रजायते।।
तदा रतिः प्रियं प्राप्य औत्सुक्याच्च विमुच्यते।। 21
कामः शङ्करविद्वेषादरूपो रूपवानपि।
बभूव शङ्करस्तस्माच्छरीराख्यं न गर्हयेत्।। 22
कामदः कामहन्ता स्यात् शरीराख्यस्तु शङ्करः।
कुमारो जायते मारः शरीरात्सर्वदेहिनाम्।। 23
कुत्सनात् शङ्करस्यायां कुमारो मार एव च।
प्रत्यक्षस्तु शरीरोऽयं परोक्षः शङ्करः शिवः।। 24

[1]*यथा बोधोप्यबोधश्च अन्यथाबोध एव च इति साधु प्रतीयात्।

अज्ञानात्मा शरीरं स्यात् अविद्यासहित सुखी।
विद्यत्मा शङ्करो ज्ञेयः विद्यया सह मोदते।। 25
प्रत्यक्षमेक एव स्यात् परोक्षमनन्त एव च।
अनन्तत्वादबोधं तत् प्रत्यक्षं केवलं वपुः।। 26
प्रत्यक्षवादिनौ लोके बौद्धो वैद्यश्च तावुभौ।
बौद्धौ लोकनिषद्धः स्यात् वैद्यो लोकैश्च पूज्यते।। 27
असतीरमणोऽज्ञानी अविद्यैव सती स्मृता।
विद्यासतीति विज्ञेया ज्ञानी तस्याः पतिर्बभौ।। 28
युष्मद्दर्शी तु भूतात्म आत्मस्थोभयमीक्षते।
साधारणस्तु मध्यस्थो भूतं भव्यं समीक्षते।। 29
युष्मदस्मन्निवृत्तिस्तु भवस्थः सर्वमीक्षते।
भूतभव्यभवालोकात्सर्वज्ञः स सतां शिवः।। 30
यो भवं विन्दति परं तस्य भीतिर्भवेद्भवात्।
भवात्मकं भवस्येह न भवात् भयमीक्षते।। 31
भोगीतिभावमुत्सृज्य शरीरे भोगदातरि।
भव्यानां परमेशेऽस्मिन् वर्तिनां वः सुखं भवेत्।। 32
न भोगित्वं महादेवे भोगिभूषितभूषणे।
तथैव विषमाक्षित्वं शङ्करेणैव भावयेत्।। 33
प्रत्यक्षादेकमेवेदं भवात् भवभवं शिवम्।
परोक्षवादाद्भेदोऽयं नानाभावैर्विकल्पितः।। 34
वेदादौ वेदमध्येऽपि वेदान्ते च प्रकाशितः।
भावनामात्रभेदेन भवादेव शिवो भवेत्।। 35
भवात्मकशरीरेण यत्कर्मकुरुते शुभम्।
भावनात्मानमाश्रित्य फलं भावेन भूज्यते।। 36
प्रत्यक्षेणकृतं कर्म प्रत्यक्षेणानुभूयते।
परोक्षेण कृतं कर्म परोक्षेणानुभूयते।। 37

बद्धात्मा बद्व एव स्यात् मुक्तात्मा मुक्त एव च।
अज्ञानी पश्यति ज्ञानं ज्ञानी त्वज्ञानमीक्षते।। 38
एतद्यथार्थं जानीयात्सुखं दुःखनिवर्तकम्।
स्वस्मिन् समीक्षणाद्दुःखं विषयाभावतो भवेत्।। 39
इतराज्जयाते ज्ञानं न कैवल्याद्भविष्यति।
ज्ञानादेव प्रकाशः स्यादज्ञानत्स न सम्भवेत्।। 40
अतो द्विजत्वमालम्ब्य अज्ञानस्थस्य देहिनः।
ज्ञानं नित्यसुखं भूयादज्ञानं शिव ईक्षते।। 41
ज्ञाने त्वज्ञानमात्रेण अज्ञाने ज्ञानमात्रतः।
आलोकनाद्विपर्यस्तं छायाभासो निरर्थकः।। 42
अज्ञाने बिम्बितं ज्ञानमज्ञानी स्वावलोकनात्।
छायात्मन्यात्मतामेत्य असत्वात्तत्र मुह्यते।। 43
ज्ञानात्मन्येव यत्र स्याच्छायालोकेन विभ्रमः।
आत्मन्यनात्मता तत्र भवेत् स्वेनैव चोद्धरेत्।। 44
शरीरं तस्य भोक्ता स्यात् शङ्करस्तस्य कारकः।
शरीरेरितभोगानि शङ्करः कुर्वतेऽन्तरे।। 45
एवं पर्यायभोगानि अन्योन्यमनुभोक्ष्यति।
प्रत्यक्षं च शरीरं स्याच्चक्षुर्मात्रप्रकाशकम्।। 46
परोक्षं तु शङ्करःस्यात् वेदमात्रप्रकाशक।
शङ्करो बहवः सन्ति वर्णजात्याभिमानतः।। 47
अन्योन्यवीक्षणादेष सोऽहमित्यवगम्यते।
शङ्करश्च शरीरं च व्रजेदन्योन्यभोक्तृताम्।। 48
शरीरं शङ्करो भुङ्क्ते शरीरं शङ्करं तथा।
भोक्तृभोग्यतयान्योन्यं सुखं लेभे महेश्वरः।। 49
तमोमयशरीरोऽयं शङ्करेण प्रकाशितम्।
तेजोमयो शङ्करस्तु शरीरेण तिरस्कृतः।। 50

जडात्मको यथा चन्द्रः सूर्यरश्म्या प्रकाशित-।
सूर्योपरागस्तेनैव भवेत् छायानुरूपतः।। 51
स्वज्योत्स्नाराजितैर्मेघैः यथाच्छन्नो भवेच्छशी।
ज्ञानप्रकाशितो ज्ञानैः प्रच्छन्नःशङ्करस्तथा।। 52
ज्ञानाज्ञानं तथान्योन्यं अप्रकाशप्रकाशितम्।
ज्ञानेन भासतेऽज्ञानं ज्ञानमन्येन चावृतम्।। 53
एवं परस्परछायारञ्जितात्मानमीक्ष्य च।
सोऽहमित्यपरज्ञानाद्यथा बोधो भविष्यति।। 54
प्रत्यक्षेणानुमानेन ज्ञानं तूभयथा बभौ।
अन्योन्याभासमानत्वादात्मा विस्मृत्य वर्तते।। 55
प्रमाणैरूपमानैश्च यथातथ्यं प्रकाशयेत्।
तच्च बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम्।। 56
यत्सत्वं तमसाच्छन्नं वैद्यस्तच्च समुद्धरेत्।
तथैव तेजसाच्छन्नं तमः पोरुषमास्थितः।। 57
शुभाशुभेषु गच्छन्तं वासनामयमीश्वरम्।
आर्यः पौरुषमासाद्य शुभमार्गेण योजयेत्।। 58
सन्मार्गवर्तानादाशु आर्यनाम यथार्थताम्।
प्रपद्यवैद्यसिद्धान्तमकरोत् सत्वरक्षणम्।। 59
गोत्रजां स्वां मतिं त्यक्त्वा सिन्धुजां यश्चलां स्मृतः।
अस्वस्थं तं भवमपि वैद्यः स्वस्थं करोति च।। 60
अतीव तमसाच्छन्नं विस्मृतं सत्वमात्मनः।
यो भवं भावनामात्रं प्रबोधयति सोऽमृतः।। 61
अमृतेन कृतं स्वास्थ्यं शरीरं भवसंज्ञितम्।
सद्भावममृतं विद्यात्तस्मात्सत्तां समुद्धरेत्।। 62
सर्वेषां सारकिट्टानि विभज्य स्वेन तेजसा।
वैद्योऽयमार्यशर्मास्ते वशी स्वस्थतरः सदा।। 63

धमार्थकाममोक्षां श्च साधयित्वा स तेजसा।
आस्ते स्वस्थतरः साक्षात् भूतो भूत्वा गतस्मयः।। 64
रजःकृततमोमूढं सत्वमुद्धृत्य शङ्करम्।
आनन्दमतुलं व्याप्य नन्दीभूतोऽत्र वर्तते।। 65
इत्यार्यशर्मारचितमज्ञातात्मप्रकाशकम्।
समाप्तंस्वस्थतां प्राप्य जन्मकार्यं समापितम्।। 66

इति
अज्ञातात्मप्रकाशकं नाम
षोडशाध्यायः

षोडशाध्यायस्य टिप्पणी

1. सन्तोषः

सन्तुष्टि-। तत्पर्यायः - धृतिः, स्वास्थ्यमिति हेमचन्द्रः। यथा हितोपदेशे -
"सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम्।
कुतस्तद्धनलुब्धानांमितश्चेतश्च धावताम्।।" इति।

2. (क) विप्लवः

डिम्बः, डमरः, "सर्वा मडजवराज्योर्णि वीर- शमितविल्पवम्" इति राजतरङ्गिण्याम्। परचक्रादिभयं, अस्त्रकलहः, क्लेशः, उपद्रवः, यथा "विप्लवो भूद्दुःखितानां दुःसहकरुणात्मनाम्" इति भागवते।

(ख) विप्लवतेति विप्लवः, जलोपर्यवस्थितः। "वणिजो" नाविभग्नायामगाधे विप्लवा इव" इति महाभारते।

(घ) विनाशः, यथा "संमन्त्रय कौतुकात्पापास्तद्भार्याशीलविप्लवः" इति कथासरित्सागरे।

3. स्थलम्

स्थल्यते स्थीयतेऽत्र इति स्थलम्। जलशून्यो कृत्रिमभूभागः स्थली। "यज्ञो यजमानस्य वर्षति स्थल्योदकं परिगृह्णन्ति।" इति तैत्तिरीयसंहितायाम्। (3) स्थानमात्रम्,

"उवाच वाग्मी दशनप्रभाभिः संवर्द्धितोरस्थलतारहारः-" इति रघौ। (4) वस्त्रगृहम्। पटवासः पटमयं दूष्यं वस्त्रगृहं स्थलम्" इति त्रिकाण्डशेषः।

4. सन्दिग्धः

सन्देहयुक्तः यथा "न तावत् सन्दिग्धसाध्यधर्मत्वपक्षत्वमिति पक्षतामुलम्"

5. मरीचिः

(क) म्रियन्ते नश्यन्ति क्षुद्रजन्तवः तमांसि वा अनेन इति मरीचिः। (1) किरणः, "गर्भं दधर्यक्मरीचयो स्माद् विवृद्धिमत्राश्नुवते वसूनि-" इति रघौ। (2) षट्त्रसरेणुपरिमाणम्।

(ख) म्रियन्ते इव देवाः यद् दर्शनाद् इति मरीचि-। (1) अस्परविशेषः, यथा "मरीचिः शंचिका चैव विद्युद्वर्णा तिलोत्तमा।" इति महाभारते। (ग) म्रियन्ते वारिभ्रमेण जीवाः यस्याः सा मरीचिः। मृगतृष्णा (2) मरीचिका (3) मृगतृष्णिका (4) मृगतृट् (5) मृगतृषा,

6. आभिमानिकम्

(1) अभिमानस्य भावः। अर्थादिना दर्पः। तत्पर्यायः - अहङ्कारः, (2) गर्वः (3) ज्ञानं (4) बोधः (5) प्रणयः (6) प्रमप्राथना (7) हिंसा (8) हननम् इत्यमरभरतौ। स्मयः, अवेलपः, दर्पः, अवश्यायः, टङ्कः इति जटधरः। "अहकारस्यपर्याय इति केचित्प्रचक्षते" इति शब्दरत्नावली।

7. वैषयिकम्

विषयसम्बन्धी। यथा साहित्यदर्पणे -

"यश्चास्मिन् सुखाभावोप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः" इति।

8. उत्प्रेक्षा

उत्प्रेक्षते इति उत्प्रेक्षा। (1) अनवधानमिति मेदिनी। (2) काव्यलङ्कारविशेषः। तल्लक्षणं तु "सम्भावनमथोत्प्रेक्षा प्रकृतस्य परेण यत्" इति।

9. कर्तृत्वम्

कर्तृभावः कर्तृत्वम्। कर्तृधर्मः, यथा श्रीमद्भगवद्गीतायाम् -

"न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः" इति।

10. अबोधः

न बोधः, अबोध इति न ञ् समासः। (1) अज्ञानम्, यथा - "निसर्गदुर्बोधविक्लवाः" इति भारविः। (2) बहुव्रीहौ तु अज्ञानं, मूढः, अनभिज्ञः हतबुद्धिः, किंकर्तव्यविमूढ इत्यर्थः।

11. गोत्रजा

गोत्रे जायते इति गोत्रजा। गोत्रोत्पन्ना। "स तु जन्मनामस्मृतिपर्यन्तसमानोदक भावात् पश्चात् भवतीति शुद्धितत्वम्। यथा याज्ञवल्क्ये -

"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।

तत्सुतो गोत्रजो बन्धु शिष्यः सब्रह्मचारिणः" इति।

12. अनङ्गः

नास्ति अङ्गं कायो सस्य सः अनङ्गः। कामदेव इत्यमरः। यथा मेदिनी, "अनङ्गो मदनो नङ्गमाकाशमनसोरपि" इति।

13. अप्रियः

न प्रियः अप्रिय इति न ञ् समासः। अनभीष्ट, अनीप्सितः, अप्रीतिकरः, अहृद्यः। यथा - "सत्यं ब्रूयात्प्रियं ब्रूयात् न ब्रूयात्सत्यमप्रियम्" इतिं पुराणे।

14. विद्वेषः

(क) शत्रुता। तत्पर्यायः - वैरम् (2) विरोध इत्यमरः।

(ख) अनुशयः, द्वेषः, समुर्च्छयः, वैरत्वमिति जटाधरः।

(ग) द्वेषणमिति शब्दरत्नावली। तथा -

"सुबगस्वभवनभित्तौ भवता सम्मर्द्य पीडिता सुतनुः।

सा पीडयैव जीवति दधती वैद्येषु विद्वेषम्।।" इति।

15. मारः

क) म्रियन्ते प्राणिनो येन इति मारः। कामदेवः, मदनः, मन्मथः, "अनुममार न मार कथं नु सा रतिरतिप्रथितापि पतिव्रता" इति नैषधे।

ख) मृतिः, "क्षन्मारकृद्घाटनिभः खण्डौ नृपहा विदीदितिर्भयदः" इति बृहत्संहितायाम्।

ग) विघ्नः, मारणं, धुत्तूरः।

16. रमणी

क) रमतेऽस्यामिति रमणी। नारीति मेदिनी।

ख) उत्कृष्टः स्त्रीविशेषः, "या वपुर्गुणोपचारेण सौभाग्येन कान्तं रमयति सा रमणी" अत्यमरभरतौ। यथा - "रथेन रमणीयुक्तः प्रजानां दत्तकौतुकः" इति कथासरित्सागरे।

ग) बालाक्ष्यवृक्ष इति शब्दचन्द्रिका।

17. सती

अस्तीति सती। दुर्गा, साध्वी इति मेदिनी।

(2) सौराष्ट्रमृत्तिका इति हेमचन्द्रः (3) दानम्, अवमानम् इति नानार्थसतिशब्दटीकायं भरतः। (4) सावित्री, यथा -

"सावित्रीवरदानेन त्वं सावित्रिकला सती।
प्राप्ता पुरा भूभृता च तपसा तत्समाशु च।।" इति ब्रह्मवैवर्ते। (5) विद्यमाना, यथा -

"तथा समक्षं दहता मनोभवात् पिनाकिना भाग्नमनोरथा सती।
निनिन्दरूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता।।" इति कुमारसम्भवे।

18. ज्ञानी

(क) ज्ञानमस्यास्तीति ज्ञानी। दैवज्ञः। यथा मार्कण्डेये -

"ज्ञानिनो मनुजाः सत्यं किन्तु ते न हि केवलम्।
यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः।।" इति।

(ख) ज्ञानयुक्ते इति मेदिनी।

19. भूतात्मा

भूतानामात्मा भूतामा, देहः। यथा मनुसंहितायाम् -

"यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः।" इति । परमेष्ठी इति मेदिनी। शिवः, युद्धं इति शब्दरत्नावली। विष्णुः, यथा-

"भूतकृत्भूतभुत् भावो भूतात्मा भूतभावनः" इति महाभारते दानधर्मः। जीवात्मा, यथा- चरके शारीरस्थाने प्रथमेऽध्याये-

"तस्मिंश्चरमसन्यासे समूलाः सर्ववेदनाः।

समज्ञा ज्ञानविज्ञाना निर्वृतिं यान्त्यशेषतः।।
अतःपरं ब्रह्मभूतो भूतात्मा नोपलभ्यते।
निःसृतः सर्वभावेभ्यः चिह्नं यस्य न विद्यते।।" इति।

20. मध्यस्थः

मध्ये वादिप्रतिवादिनोरन्तरे तिष्ठतीति मध्यस्थः। मध्यस्थायी। तत्पर्यायः निसृष्ट इति त्रिकाण्डशेषः। यथा च भागवते-

"बन्धुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः।
सर्व एव हि सर्वेषां भवनन्ति क्रमशो मिथः।।" इति।

(2) उभयपक्षहीनः, यथा -

"श्रुत्वा युद्धोद्यमं परमः कुरुणां सह पाण्डवैः।
तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल।।" इति श्रीभागवते।

(3) स्वार्थविरोधेन परार्थघटकाः यथाह प्राञ्चः-

"ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य बोधेन ये
तेऽमी मानुषराक्षसाः परहितं यैः स्वार्थतो हन्यते
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे।।" इति।

21. भोगी

भोगो अस्य अस्तीति भोगी। सर्पः इत्यमरः। यथा विद्यष्णुपुराणे -

"एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकाः।
भोगीश यागतः शेते त्रैलोक्यग्रासबृहितः।।" इति। (2) भोगयुक्तः। यथा आर्यसप्तत्याम् -

"भक्तालिङ्गी भुजङ्गी जालः किल भोगिचक्रवर्तित्वम्।" (3) ग्रामपात्रः, नृपः इति मेदिनी। (4) नापित इति विश्वः। (5) वैयावृत्तिकरः इति हेमचन्द्रः।

22. भूषणम्

भूष्यते अनेन इति भूषणम्। अलङ्कार इति हेमचन्द्रः। यथा चाणक्यसंग्रहे - "नक्षत्रभूषणं चन्द्रो नारीणां भूषणं पतिः।" इति।

23. विषमाक्षित्वम्

विषमंमयुग्ममक्षिर्यस्य स विषमाक्षः, तस्य भावः। त्रिनयनत्वात् तस्य तथात्वम्। शिव इति त्रिकाण्डशेषः।

24. भावना

ध्यानम्, यथा गीतायाम् -

"नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।

न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्।।" इति। (2) पर्यालोचनम्, अधिवासनमिति मेदिनी। त्रिविधा भावना यथा,

"त्रिविधा भावना विप्र विश्वमेतन्निबोध्य मे।

ब्रह्माख्याकर्मसंज्ञा च तथा चैवोऽभयात्मिका।।" इति विष्णुपुराणे। एतद्धि हरेः स्थूलं रूपम्। अतः पररूपप्राप्त्युपायत्वात् तत्र प्रथमं मनः सन्धायमिति भावः। भावना नाम ज्ञानविशेषजा वासना। तां त्रिविधमपि संज्ञामादिशति ब्रह्मख्येति। तामेव विषयत्रैविध्येन विवनक्ति ब्रह्म भावनात्मिकेति। तत्र वयं ब्रह्मैव भावयामः। वयं कर्मैव कुर्मः। वयं तु उभयमिदमनुसन्दध्म इत्येवं त्रिविधा भावना इति तट्टीका।

25. द्विजत्वम्

द्विजस्य भावः द्विजत्वम्। द्विर्जायते इति द्विजः। संस्कृतब्राह्मणः। यथा - "जन्मना ब्राह्मणो ज्ञेयःसंस्कारैर्द्विज उच्यते।" इति स्मृति-। सद्वृत्त ब्राह्मणः, क्षत्रियः, वैश्य इति मेदिनी। यथा याज्ञवल्क्ये -

"मातुर्यदग्रे जायन्ते द्वितीयं मौचिबन्धनात्।

ब्राह्मण-क्षत्रिय-विशस्तस्मातेदे द्विजाः स्मृताः।।" इति। दन्तः, यथा - "न छित्वा भक्षयेत्" इति चरके। अण्डजः, स पक्षिसर्पमत्स्यादि इत्यमरः।

26. उपरागः

ग्रहणम्, राहुग्रस्तश्चन्द्रः सूर्यश्च। निकटस्थितित्वात् निजगुणादेरन्यत्रारोपणं यथा स्फटिकस्तम्भे रक्तपुष्पाणां रक्तिमारोपः। राहुः विगानं, परीवादः, दुर्नयः, ग्रहकल्लोलः, व्यसनं इति च।

ज्योत्सना

ज्योतिरस्त्यस्यामिति ज्योत्स्ना। चन्द्रज्योतिः, चन्द्रिका, कौमुदि, चन्दिमा, चान्द्रीं, कामवल्लभा, चन्द्रातपः, चन्द्रकान्ता, शीता, अमृततरङ्गिणी इत्यर्थः। ज्योस्त्नायुक्तरात्रिः। पटोलिका, श्वेतघोषा, दुर्गा रति च। प्रभातकालः, यथा - "ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या याभिधीयते" इति मार्कण्डेये।

27. प्रच्छन्नम्

अन्तर्द्वारम्, आच्छन्ने, यथा - प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम्" इति।

28. सिन्धुजा

सिन्धोजायतेति इति सिन्धुजा लक्ष्मीरिति जटाधरः।

षोडशाध्यायस्य सारः

सज्जननमस्कारपूर्वकमारभ्यते षोडशाध्यायः। अज्ञातात्मप्रकाशकम् इति नामके अस्मिन्नध्याये व्यावहारिक-प्रातिभासिक-पारमार्थिकरूपसत्यत्रयस्य निरूपणं दृश्यते। सत्पदस्य ज्ञानार्थकत्वं परत्वमुक्त्वा सन्तः एव ज्ञानवन्तः इत्यर्थः प्रतिपाद्यते। असत्पदस्याज्ञानरूपमर्थं च स्वीकरोति। एवं ज्ञानस्थिताः सन्ति सन्तः। अज्ञानस्थिताश्च भवन्ति असन्तः। प्रमया बोधितं ज्ञानं सदित्युच्यते। अप्रमया बोधितमज्ञानं तु असदिति ज्ञेयम्। ज्ञानं सत्यं भवति, अज्ञानं तु असत्यम्। एवं च जले जलमिति ज्ञानं सत्यं, जले स्थलमिति ज्ञानमसत्यमिति च बोध्यम्। अत्रैकस्यैव जलस्य सद्भावे तस्यासद्भावोपि भासते। अत एव सन्दिग्धं निश्चयात्मकमिति सत्यस्य द्विविधं रूपम्। यथा निर्जले मरीचौं असद्रूपस्य जलस्य प्रतीतिः तथैवासति सत्यप्रतीतिः च भवेत्। तदेव प्रातिभासिकसत्यमित्यभिधीयते। प्रातिभासिकसत्यस्योदाहरणं तु रज्जौ सर्पत्वंस्थाणौ पुंस्त्वं, शुक्तौ रजतत्वं चैतत् त्रयं प्रपंचितं दृश्यते। केवलं सद्भावस्यैवासत्येऽपि संक्रमणादसदपि सदिव प्रतिभायात्। तदेवाभिमानिकं सत्यमित्युच्यते। एवं च प्रातिभासिकंमाभिमानिकं वा सत्यमसदिति विज्ञेयम्।

वैषयिकं ज्ञानमेव सत्यपदेन विवक्षितम्। मानसं भवत्याभिमानिकम्। पूर्वार्जितवैषयिकं ज्ञानमेव संस्कार इत्यभिधीयते। संस्कृतचित्ते तु असदपि सत्यवद्भाति। पूर्वोक्तं सत्यं प्रत्यक्षपरोक्षभेदेन द्विधा विभक्तुं शक्यते। एकमेव चित्तेन्द्रियोभयोगोगात् द्विधा प्रकाशते। मनस्सङ्गमेन अभिमानेन वा सत्यं एकस्मिन्नेव वस्तुनि बहुप्रकारेण भाति। एवमेकमव सत् पारमार्थिक-व्यावहारिक-प्रातिभासिकरूपेण भिन्नभिन्नप्रतीतिविषयतामाप्नोति। कर्तृत्वमकर्तृत्वमन्यथाकर्तृत्वं च यत् सन्ति तदेव परं सत्यम्। अनेनैव सुखासुखबोधाबोधादयः सर्वे प्रवर्तन्ते।

"प्रकृतिपुरुषयोः संगमेन जगदुत्पत्तिर्भवेत्" इति तत्वं समर्थयितुं कविरयं सुब्रह्मण्योत्पत्तिमुदाहरति। स्वराट्भूतः परमात्मा पार्वतीपरमेश्वररूपेण प्रकाशं प्राप्य कुमारजन्मने हेतुरभवत्। एष आर्यः सुब्रह्मण्यदेवताभिमानीति अनेन पद्येन सूचितो दृश्यते। स्वीयः जन्मावसरः ग्रन्थकारः एवं निरूपयति। एकैकः अपि जायमानः शिशुः कामरूप कुमार एव। कुत्सितः मारः यौवनें जनान् पीडयति अतीव। अतः स शरीरायोग्यः अनङ्ग इत्यभिधीयते।

बोद्धाः वैद्याः प्रत्यक्षवादिनो भवन्ति। किन्तु बौद्धाः लोके गर्ह्यन्ते। वैद्याश्चात्र पुज्यन्ते। ग्रन्थे विद्यमानेन युष्मदस्मत्प्रयोण तु शांकरभाष्ये "युष्मदस्मत्प्रत्ययगोचरयोः" इति जीवात्मपरमात्मनोः यः प्रस्तावः कृतः स एव सूचितः। युष्मदस्मन्निवृत्तः सर्वज्ञः सतां शिवः सर्वं जानाति। भवात्मकस्य तस्य संसारात् भयं न स्यात्। यश्च रागद्वेषदीनुत्सृज्य परमेशे तिष्ठति सैव सुखं प्राप्नोति। भोगिभूषितोऽपि महेश्वरे भोगित्वं नास्ति। महेश्वरे अत्र भोगिशब्दः सर्वं भोक्तारं सूचयतीति शेषः। "अहं भोगी" इत्यादिकलुषवासना परमशिवे नास्तीति भावः। "द्वितीयाद्वै भयं भवति" इत्युपनिषद्वाक्यमत्र प्रमाणम्।

वेदः परोक्षवादः। अत एव नानानाभावैः विकल्पितः। तस्यादौ मध्ये अन्ते च परोक्षरूपः शिवः प्रकाशितः। भावात्मकः शिव भावनामात्रेण व्यत्यस्तः सन् आस्ते। अथ च भावनात्मकमाश्रित्य भावात्मकशरीरेण कृतकर्मफलं भावः भूनक्ति।

प्रत्यक्षेणैव प्रत्यक्षकृतं कर्मफलमनुभूयते। परोक्षेण च परोक्षकृतमनुभूयते। बद्धात्मा परतन्त्रः, मुक्तात्मा स्वतन्त्र एव च। "अहमज्ञः इत्यनुभवेनाज्ञानी ज्ञानं पश्यति। ज्ञानप्रसादेनाज्ञानरूपायाः मायाग्राः बोधो जायते। एतत् सुखदुःखनिवर्तकं यथार्थमिति ज्ञेयम्। मोक्षवस्थायां तु पूर्णाज्ञानस्वरूपत्वात् विषयज्ञानस्य नैवावसरः। बाह्यविषयमवलम्ब्यैव ज्ञानस्य समुद्भवः। प्रकाशरूपं ज्ञानं, तमोरूपं च अज्ञानम्।

द्विजत्वं नाम उत्तमब्राह्मण्यम्। तादृशेन द्विजेन परिशुद्धानां भक्तानां नित्यसुखं अनुभवयोग्यं भवति। ज्ञानस्य विपरीतभावः अज्ञानम्। अज्ञानं ज्ञानं च तमप्रकाशवत् विरुद्धौ धर्मौ। एवं द्वैतभावनया ईश्वरजीवयोः बिम्बप्रतिबम्बभावः सम्पद्यते। एवं मायाबिम्बितो जीवः जलगतछायया इव मलिन इति विचिन्त्य स्वयं तप्यति। एवं

परस्पराध्यासेन जीवा विभ्रान्तिमनुभूय जननमरणदुःखाय कल्पन्ते।

"द्वासुपर्णौ सयुजौ सखायौ समानं वृक्षं परिषस्वजाते।

तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्योऽभिचकाशीति।।" इति उपनिषद् वचनमप्यत्रानुसन्धेयम्। शरीरं क्षेत्रमित्युच्यते। क्षेत्रज्ञः जीवः शिव इत्यपि बोध्यते। शरीरस्य तमोगुणनिवारणाय शिवः प्रकाशरूपी प्रवर्तते। अत्र क्षेत्रक्षेत्रज्ञयोः ज्ञानं गीतायां प्रपञ्चितम्। इदं ग्रन्थकारः प्रकारान्तरेण प्रस्तौति। सूर्यः परमात्मा एव, 'असावादित्यो ब्रह्म' इति वचनात्। जडोऽपि चन्द्रः सूर्येणैव प्रकाशते। तथाप्येष चन्द्रः कदापि ग्रहणवेलायां सूर्यं पिदधाति। इमं चन्द्रमप्यधिकृत्य मेघाः आवृण्वन्ति। पुनश्च चन्द्रः स्वीयप्रकाशेन मेघानपि वर्णरञ्जितान् करोति। एवं सूर्यचन्द्रमेघानां परस्परं ब्रह्मणीयसम्पर्केण ऐन्द्रजालिकमिव विचित्रं भाति प्रपञ्चमिदं इत्याशयः अत्र विस्तरितः।

एवं विषयविषयिणोः परस्परमिश्रणादनर्थरूपाः अध्यासपरम्पराः जीवात्मानां विभ्रामयति। प्रत्यक्षमनुमानमित्यादिप्रमाणेन लौकिकज्ञानस्य प्रामाण्यं यद्यपि सिद्धं भवति तथापि परमार्थज्ञानं गुरुप्रसादेन भविष्यति। ब्रह्मचर्यं, तपश्चर्या, सदाचारः, गुरुभक्तिः एतत् चतुष्टय विना परमार्थज्ञानं नैव जायते। सदाचारसम्पन्नः दीनजनानां आर्तानां च रोगनिवारकः आर्यशर्मा पुण्यचरणो भूत्वा कैवल्यमाप्नुयादिति स्वयमाशास्ते। एवमैश्वर्यधनरूपिणीं लक्ष्मीमहन्तोहेतुकं परित्यज्य यः ज्ञानमार्गेण एकाकी चरति तमेव एष वृणुते महेश्वरः। तस्मै स्वां तनुं प्रकाशयति च।" इति श्रुतिवचनमप्यत्र अनुसन्धेयम्। एवं च वैद्यशास्त्रानुसारी धर्मार्थकामाननुभूय अन्ते देवताप्रसादेन सच्चिदानन्दमयं मुक्तिप्रदं प्राप्य स्वस्थ भूयादिति आर्यशर्मा परमरुपुषं प्रार्थयते।

सप्तदशोध्यायः

अज्ञानप्रकरणम्

यस्मादिदं समुद्भूतं तत्सत्यं केवलं त्विदम्।
कार्यकारणयोरैक्याद्व्यभिचारो भवेन्न च। 1
कर्मैव परमित्याह भव्यं तु परतः परम्।
तत्परः भव एव स्यात् सत्यं भूतं तु तत्परम्।। 2
भूतात्परं न जानाति सर्वं भूते प्रलीयते।
भूतात्सर्वं प्रभवति भूतज्ञो भूत एव च।। 3
भूत एव भवन्नाथो न भवो भूतनायकः।
भवो भूतानुयायी स्यात् भूतो न भवमन्वियात्।। 4
भूतं प्रति भवः प्राप्त्या भूतावासं कलेबरम्।
क्षेत्रं कलेबरं नित्यं क्षेत्री भव उदाहृतः।। 5
क्षेत्रं स्थिरतरं विद्यात् क्षेत्री चल उदाहृतः।
तदेव जीवो विज्ञेयः जीवन्मुक्तो भवात्परः।। 6
कर्मेति वेदपर्यायो भव्यो नारायण स्मृतः।
भवः साम्बो महादेवः अज्ञो भूतस्तु तत्परः।। 7
वेदादयो न भूतज्ञाः भूतः सर्वं विजानाति।
भूतोऽहमिति जानाति सर्वान् सर्वाक्षरात्मना।। 8
भूतभव्योभयोर्मध्यं भवो भव्यं प्रबाधते।
सत्वाभिभवमालोक्य तं भवं भक्षयाम्यहम्।। 9
परालोकनतः प्राप्तं भूतावासं कलेबरम्।
जीवावासं परित्यज्य भूतावासं गृहीतवान्।। 10
भूताद्भूतं प्रबोधंतु पंचत्वात्प्रतिपद्यते।
एवं भवात् भवं प्रोक्तं भव्यात् भव्यं तथैव च।। 11

वेदाद्वेदं तथैव स्यात् चतुर्वेदोपरि स्वयम्।
पंचत्वं पूर्वसंस्थानं तत्र सत्यं भविष्यति।। 12
कालत्रयविवेकानां स्वावलोकनसंभृताम्।
हेतुकार्यं च सम्बन्धं तच्च सत्यस्य सत्यता।। 13
केचित्स्वभावमित्याहुः त्रिगुणं चापरे जगुः।
ज्ञानशक्तिरिति केचिदैश्वर्यमिति चापरे।। 14
केचिदज्ञानमित्याहु केचित्मायेति चापरे।
भ्रान्तीत्याहुर्महाप्राज्ञाः मुह्यन्तेऽत्रैव सूरयः।। 15
सत्यात्मकस्य सत्यं तदन्तर्ज्ञानं स्ववेदनम्।
येनात्मानं विजानाति अनुमानं तदात्मनः।। 16
सत्यस्य प्रभुशक्तित्वं त्रिप्रकारविलोकनम्।
अतः सत्यं नमस्कृत्य सर्वकृत्यानि कारयेत्।। 17
सत्यमेकं तु तज्ज्ञानं त्रिविधं परिकीर्तितम्।
तस्यानुभवमेकं च एवं पंजीकृतात्मकम्।। 18
ज्ञातृज्ञेयज्ञानगम्यं बोध्यबोधकसंयुतम्।
सत्यात्मकमिदं सर्वं जगदेतच्चराचरम्।। 19
मिथ्याबोधं यथा बोधमबोधं च त्रिधा स्मृतम्।
ज्ञानं तदेव कविभिर्बहुधा च विकल्प्यते।। 20
बिन्दुर्नादश्च बीजं च एतत् त्रयमुदाहृतम्।
आभिमानिकसंयोगाद्यथामति विकल्पितम्।। 21
क्षेत्रं सत्यं तदेकं स्यात् सुस्थिरं नित्यमेव च।
भूतावासं शरीरं तत् शङ्कराणां समीरणात्।। 22
कालस्तु चंचलः क्षेत्री स एव भव उच्यते।
क्षणिकं वर्तमानं स्यात् भावनामात्रगोचरम्।। 23
तत्कृतं मतिवैषम्यमनुमानमनेकधा।
जीवाख्येनेश्वरांशेन कालेन प्रभुरूपिणा।। 24

शरीरान्तर्गतं कालं धारयाम्यहमोजसा।
आत्मनः सत्यमाश्रित्य स्थिरीकरोति शङ्करम्।। 25
ऊर्ध्वशाखमधोमूलंमाचारसुरपादपम्।
सङ्कल्पंफलदं नित्यं लभन्ते स्वर्गिणो जनाः।। 26
ऊर्ध्वमूलमधःशाखमसङ्कल्पफलप्रदम्।
संसारवृक्षं लभते अस्वर्गामर्त्यधर्मवित्।। 27
ज्ञानप्रकरणं विद्यात् मर्त्यधर्मस्य कारणम्।
अज्ञानस्य प्रकरणात् अमर्त्यत्वं प्रपद्यते।। 28
आत्मना च परालोकं परेणात्मावलोकनम्।
मर्त्यधर्मस्थितानां त्वेतदज्ञानसंज्ञितम्।। 29
आत्मा पश्यति चात्मानं आत्मन्येवेति निश्चितः।
परस्तु पश्यति परं मर्त्यस्त्वेवं विजानाति।। 30
स्वर्गस्थे मयि मर्त्यत्वं कल्पितं जीवधर्मिभिः।
असच्छायाश्रितात्मानं आत्मेत्युपमितमात्मभिः।। 31
तेषां सत्यमसत्यं स्यात् असत्यं सत्यमेव च।
अज्ञानं तेषु विज्ञानं ज्ञानमज्ञानमेव च।। 32
सर्वमेवं विपर्यस्तं छायात्मप्रत्ययात्मना।
आर्यः छायात्मजीवत्वं त्यक्त्वा सत्यात्मतां गतः।। 333
छाया बहुविधा भाति अध्यासविकृता च सा।
सत्यमेकं शरीरं स्यात् यस्माद्देतत् प्रकाशितम्।। 34
तस्मात् शरीरसत्यत्वात् सर्वं सत्यं विराजते।
शरीरं भावतः सिद्धं भावत्रयमिदं मयि।। 35
सर्वज्ञाने शरीरेऽस्मिन् अन्यथाज्ञानमज्ञता।
जीवभावं तदज्ञत्वं स्वस्मिन्नस्वप्रकाशकम्।। 36
तेनात्मा मूढतां प्राप्य स्वसत्यमपि विस्मृतः।
असदेतदिति ज्ञात्वा अनर्थं प्रतिपद्यते।। 37

ज्ञानकर्मात्मकं सत्यं शरीरं ब्रह्मसंज्ञितम्।
वेदं तत्पंचबोधेन निबद्धं तदिहोच्यते।। 38
अव्यक्ताद्भूतमभवत् भवं भूतात्प्रपद्यते।
भव्यं भवात्प्रभवति ज्ञानकर्म ततो बभौ।। 39
उत्पित्सु भावमव्यक्तं उद्भूतं भूतमुच्यते।
भवभावैकदेशत्वं भव्यं तदिति निश्चयम्।। 40
ज्ञानकर्मोपयोगः स्यात् एवं बोधस्तु पंचधा।
एवं बोधोऽनुभूतिः स्यात् तदेवानुभवस्तनुः।। 41
तस्मात्ब्रह्मानुभूतिः स्यात् शरीरं पांचभौतिकम्।
ज्ञानंकर्मस्थमव्यक्तं भूतमव्यक्तसंस्थितम्।। 42
भवं भूतस्थितं विद्यात् भवे भव्यं प्रतिष्ठितम्।
ज्ञानकर्मात्मको वेदः भव्ये नित्यं प्रतिष्ठितः।। 43
एवं पंजीकृतात्मानमनुलोमेन पश्यताम्।
जीवोनर्थो न भवति यथातथ्यस्य दर्शनात्।। 44
प्रतिलोमावलोकेन अन्यथा दर्शनं भवेत्।
अव्यक्तं सत्यमायाप्रकाशितमसत् भवेत्।। 45
वेदाद्भव्यं भवेत्तस्माद्भवभूतं ततो भवेत्।
भूताद्व्यक्ततामेति तत्रात्मा सुखमेष्यति।। 46
इत्यात्मा मौढ्याद् भवति अनात्मा तत्र युज्यते।
तथा चेत् केन कृतवान् कारणेन महेश्वरः।। 47
व्यक्ताव्यक्तमिदं रूपं स्वसंवित्या विकल्पितम्।
इति निश्चित्य मनसा वैद्यः स्वस्थोऽस्मि साम्प्रतम्।। 48
अव्यक्तादावृतात्मानं व्यक्ताद्विक्षेपमातनोत्।
भूतभावेन भव्यत्वात् भव्यं भवमभून्मम।। 49
वयं सदावलोकेन सत्यं पश्याम सर्वदा।
सदसद्भावनिर्मुक्ताः स्वेच्छारूपधराः वयम्।। 50

सृष्टिस्थित्यन्तरूपेण चराम भूवनत्रये।
एवं पंजीकृतात्मानं प्रपंचमिति कथ्यते।। 51
त्रीणिस्थानान्यतिक्रम्य पंचम्या सह बध्यते।
एवं पंचात्मकं वेदं प्रपञ्चं ब्रह्मसंज्ञितम्।। 52
तत्परोऽहमदृष्टं स्यात् शरीरं बोधसंज्ञितम्।
अदृष्टबोधं रूपं स्यात् तत्सत्याद्ब्रह्मतः परम्।। 53
ब्रह्मसत्यात्परं सत्यमसदप्यत्र भासते।
एवं तु सत्प्रभावं स्यात् असदप्यत्र सद्भवेत्।। 54
सदसद्भावनिर्मुक्तो द्वैतभावाद्विमाचितः।
सदसद्भावनिर्मुक्तो भवेत् सद्भावगौरवात्।। 55
कैवल्यमार्गान्निर्मुक्तो द्वैतभावाद्विमोचितः।
त्रिवर्गमनुभूयैव चतुवर्गात्परंगतः।। 56
ततः पंचत्वमुन्मथ्य षड्वर्गेभ्यो निवर्तितः।
अतीत्य सप्तावरणं बैद्यस्तस्थौ निरावृतः।। 57
सोऽहंभावविनिर्मुक्तो हंसमार्गात्परं गतः।
सत्सेवकस्य वैद्यस्य गतिर्भवति चोत्तमा।। 58
अदृष्टभावं विक्षिप्य सद्भावेनावृतं जगत्।
सद्भावं जीवभावं स्यात् आर्यस्तस्याद्विमोचितः।। 59
अदृष्टं परमात्मत्वं हंसास्तत्र चरन्ति हि।
वैद्यस्तु तत्परं याति विनतासम्भवास्पदम्।। 60
वैद्यः परमहंसानां मार्गादुपरि वर्तते।
सदाचारप्रवृत्तश्चेत् अन्यथान्यतमो व्रजेत्।। 61
यथार्थनामार्यशर्मा सदाचारप्रकाशनात्।
याथार्थ्याद्वैद्यसंज्ञायाः उत्तमं पदमाविशत्।। 62
सप्तावरणमुद्भिद्य अनिवृत्तं पदं गतः।
अफलकांक्षिणां मार्गं वैद्योऽयं याति कर्मिणाम्।। 63

इति

आर्यशर्मविरचितसदाचारवृत्तिवर्तने अज्ञानप्रकरणं नाम सप्तदशोऽध्यायः

सप्तदशाध्यायस्य टिप्पणी

1. समद्भूतम-

समुत्पन्नः। यथा देवीभागवते -

सा ब्रवीत्तान् सुरान् सुभूर्भवद्भिः स्तूयतेऽत्र का।

शरीरकोषतश्चास्याः समुद्रभूताब्रवीच्छिवः।।" इति

2. व्यभिचारः

(1) कदाचारः (2) भ्रष्टाचारः, यथा-

"व्यभिचारात्तु भर्तुः स्त्री लोके प्रप्नाति निन्द्यताम्।

शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते।।" इति मानवे। (3) दोषविशेषः, तल्लक्षणं तु "साध्यततावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः।" इति अधिकरणधर्मावच्छिन्नभावचिन्तामणिः। स त्रिविधः साधारणाः असाधारणः अनुपसंहारी चेति। तत्र विपक्षवृत्तित्वं साधारणत्वम्, सपक्षव्यावृत्तत्वंसमाधारणत्वम्। व्याप्तिग्रहानुकूलैधर्म्युपसंहाराभावो यत्र सद्धेत्वभिमतोऽपसेंहार्यः इति सव्यभिचारचिन्तामणिः।

3. भूतम्

91) भाव्यते स्म इति भूतम्। भूतिरस्यास्तीति वा। अभवदिति वा भुवो गत्यर्थे इति। प्राणी, जन्तुः यथा,

"भूतानांचतुर्विधा योनिर्जरायुजाण्डस्वेदोद्भिदः।" इति चरके। (2) अतीतं, यथा कथासरित्सागरे,

"भूतुं भवद्भविष्यद्वा किं तत्स्याज्जगति प्रिये।" इति (3) वृत्तम्, यथा सुश्रुते - "गो शकृत् भूतानां वा यवानां शक्तून् कारयित्वा" इति (4) समम्, सदृशमित्यमरभतौ (5) सत्यमिति मेदिनीशब्दरत्नावयौ। (6) भूतकालस्य पर्याये। यथा, वृत्तम्, अतीतम्, ह्यस्तनम्, निभृतम्, गतमिति राजनिघण्टुः। (7) उत्तरपदस्यैव भूतशब्दः। समर्थः इति शाब्दिकाः। यथा, देवभूतोऽ यमिति भरतः।

4. भूतज्ञः

यः भूतं जानाति स एव भूतज्ञः।

5. भूतनाय

भूतानां नायकः भूतनायकः शिवः।

6. क्षेत्री

क्षेत्रमस्यास्तीति क्षेत्री। (1) स्वामी, भर्ता, यथा मनुः

"भर्तुः पुत्रं विजानन्ति श्रुतिद्वैतस्तु भर्तरि।

आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः।।" इति।

(2) परात्मा, यथा गीतायाम् -

"यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।

क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत।।" इति।

7. स्थिरतरम्

अतिशयेन स्थिरः अतिशयस्थिरः। तत्पर्यायः स्थेयानित्यमरः। दृढतर इति शब्दरत्नावली। स्थेयः, अतिस्थिरः, श्रेष्ठः इति हेमचन्द्रः।

8. साम्बः

(1) क) सम्बन्धे इति शब्दकल्पद्रुमः। (2) ओषौ (3) साम्बयति धनं लोकः, सम्बध्नाति इत्यर्थः इति दुर्गादासः।

9. अभिभवः

(1)गर्वनाशः, पराभवः, तिरस्कारः। यथा-

"बलवानपि निस्तेजः कस्य नाभिभवास्पदम्" इति हितापदेशे। (2) पराजयः

10. जीवाभासः

(1) जीवस्य आभासः जीवाभासः। जीवस्य प्रतिछाया इति भावः। दर्पणस्थमुखवत्।

11. पंचत्वम्

पंचानां क्षित्यादिभूतानां भावः। मरणम्, पंचानां भावः इति हेमचन्द्रः।

12. पूर्वसंस्थानम्

पूर्वं संस्थानं पूर्वसंस्थानम्। 91) अवयवसमुच्चय, यथा - "सहजं सहजसंस्थानसंयोगविशेष इत्याहुः। (3) अवयवरचनाविशेषः। (4) प्रचयाख्यसंयोगः। (5) सम्यक् स्थितिः। (6) आकारः (7) चिह्नम् (8) मृत्युः (9) चतुष्पथश्चेति काव्यज्ञाः आहुः।

13. भान्ति

भाति, भातः, भान्तीति आदादिगणे लटि बहुवचनम्, प्रकाशन्ते इत्यर्थः।

14. महाप्राज्ञः

महान् चासौ प्राज्ञश्च महाप्राज्ञ इति कर्मधारयसमासः।

15. अन्तर्ज्ञानम्

श्रवणेन मननेन निधिध्यासनेन च यज्ज्ञानं मनसि प्रकाशते तदेवान्तर्ज्ञानम्। ब्रह्मसाक्षात्कार इत्यर्थः।

16. मिथ्याबोधः

मिथ्यात्वविशिष्टबोधः मिथ्याबोधः (1) मिथ्यात्वं च कालसम्बन्धित्वतम्। यथा - "शशविषणकूर्मरोमवन्ध्यापुत्रादीनां मिथ्यात्वम्। (2) तुच्छत्वम् इति माध्वाः प्राहुः। (3) निरूपाख्यत्वं निःस्वरूपत्वमिति बोद्धाः आहुः। (4) बाधज्ञानविवर्तित्वम्। यथा ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः "इतयादौ मायावदिवेदान्दिनः शङ्करभारतीप्रभृतयः मन्यन्ते।

17. मतिः

बुद्धिः। यथा - "तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता" इत्यादौ मतिशब्दार्थे बुद्धिः। (2) इच्छा (3) मतिकरौषधमिति भिषजः आहुरिति वाचस्पत्यम्। मननविशेषः "ज्ञानावरणक्षयोपशमे सति इन्द्रियमनसी पुरस्कृत्य व्यापृतः सन् यथार्थं मनुते सा मतिः।" इति।

18. सुस्थिरम्

सुष्टु स्थिरः स्थिरतरम्। यथा श्रीमद्भागवते -

"न ह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलम्।
ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः।।" इति।

19. समीरणः

समीरयतीति समीरणः। (1) वायुः (2) पथिकः इति मेदिनी। (3) प्रेरणम्, यथा महाभारते -

'शराभिघाताश्च रुषा च राजन्

20. क्षणिकम्

(1)क्षणिकत्वविशिष्टः क्षणिकम्। क्षणिकत्वं च। तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्। यथा "अव्याप्यवृत्ति क्षणिको विशेषगुण इष्यते।" इत्यादौ। (2) योग्यविभुविशेषगुणानां ज्ञानादीनामपेक्षाबुद्धिव्यतिरिक्तानां क्षणिकत्वम्। अत्र च योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिविशेषगणनाशत्वमिति नियमोऽनुसन्धोयः। तथा च प्रथमक्षणे उत्पद्यते द्वितीयक्षणे तिष्ठति तृतीयक्षणे नश्यति। (3) स्वाधिकरणसमयप्रागभावधिकरणक्षणावृत्तित्वमिति इति वाचस्पत्यम्। (4) बौद्धास्तु द्वितीयक्षणोत्पन्नध्वंसप्रतियोगित्वं क्षणिकत्वमित्याहुः। तन्मते सर्वेषां भावानां क्षणिकत्वम्। यथा यत् सत् तत्क्षणिकं यथा जलधारपटलं सन्तश्यामी भावाः इति।

21. गोचरम्

गोचरत्वाविशिष्टं गोचरम् (1) गोचरत्वं च इन्द्रियविषयग्राह्यत्वम्। जन्यज्ञानविषयत्वम्। यथा "घ्राणस्य गोचरो बन्धत्वादिस्मृतेः" इत्यादौ गन्धरूपरसादीनां गोचरत्वम्। (2) मायावादिनस्तु ज्ञानमात्रविषयत्वं इत्याहुः। यथा "अवाङ्मनसगोचरम्" इत्यादौ इति वाचस्पतिः। (3) ग्रहाणां गतिविशेष इति ज्योतिर्विद आहुः। (4) सूर्यादिग्रहणनिमित्तशुभाशुनिरूपणमिति मौहूर्तिका आहुरिति वाचस्पत्यम्।

22. अनेकधा

अनेकप्रकारम्। बहुथा, यथा -

"पाटीसूत्रोपमं बीजं गुढमित्येव भाषते।
नास्ति गूढमगूढानां नैव षोडैत्यनेकधा।।" इति।

23. ओजसा

(1) उज्यत्यनेन इति ओजः। तेन ओजसा। दीप्तिः, अवष्टम्भः, प्रकाशः, बलं इति मेदिनी। यथा - "तत्रौजसा तु प्रहतं त्वयास्याम्" इति रघौ। (2) रसादिसप्तधातुसारभागजधातुविशेषः। तस्य गुणाः। (1) गर्वशरीरस्थितत्वम् (2) स्निग्धत्वम् (3) शीतलत्वम् (4) स्थिरत्वम् (5) शुक्लवर्णत्वम् (6) कफात्मकत्वम्। (7) शरीरस्य फलपुष्टिकारित्वं च।

24. सुरपादपः

सुराणां पादपः कल्पवृक्षः। देवतरूशब्दस्वरसात्। यथा भागवते -
"वेत्रकीचकवेणूनां गुल्मानि सुरपादपान्।" इति।

25. संकल्पः

(1) संकल्पः कर्म मानसमित्यमरः। संकल्पो उक्तो हारीतेन यथा -
"मनसा संकल्पयति, वाचा अभिलषति, कर्मणा चोपपादयतीति। भविष्यत्पुराणे एवमुक्तम् -

(2) संकल्पश्च भावे मया एतत् कर्तव्यमेव निषेधे तु मया एतन्न कर्तव्यमेवेति ज्ञानविशेषः। व्रतादीनों संकल्पसंभवत्वं यथा -

"संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः।
व्रताः नियमधर्माश्च सर्वे संकल्पजाः स्मृताः।।" इत्येकादशीतत्वम्।

26. प्रत्ययात्मा

प्रत्ययः आत्मा प्रत्ययात्मा। प्रत्ययश्च (1) अधीनः, शपथः ज्ञानम्। यथा गारुडे "जायत् संस्कारसम्भूतः प्रत्ययो विषयान्वितः" इति। (2) विश्वासः, यथा कुमारसम्भवे -

(3) हेतुः। यथा - "अतिष्ठत्प्रत्ययापेक्षसन्ततिः स चिरं नृपः" रघुवंशे। (4) रन्ध्रम्, शब्द इत्यमरः। प्रथितत्वमाचारः इति मेदिनी। (5) स्वादुरिति हेमचन्द्रः। (6) सहकारीति त्रिकाण्डशेषः।

27. अध्यासः

अयथार्थज्ञानम्। (2) स्मृतिरूपः परत्र पूर्वदृष्टावभास इति शंकरभारती वक्ति। यथा शुक्ताविदं रजतमिति ज्ञानम्। स चाध्यासो द्विविधः - अर्थाध्यासो ज्ञानाध्यासश्चेति। तदुक्तम् -

"प्रमाणदोषसंस्कारजन्माद्यस्य परात्मता।
तद्वीश्चाध्यास इति हि द्वयमिष्टं मनीषिभिः।।" इति।

28. विकृता

(1) बीभत्से (2) मलिनीकृते (3) रागयुक्ते (4) विकारयुते "ह्रीमानेर्ष्यादिभिर्यत्र

नोच्यते स्वं निवक्षितम्। व्यंजनं चेष्टयेवेदं विकृतं तद्विदुर्बुधाः।।" इत्युज्वलनीलमणिः। (5) भावभेदे (6) प्रभवादिषु (7) चतुर्विंशवर्षे,

"सर्वाः प्रजाः प्रपीड्यन्ते व्याधिशोकश्च जायते।

शिरो वक्षाक्षिरागश्च पापाद्विविकृते जनाः।।" इति। रागे डिम्बे इति हेमचन्द्रः।

29. उत्सुः

उत्पतितुं इच्छुः उत्पित्सुः। अद्भवितुमिच्छुरित्यर्थः।

30. उद्भूतम्

कुतोद्धरणः, समुदक्तः, उत्क्षिप्तः, परिभुक्तोज्झितः।

"उद्धर्तुमैच्छत्प्रसभोद्धृधारी" इति रघुवंशे। "इतीव

31. तनुः

(1) तनोति तन्यते इति वा तनुः शरीरम्।

विचेरुरवनौ सर्वै विभ्राणा मानुषीं तनुम्।।" (2) अतपः कृशः "वितरन्तीरसमन्तर्मामार्दभावं तनोति तनुगात्री" इत्यार्यासप्तशत्याम्। (3) विरलः, "तनुरोमकेशदशाना मृदङ्गीकर्तुमुद्वहेत्स्त्रियम्" इति मनुः।

32. पांचभौतिकम्

पंचभ्यः भूतेभ्यो आगतः। आकाशादिभूतपंचकारब्धो देहादौ। "पांचभौतिको देहः", "तारुर्भौतिकमित्येके" ऐकभोतिकमित्यपरे इति सांख्यसूत्रम्। "ऐकभोतिकमेकेकिकभौतिकमित्यर्थः। तत्र मनुष्यादिशरीरे पार्थिवाधिक्येन पार्थिवता एवं सूयादिलोकेषु तेजसाधिक्येन तैजसादिना शरीराणां सुवर्णादीनामिव" इति भाष्यम्। इत्येनेकेषां मतमुक्तम्। स्वयंनिर्णयस्त्रोक्तो यथा "न पांचभौतिकं शरीरं बहुनामुपादानयोगादिति सांख्यसूत्रम्। "बहूनां भिन्नजातीयानां चोपादानत्वं घटपटादिस्थले न दृष्टमिति सजातीयमेवोपादानूम्। इतरश्च भूतचतुष्टयमुपष्टम्भकमित्याशयेन पांचभोतिकत्वव्यवहारः। एकोपदानकत्वेऽपि पृथिव्यैवयेपादानं सर्वशारीरस्य शरीरस्यै कमात्रभूतोपादनकत्वं पूर्वोक्तमनैनैव प्रसङ्गेन विशिष्याः" इति भाष्यम्। "सर्वेषु पृथिव्युपादानमसाधारण्यादाधिक्यादिभिरुत्कर्षात्। अत्रापि शरीरे पांचचतुरादिभोतिकत्वव्यपदेशः पूर्ववत् इन्द्रियाणां भौतिकवदुपष्टम्भकत्वमात्रेणेत्यर्थः।

अयं च सांख्यपक्षः।

33. अनुलोमः

यथाक्रमम्, अविलोमः, यथा "वर्णेमालासमाख्याता अनुलोमपिलोमिका" इति तन्त्रसारे नारदवचनम्। क्रमानुगतः अनुकूलः, यथा-

"जटान्यप्यनुलोमथान् प्रवाचकृतिनां गिरः" इति शिशुपालवधो।

34. स्वेच्छा

स्वाभिलाषः इति हेमचन्द्रः।

35. प्रपंचः

(1) विस्तारे (2) वैपरीत्ये (3) प्रतारणे (4) संसारे च इत्यमरः तत्र वैपरीत्यं भ्रमो माया वेति स्वामी।

36. अदृष्टबोधः

अदुष्टः बोधः अदृष्टबोधः। न दृष्ट इति न समासः। अदृतदर्शनः, अवीक्षितः इत्यर्थः।

सप्तदशाध्यायस्य सारः

वैद्यस्वरूपप्रशंसानामकस्याध्यायस्यारम्भ एव जगत्कारणभूतं केवलं नित्यसत्यं परामृशति। यत्र कार्यकारणयोरैक्यं तत्र व्यभिचारस्य नावकाशः। कर्मज्ञानयोः समुच्चयभावेन ज्ञानवत्कर्मणोऽपि परत्वं कल्प्यते। परमं तद् ब्रह् न महद्भूतमित्युच्यते। भूतात्सर्वं प्रपंचजातं समुत्पद्यते। भूतज्ञोऽपि परमेश्वरः कार्यभूतस्य पचभूतस्यापि ईश्वरो भवति। स भूतनाथः भवन्नाथः भव्यनाथश्चेति कालत्रयकूटस्थः विराजते। एष सर्वेश्वरो भव भूतानामन्तर्यामी सूंक्ष्ममरूपो वर्तते। भव परमेश्वरः भूतान्यनुप्रविश्य भूतावसः इति संज्ञां लभते। इदं कलेबरं भवस्य क्षेत्रम्। तत्र शुद्धे शरीरे वर्तमानः क्षेत्री ईश्वर एवेति उदाहृतः। एषा क्षेत्री देहाद्देहमनुव्रजन् चल इति कथ्यते। क्षेत्राद्विमुक्तः जीवन्मुक्तश्च भवति। वेदेषु यज्ञयागादिकर्मविधानात् वेदः कर्मस्वरूपः परो नारायणः स एव साम्बमहादेव इति तत्वज्ञाः जानन्ति। वेदशास्त्रेण कर्मकाण्डः विधीयते प्रपंचवस्तून्येव भवस्य भक्षणं भवति। "अप्ता चाराचरग्रहणात्" इति सूत्रेणेश्वाय

सर्वप्रपंचभोक्तृत्वंमुपलक्षितम्। जीवः आभासं परित्यज्य भूताभासो भविष्यति। पंचत्वं नाम मरणं पूर्वसंस्थानमिज्युच्यते कालत्रयविवेकिनां मरणं न भविष्यति। कार्यकारणसम्बन्धेन जीवस्य संसारगतिः सूचितः। सत्वरजस्तमोगुणानां वैषम्येण संसार इति प्राज्ञाः प्रवदन्ति। "न तत्र सूर्यो भातीति मोक्षावस्थायाः प्रकाशस्वरूपमुपनिषत्सु दृश्यते। एतन्मुक्तिस्थानमनुभूय सूरयः मुह्यन्ति।" सता मुह्यन्ति सूरयः द्वितीव चक्षुराततमिति वेदमन्त्रः अत्रानुसन्धेयः। परमसत्यस्य प्रभुशक्तित्वं वर्तते, विप्रकारविलोकनमपि विद्यते। विकारशीलः सन् अविकारी तिष्ठति इति भावः। ज्ञाता, ज्ञेयं ज्ञानमिति त्रिविधं विलसति वस्तु जातम्। पुनः भूमिजलवाय्वाकाशानां पंचभूतानां केवलानां परस्परमिश्रणं पंजीकरणं जीवोपभोगायापेक्षितं वर्तते। कालस्वरूपोपीश्वरः क्षणनिमेषनाडिकाद्वारा चलरूपोऽपि भवति। शरीरगतः कालः आयुरित्यभिधीयते। "ऊर्ध्वं मूलमधः शाखमश्वत्थं प्राहुरव्ययम्।" इति गीतावचनस्य प्रसक्तिरत्र सूचिता। एवं संसारः वृक्षरूपः, शाखोपशाखं प्ररूढः मेघमार्गमुल्लंघ्य विराजते। धर्मः संसारवृक्षस्य मूलम्। अज्ञानेन मनुष्यः मरणवान् भवति। स्वर्गस्थोऽपि पुण्यपुरुषः क्षीणे पुण्ये मर्त्यलोकं विशति। एवं देवाः अपि मरणशीलाः एव। सर्वेश्वरस्य बिम्बछाया जीव इति उपन्यासः उपनिषत्सु पश्यामः। एवं बिम्बप्रतिबिम्बवादः, छायावादः, कार्यकारणभावः विवर्तवादः इत्यादयः अध्यासविकाराः जीवात्मनां तुं संसार विलासाय कल्पते। ज्ञानकर्मबोधको वेदः ईश्वरे प्रतिष्ठितः। प्रतिलोमावलोकेन प्रपंचे अन्यथादर्शनं जीवं भ्रामयति।" इदं विष्णु विचेक्रमे, त्रेधा निदधे पदम् इति त्रीणिस्थानानि द्योतयति। देवानुष्ठानेन भौतिकमपीदं शरीरं तेजोज्ञानयुक्तं भवति। अदृष्टमपि द्रष्टुं स योगी शक्नोति। ब्रह्म सत्यं जगन्मिथ्येति शुद्धज्ञानस्योदयः अन्ते एव भवति। एवं षड्वर्गविधेयः क्रमेण सम्पद्यते। सप्तास्यासन् समिधयः सप्तृसप्तसविधपदाः इति मन्त्रे सप्तावरणस्य सूचना लभ्यते। एवं परमात्माभावमापन्नः स्वतन्त्रो जीवः हंस इव सर्वत्र विलसितुं प्रभवत्येव। एष वैद्यः परमहंसाराधकः सदाचारप्रवर्तकः अन्धतमोरूपनाकन्निवृत्तश्च भवति। उत्तमवैद्यस्य सदाचारप्रकाशनमनुपेक्षणीयम्। "सप्तावरणमुद्भिद्य अनिवृत्तं पदं गतः न पुनरावर्तते" इति श्रुतिवचनादपुनरावृत्तिपदं मोक्षं प्राप्तः वैद्यः इति ज्ञायते। निष्कामकर्मयोगेनेतादृशीमुक्तिः वैद्यस्य सम्पद्यते इति वयं जानीमः।

परामृष्टग्रन्थसूचि

1. Contribution of Kerala to Sanskrit Literatia by Dr. K. Kunjuni Raja
2. കേരള സാഹിത്യ ചരിത്രം - ഉള്ളൂർ പരമേശ്വര അയ്യർ
3. കേരള സംസ്കൃത സാഹിത്യ ചരിത്രം - വടക്കുംകൂർ രാജരാജ വർമ്മ
4. വിശ്വവിജ്ഞാനകോശം
5. ശബ്ദതാരാവലി
6. भारतीयदर्शन - गगन देवगिरि।
7. न्ययकोशः
8. अमरकोशः
9. वाचस्पत्यम्
10. हलायुधकोशः
11. शब्दकल्पद्रुमः
12. शब्दकौस्तुभम्
13. अष्टाङ्गहृदयम्
14. सुश्रुतसंहिता
15. चरकसंहिता
16. काश्यपसंहिता
17. महाभागवतम्
18. महाभारतम्
19. भगवद्गीता
20. गरुडपुराणम्
21. मार्कण्डेयपुराणम्

22. अद्वैतसिद्धिः
23. सर्वदर्शनसंग्रहः
24. नैषधीयचरितम्
25. कुमारसंभवः
26. तर्कसंग्रहः
27. विवेकचूडामणिः
28. वेदान्तपरिभाषा
29. मनुस्मृतिः
30. साहित्यदर्पणः
31. काव्यदर्शः
32. काव्यमीमांसा
33. ध्वन्यालोकः
34. मुण्डकोपनिषत्
35. ब्रह्मसूत्रशांकरभाष्यम्
36. काव्यप्रकाशः
37. कविकण्ठाभरणम्
38. अभिज्ञानशाकुन्तलम्
39. मुक्तावली
40. रघुवंशः
41. विष्णुपुराणम्
42. वाक्यवृत्तिः
43. कथासरित्सागरम्
44. लघुमंजूषा
45. छान्दोग्योपनिषत्
46. तैत्तिरीयोपनिषत्
47. कठोपनिषत्।

सहायग्रन्थाः

1. ആയുർവ്വേദമാസിക
2. അഷ്ടാംഗഹൃദയം - പ്രകാശികാ
3. ഞാനാര് - കെ.പി. ഗോപാലപ്പിള്ള
4. Sanskrit - English Dicitionary

RASHTRIYA SANSKRIT SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D. GOVT. OF INDIA) ★
ACCESSION NO. 30464
DATE 30/11/12

CENTRAL SANSKRIT UNIVERSITY

(Under Ministry at Education, Govt. of India)

GURUVAYOOR CAMPUS LIBRARY

Due Date Slip

Title: Aryakavi Viracitam Sado

Author: Dr. P. V. Sreedevi

Acc. No. 30464

This book should be returned to the library on or before the date last stamped. Otherwise over-due charges of ₹1/- per book per day will be collected.

Due date of Return	Due date of Return	Due date of Return

CSUGCKL
015 1
30464
Acc.No: 30464